Sadanushthana Darpanam

(A Mirror of Srivaishnava Anushthana Practices, Rites, Ethics and Discipline)

PART II

(द्वितीयभागः)

of

H. H. SHRI SIRUPULIYUR SWAMI
(Well-known as Tiruvazhi Annan)
Shri Suddhasattwam Varadacharya Swami.

PUBLISHED BY

Vedabhashya Praveena, Vimarsaka Shiromani
Ubhayavedanta Vidwan
Tirukkannapuram Vikramam
Ve. SOWRIRAJA IYENGAR,
48, North Chitra Street,
Srirangam, Trichy-620006.

PREFACE

This Work is an exposition of the validity of Sadanushthana being a Collection and Collation of Vedic and Scriptural authorities for Shrivaishnava Ethics and Discipline, by an eminent and revered Acharya, written about a Century ago. The publication of this valuable work, which seeks to provide the Vedic, Shastraic and Sampradaya basis of validity and authenticity to the various aspects of Rites, Rituals, Conduct and religious practices of Shrivaishnavas, has been undertaken as a devout offering by a Sishya at the Holy Feet of his Acharya. The work is of particular interest to Shrivaishnavas (Ramanujeeyas) generally and to those of the Southern Denomination (Thennacharya) specially.

The Vedas which are the timeless repository of all valid and worthwhile knowledge, made available to mankind by Eswara in His boundless grace and benevolence, are the ultimate fountain-head, a source book of reference for correct practices, Rites, Conduct and discipline, a compendium of Do's and Don'ts for one and all. The practices, Ethics and Code of Conduct of all Astika Sampradayas derive their validity and authenticity only from the Vedas. The Shastras, the Smritis, and large volumes of Sampradaya works only seek to elucidate and explicate what the Vedas expound and ordain, and the Vedas are acknowledged as the first and the foremost Shastra.

Says the Gitacharya, the Preceptor-Supreme in the 16th Chapter of Bhagavadgita: " तस्मात् शास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ। ज्ञात्वा शास्त्रविधानेन कर्म कर्तुमिहार्हसि ॥"

We have also the well-known aphorism of Apasthambha:— " धर्मज्ञसमयः प्रमाणं वेदाश्च ".

It is from the vast and limitless expanse of the Ocean of Vedic knowledge the various classes of people (Categorised as सात्त्विक, राजस and तामस on the basis of the predominance of the three gunas, स्वार्थप्रपन्न and परार्थप्रपन्न according to their aptitudes, and levels of mental, moral and spiritual maturity attained by them) derive the appropriate Directives and prescriptions applicable to them on the basis of which the Code of Religious Practices, Conduct, Discipline and Daily Routine governing their lives from womb to tomb is formulated and followed.

The Acharya (or Guru) occupies a very important and essential place in all Sampradayas and his role is to guide and direct the disciples on the right god-bound path to salvation. It is the Acharya, who, by both Example and Precept, guides the seeker of Salvation by dispelling his doubts and indicating the right approach, bringing out the inner, esoteric meaning and significance of the Shastras. Shriman Narayana is the first and foremost Acharya in the Guruparampara line of all denominations. It is therefore imperative that any one seeking salvation, should first seek and select an Acharya, who by his intellectual attainments, spiritual discipline and personal Conduct, is qualified and competent to help him in his spiritual pursuit to attain the goal of reaching the ineffable Lotus Feet of Shriman Narayana.

The role of Acharya has been set-out by Shri Vedantacharya in his inimitable style in the following verse which lists the qualities and qualifications of an Acharya :-

"सिद्धं सत्संप्रदाये स्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्ठं
सत्त्वस्थं सत्यवाचं समयनियतया साधुवृत्त्या समेतम्।
डंभासूयादिमुक्तं जितविषयगणं दीर्घबन्धुं दयालुं
स्खालित्ये शासितारं स्वपरहितपरं देशिकं भूष्णुरीप्सेत् ॥'

To Shrivaishnavas Shri Parankusha or Nammazhwar, who comes at the summit of the hierarchy of Prapannas, is the supreme example and model of perfection for god-consciousness, practices, right conduct and discipline. It was He, who, in his Infinite Grace and Humanity revealed and communicated to Shriman Nathamunigal (in his Yogic transcendence) both the knowledge practices and code of conduct essential and appropriate for Shri-vaishnavas, in the form of Mantra Ratna and the Shri-sooktis of Azhwars as also Shrivaishnava Sadanushthanam. This invaluable Treasure of knowledge and conduct (ज्ञानं and अनुष्ठानं) has been zealously preserved, promoted and propagated, and passed on to us by successive generations of Acharyas from Shriman Nathamuni through Yamuna, Shri Ramanuja, Shri Vedantacharya, Shri Varavaramuni, Shri Koil Annan, and so on down to Shri Shuddha Sattwam Swami in unbroken line of Acharya Parampara.

Of Course, there have been certain deviations or variations in the scheme of Anushthanams, in the intervening period.

His Holiness Shri Embar Jeeyar Swami, in the direct line of Shri Vaishnava Acharyas, was reputed for his matchless scholarship and erudition in the Shastras and the Sanskrit and the Dravidian Vedantic lore as also the essence of the Bhagavadvishaya. An exemplar by the qualities of his head and heart, and selfless spiritual dedication to Divine Service, he was acknowledged

as a re-incarnation of Shri Ramanuja himself. At Shriperumbudur, (the birth place of Shri Ramanuja) he attracted streams of scholars and Sishyas from far and near to sit at his feet and quench their thirst for Spiritual knowledge from the elevating and enlightening fountain of his knowledge and personal conduct.

Shri Embar Jeeyar Swami and several of his devoted disciples wrote a number of works on the various aspects of the teachings and philosophy of Shri Ramanuja and of the proper Shrivaishnava Code of Ethics and Discipline.

The distinguished author of the present work Sadanushthana Darpanam comes in the direct line of Sishyas of Embar Jeeyar Swami, and had the good fortune to imbibe the rich esoteric tradition from his Acharyas and to bequeath to posterity a number of works.

A word about the author's lineage will be apposite at this stage: He belonged to the illustrious Shuddha Sattwam tradition, which had had the proud privilege of Physical personal link with none other than Shri Ramanuja himself, and had also the rare benefit of his personal initiation; having been referred to as Elaya Villi; and earned the rare good fortune of being the recipient of the blessing of Shri Manavalamamuni, as the foremost among the five dazzling jewels (Pancha Ratnas) deputed by him.

Sadanushthana Darpanam is a work of this great Acharya, a product of his competence and devotion, which in turn, bears the stamp of the ancient, authentic tradition, flowing from no less a spiritual preceptor than Shri Parankusha.

The contents of this valuable work reflect the multifarious aspects of Shri Vaishnava Ethics and Discipline as enunciated and exemplified by Shri Nammazhwar. The work was compiled and composed in the Chittrai month of Vishu Year, a hundred years ago; it was in palm-leaf manuscript, referred to at Kalakshepams. It enunciates and elucidates the authentic Vedic and Scriptural basis of Shri Vaishnava Anushthanams like Oordhwapundra Dharanam, the requisite qualifications for eligibility for initiation to Ashtakshara Mantra, Shripada Theertham, the observance of various Holy Jayantis, Ekadasi Vratham and the recitation of Azhwars' Divya Prabandhams.

The Publication of this unique work has been undertaken by me at the instance of well-meaning elders, and the first volume (instalment) (प्रतिफलनं) was brought out in Tamil and Sanskrit in the year Sadharana (12 years ago). The next volume containing chapters 1 to 7 in Sanskrit came out in Pingala (1977).

The current instalment, the Third volume, containing 23 chapters (except chapters 8 and 10) are being published in Sanskrit. These chapters cover very interesting themes relating to Shri Vaishnava Religion and Ethics, which are explained with apt and appropriate references to the Vedas, the Smritis, the Puranas, Bhagavad Vishayam, the Rahasyas and Purva Meemamsa. Particular mention may be made of the fact that illuminating excerpts from the works of Shri Vedantacharya are presented to indicate the validity of several Shri Vaishnava Practices and observances.

Please permit me to indicate briefly that these Chapters advert to among other things:

1. the Southern Tradition of Single Pranamam for which authority is adduced from Shri Vedantacharya himself;

2. the validity of initiation of only the eight syllabled (Ashtakshara) Mantra (including the Pranava in it) as authenticated by Scriptures;

3. the prohibition of Shri Vaishnavas performing पितृश्राद्ध on Ekadasi Vrata Day, as supported by citations from हरिदिनतिलक and तत्त्वमुक्ताकलाप of Shri Vedanta Desika;

4. the Tenkalai Practice of serving rice along with vegetables and other dishes (already offered to God) before Parishechanam and Pranahuti; (as sanctified by references in Rukmini Kalyanam Chapter of Shri Bhagavata Purana);

5. the validity of Pongal Paranai at Sun Rise during Dhanurmasam;

6. the Rule regarding Paranai during Shri Jayanti Vratam; and

7. the propriety of acceptance of Shri Pada Theertham by one and all in Goshtis; as authorised by Poorva Meemamsa.

The author of this work has earned fame for his clarity of thought and capacity to dispel doubts, as evidenced by his panegyric

"वन्दे समस्तशास्त्रार्थसन्देहच्छेदिनं शुभम्।
वरदं वावदूकानां भयदं गुरुपुंगवम्॥"

His disciples among whom may be mentioned Shri Sadhu Ramanujacharya Swami who later became

the Senior Pontiff of the Shri Ramanuja Math at Tirumalai, have been praise - worthy exemplars of correct Shrivaishnava Anushthanam and this should further enhance the value of this work.

Any defects or errors which might have crept in the publication are to be ascribed only to the oversight and over-enthusiasm of the publisher.

The Publisher humbly appeals to Shrivaishnavas to benefit by this work and qualify themselves to be recipients of Shriman Narayana's Infinite Grace.

One last word: The publisher proposes to edit and bring out the remaining two chapters, and also a Tamil rendering of the entire work, and appeals to Astikas for liberal financial assistance.

TIRUKKANNAPURAM VIKRAMAM
Ve. SOWRIRAJAN,
48, North Chitrai Street,
Srirangam-620006, Tiruchy-Dt.

Says Shri Manavala Mamunigal in his Upadesha Rathinamalai:

" ஞானமனுட்டானமிவை நன்றாகவேயுடைய
ஞான குருவையடைந்தக்கால்—மாநிலத்தீர்
தேனார் கமலத் திருமாமகள் கொழுநன்
தானே வைகுந்தம் தரும் ".

ज्ञानं परं तदुचिताचरणं च यस्य
तस्मिन् गुरौ परमभक्तिजुषे जनाय।
भौमाः स्वयं मधुरसाविलपद्मजायाः
कान्तः श्रियः करुणया निजधाम धत्ते॥

॥ श्रीः ॥

विषयसूचिका

I पूर्वानुबन्धविषयसूचिका

1. Preface i-vii
2. श्रीमत्परमहंसेत्यादि वानमामलै जीयर्स्वामिनां श्रीमुखम् 1-2
3. श्रीजगदाचार्यसिंहासनाधिपति महामहिमोपाध्याय श्रीकाञ्ची प्रतिवादिभयङ्कर अण्णङ्गराचार्यस्वामिनां मुखपीठिका iii-iv
4. प्रथमभागस्य प्रस्तावना—
   (1) तिरुनाङ्गूर् प्र. भ. अण्णङ्गराचार्यस्वामिनां v-vi
   (2) ग्रन्थपरिष्कारकस्य vii-x
5. द्वितीयभागस्य प्रस्तावना xi-xiii
6. இரண்டாம் பாகத்திற்கு முன்னுரை xiv-xvi
7. பதிப்புரை [ஸ்ரீ உ. வே. கனபாடி சௌரிராஜ அய்யங்கார் ஸ்வாமியின் வாழ்க்கைக் குறிப்பு] xvii-xviii
8. க்ருதஜ்ஞதா நிவேதனம் xix
9. ஸமர்ப்பணம் xx
10. க்ரந்தபரிஷ்காரகரின் திருவுருவப்படம் xxi

II ग्रन्थविषयसूचिका

प्रतिफलनविषयः पुटानि

उपभागः I

प्रतिफलनसंख्या

1. 12. गृहार्चायां घण्टानादवर्जनविषयः 1-4
2. 13. भक्तनिवेदितप्रसादादेः श्राद्धात्मकतदीयाराधनादौ विनियोगप्रकारविषयः 4-28

उपभागः II

3. 14. स्त्रीशूद्रादीनां वैदिकप्रणवराहित्येन तान्त्रिकप्रणवसहित-अष्टाक्षरोपदेशविषयः 1-37
4. 15. पञ्चसंस्कारदिन एव मन्त्रोपदेशानन्तरं आचार्येण प्रपत्तेःकारयितव्यत्वविषयः 38-53
5. 16. गोष्ठ्यां सर्वश्रीवैष्णवानां श्रीपादतीर्थस्वीकारविषयः 53-64

उपभागः III

6.	17.	प्रपन्नानां वैश्वदेवाकरणविषयः	1-29
7.	18.	विषुसंक्रान्ति-अयनसंक्रान्ति-चतुष्टयमात्र-तर्पणकर्तव्यत्वविषयः	30-31
8.	19.	सकृन्महालयाकरणविषयः	32-41
9.	20.	पित्रादीनां वस्त्राद्यूहाभावविषयः	21-45
10.	21.	एकादश्यां श्राद्धाकर्तव्यत्वविषयः	45-66
11.	22.	श्रीजयन्त्यां श्राद्धाकर्तव्यत्वविषयः	67-74B
12.	23.	तीर्थदिवसव्यवहार-तद्दिनकर्तव्यप्रकारविषयः	74B-87
13.	24.	तदीयाराधनसमये यवनिकाकल्पनविषयः	88-90

उपभागः IV

14.	9.	सकृत्प्रणामविषयः	1-4
15.	25.	प्रथमतो व्यञ्जनपरिवेषणविषयः	5-18
16.	26.	हस्तेन प्रसादादिदानविषयः	18-22
17.	27.	सालग्रामोदकेन आपोशनद्वयकरणविषयः	23-30
18.	28.	प्राणाहुतिसमये सव्यकरेण भुक्तिपात्रस्पर्शनाभावविषयः	30-31
19.	29.	विद्धजयन्तीग्रहणाभावविषयः	32-33
20.	30.	जयन्त्यां उत्सवान्ते पारणा-कर्तव्यत्वविषयः	34-37
21.	31.	भागवतभुक्त्यवशिष्टप्रसादस्वीकारविषयः	38-46

उपभागः V

22.	32.	प्रपन्नस्त्रीकर्तव्यविषयः	1-25

ஸ்ரீ:
ஸ்ரீமதே ராமாநுஜாய நம:

ஸ்ரீமுகம்

ஸ்ரீமத் பரமஹம்ஸ பரிவ்ராஜகாசார்யோப₄யவேத₃ாந்த ப்ரதிஷ்ட₂ாபநாசார்யராய், ஸ்ரீமத்₃ரம்ய ஜாமாத்ரு யதிவர க்ருபயாலப்₃த₄ ஸ்ரீவரமங்காஸமேத ஸ்ரீதே₃வநாயகாந்தரங்ககைங்கர்யைகது₄ரந்த₄ரராய், அக₂ண்ட₂மஹீமண்ட₂லாலங்கார மஹீபால கோடீர கோடிக₄டித மணிகிரண படல பாடலிதபாத₃பீட₂பர்யந்தாசார்யராய், பரமபுருஷார்த்த₂லக்ஷண விலக்ஷண மோக்ஷைகப்ரயோஜநார்த்த₂பஞ்சக ஜ்ஞாநைகஸாத₄ந ஸ்ரீமத₃ஷ்டாக்ஷராதி₃ ரஹஸ்யத்ரயஜக₃து₃ஜ்ஜீவநாசார்யராய், ஸகலஸுஜநமாநஸாரவிந்த₃ ஸந்தே₃ாஹ ஸமுல்லாஸ ஸமுல்லஸித ஸ்ரீராஜஹம்ஸாவதாரராய், ஸ்ரீப₄க₃வத்₃ராமாநுஜ ஸித்₃த₄ாந்த நிர்த்த₄ாரகாசார்ய ஸார்வபெ₄ளமராய், ஸர்வதந்த்ர ஸ்வதந்த்ரராய் எழுந்தருளியிருக்கும் ஸ்ரீவாநமாமலை ராமாநுஜஜீயர் ஸகலஸத்₃கு₃ண ஸம்பந்நர்களாயும், ஸ்ரீப₄க₃வத்₃ப₄ாக₃வதாசார்ய கைங்கர்ய நித்ய நிரதர்களாயும், நம்முடைய மட₂ம் அரங்க நகரப்பன் ஸந்நிதி₄க்கு முக்₂யாந்தரங்கஶிஷ்யர்களாயும், அத்யந்தம் பரமாப்தர்களாயுமிருக்கிற நம்முடைய ஸ்ரீமாந் வெ. சௌரிராஜய்யங்காருக்கு ஸ்வரூபாநுரூபம் க்ரியமாணம் மங்க₃ளாஶாஸநம். இவ்விடம் நம்முடைய மட₂ம் அரங்க நகரப்பன் சன்னிதி நித்யததீ₃யாராத₄நோப₄யவேத₃ாந்தகாலக்ஷேபாதி₃கள் அவிச்சி₂ந்நமாய் நடந்துவருகிறது. அவ்விடம் உங்களுடைய ஶ்ரீப₄யோக₃க்ஷேமாதிசயங்களுக்கு அடிக்கடி எழுதியனுப்பிக்கொண்டிருக்கவேணும்.

இப்பவும், தாம் அனுப்பிய விண்ணப்பப் பத்திரிகையும், தம்மால் அச்சிடப்பட்டு வெளியிடப்பட்ட "*ஸத₃நுஷ்ட₂ாந த₃ர்ப்பணம்*" என்ற ஸ்ரீகோசமும் வரப்பெற்றோம். பார்த்து மிகவும் சந்தோஷிக்கலாயிற்று.

த₄ர்மங்களுள் சிறந்த த₄ர்மம் ஸத₃நுஷ்ட₂ாநம்; இதுவே எம்பெருமான் உகந்த த₄ர்மம். இதையே "*ஸர்வாக₃மாநாம் ஆசார: ப்ரத₂மம் பரிகல்பித:*" "*யத்₃யத₃ாசரதி ஶ்ரேஷ்ட₂:*" "*த₄ர்மஜ்ஞஸமய: ப்ரமாணம்*" இத்யாதி₃ ப்ரமாணங்கள் கோ₄ஷிக்கின்றன.

இதை நாடு நகரும் நன்கறியத் திருவுள்ளமாய், 'ஸத₃நுஷ்ட₂ாநத₃ர்ப்பணம்' என்று பெயர் சூட்டி, பட்டோலை

उपभागः III

6. 17. प्रपन्नानां वैश्वदेवाकरणविषयः 1-29

7. 18. विषुसंक्रान्ति-अयनसंक्रान्ति-चतुष्टयमात्र-तर्पणकर्तव्यत्वविषयः 30-31

8. 19. सकृन्महालयाकरणविषयः 32-41

9. 20. पित्रादीनां वस्त्राद्यूहाभावविषयः 21-45

10. 21. एकादश्यां श्राद्धाकर्तव्यत्वविषयः 45-66

11. 22. श्रीजयन्त्यां श्राद्धाकर्तव्यत्वविषयः 67-74B

12. 23. तीर्थदिवसव्यवहार-तद्दिनकर्तव्यप्रकारविषयः 74B-87

13. 24. तदीयाराधनसमये यवनिकाकल्पनविषयः 88-90

उपभागः IV

14. 9. सकृत्प्रणामविषयः 1-4

15. 25. प्रथमतो व्यञ्जनपरिवेषणविषयः 5-18

16. 26. हस्तेन प्रसादादिदानविषयः 18-22

17. 27. सालग्रामोदकेन आपोशनद्वयकरणविषयः 23-30

18. 28. प्राणाहुतिसमये सव्यकरेण भुक्तिपात्रस्पर्शनाभावविषयः 30-31

19. 29. विद्धजयन्तीग्रहणाभावविषयः 32-33

20. 30. जयन्त्यां उत्सवान्ते पारणा-कर्तव्यत्वविषयः 34-37

21. 31. भागवतभुक्त्यवशिष्टप्रसादस्वीकारविषयः 38-46

उपभागः V

22. 32. प्रपन्नस्त्रीकर्तव्यविषयः 1-25

ஸ்ரீ:
ஸ்ரீமதே ராமாநுஜாய நம:

ஸ்ரீமுகம்

ஸ்ரீமத் பரமஹம்ஸ பரிவ்ராஜகாசார்யோபயவேதாந்த ப்ரதிஷ்டாபநாசார்யராய், ஸ்ரீமத்ரம்ய ஜாமாத்ரு யதிவர க்ருபயாலப்த, ஸ்ரீவரமங்காஸமேத ஸ்ரீதேவநாயகாந்தரங்ககைங்கர்யைகதுரந்தரராய், அகண்டமஹீமண்டலாலங்கார மஹீபால கோடீர கோடிகடித மணிகிரண படல பாடலிதபாதபீடபர்யங்தாசார்யராய், பரமபுருஷார்த்தலக்ஷண விலக்ஷண மோக்ஷைகப்ரயோஜநார்த்தபஞ்சக ஜ்ஞாநைகஸாதந ஸ்ரீமதஷ்டாக்ஷராதி ரஹஸ்யத்ரயஜகதுஜ்ஜீவநசார்யராய், ஸகலமுநிஜநமாநஸாரவிந்த ஸந்தோஹ ஸமுல்லாஸ ஸமுல்லஸித ஸ்ரீராஜஹம்ஸாவதாரராய், ஸ்ரீபகவத்ராமாநுஜ ஸித்தாந்த நிர்த்தாரகாசார்ய ஸார்வபௌமராய், ஸர்வதந்த்ர ஸ்வதந்த்ரராய் எழுந்தருளியிருக்கும் ஸ்ரீவாநமாமலை ராமாநுஜஜீயர் ஸகலஸத்குண ஸம்பந்நர்களாயும், ஸ்ரீபகவத்பாகவதாசார்ய கைங்கர்ய நித்ய நிரதர்களாயும், நம்முடைய மடமும் அரங்க நகரப்பன் ஸந்நிதிக்கு முக்யாந்தரங்கஶிஷ்யர்களாயும், அத்யந்தம் பரமாப்தர்களாயுமிருக்கிற நம்முடைய ஸ்ரீமாந் வெ. சௌரிராஜய்யங்காருக்கு ஸ்வரூபாநுரூபம் க்ரியமாணம் மங்களாஶாஸநம். இவ்விடம் நம்முடைய மடமும் அரங்க நகரப்பன் சன்னிதி நித்யததீயாராதநோபயவேதாந்தகால க்ஷேபாதிகள் அவிச்சிந்நமாய் நடந்துவருகிறது. அவ்விடம் உங்களுடைய ஶுபயோகக்ஷேமாதிசயங்களுக்கு அடிக்கடி எழுதியனுப்பிக்கொண்டிருக்கவேணும்.

இப்பவும், தாம் அனுப்பிய விண்ணப்பப் பத்திரிகையும், தம்மால் அச்சிடப்பட்டு வெளியிடப்பட்ட *"ஸதநுஷ்டாந தர்ப்பணம்"* என்ற ஸ்ரீகோசமும் வரப்பெற்றோம். பார்த்து மிகவும் சந்தோஷிக்கலாயிற்று.

தர்மங்களுள் சிறந்த தர்மம் ஸதநுஷ்டாநம்; இதுவே எம்பெருமான் உகந்த தர்மம். இதையே *"ஸர்வாகமாநாம் ஆசார: ப்ரதமம் பரிகல்பித:"* *"யத்யதாசரதி ஶ்ரேஷ்ட:"* *"தர்மஜ்ஞஸமய: ப்ரமாணம்"* இத்யாதி ப்ரமாணங்கள் கோஷிக்கின்றன.

இதை நாடு நகரும் நன்கறியத் திருவுள்ளமாய், 'ஸதநுஷ்டாநதர்ப்பணம்' என்று பெயர் சூட்டி, பட்டோலை

கொண்ட மஹான் சிறுபுலியூர் திருவாழி அண்ணன் என்ற ஸ்ரீவரதாசார்ய ஸ்வாமியாவர். இம்மஹான் ஸதா₃சார்ய வம்ஶஸ்த₂ரும்,மஹாஜ்ஞாதாவும், ஶிஷ்டாசாரநிஷ்ட₂ருமாவர் என்பதை நாடு நகரும் நன்கறியும். இந்த ஸ்ரீகோஶத்தில் ஸதா₃நுஷ்டா₂னம் கூறுமுகத்தாலே, ஸதா₃சார்ய ஸந்நிதி₄யில் அடிபணிந்து கேட்ட சீரிய ஸம்ப்ரதா₃யார்த்த₂ஸாரப் பொருள்களும் விளக்கப் பட்டிருக்கின்றமை இதைக் கண்ணுறுவோர்க்கு விளங்கும்.

இந்த ஸ்ரீகோசத்தை வெளியிட்டருளியவர் திருக்கண்ணபுரம் நம் சௌரிராஜய்யங்கார், நம் மட₂த்தின் அபி₄மானியும், க₄னபாடி₂ ந்யாயசிரோமணி, வேத₃வேதா₃ந்த வித்₃வான் முதலான விருதுகளைப் பெற்றவரும், சிறந்த அநுஷ்டா₂னபரருமாவர். இவர் ஸ்வாசார்யவிஶ்லேஷத்தாலும், ஸ்வாசார்யன் எழுதிவைத்து வெளியிடக்கருதிய ஸதா₃நுஷ்டா₂ன த₃ர்ப்பணம் என்ற ஸ்ரீகோசம் 95ஆண்டுகளாகியும் வெளியிடப்படாமைக்கும் நொந்து அந்தக் கைங்கர்யத்தை நிறைவேற்றுவதாக ஸங்கல்பித்து, "கு₃ரும் ப்ரகாஶயேத்₃தீ₄மாந்" என்றும், 'எண்டிசையுமறிய வியம்புகேன் ஒண்டமிழ்ச் சடகோபனருளையே' என்ற மதுரகவி போல்வார் நிலையிலும் நின்று,எம்பெருமானருளால் அச்சிட்டு ஸ்ரீகோசத்தை வெளிப்படுத்தியுள்ளார்.

மஹான்கள், இந்த ஸதா₃நுஷ்டா₂ன த₃ர்ப்பணத்தை ஆதரித்தும், அநுஷ்டா₂னத்தை மேற்கொண்டும் தம் தம் அபி₄மதர்களைத் திருத்தியும், ப₄க₃வத்₃பா₄க₃வத க்ருபாபாத்ரராய் அநுக்₃ரஹிக்கச் செய்தும் எல்லா ஶ்ரேயஸ்ஸுக்களையும் பெற்றும் வாழ்வெய்தி ஞாலம் புகழவே வாழ்வர்.

நம் சௌரிராஜய்யங்காரும் திருமாலருள் கொண்டு, மேலுள்ள ப்ரதிப₂லநங்களையும் அச்சிட்டும், உலகுய்ய உபகரித்தும், நம்பெருமாள் பெரியபெருமாள் கைங்கர்யஸ்ரீயுடன், கொண்ட பெண்டிர் மக்களுடன், செல்வத்திருமாலால் அனைத்து ஶ்ரேயஸ்ஸுக்களையும் பெற்று,பல்லாண்டு பல்லாண்டாக எங்கும் திருவருள்பெற்று, இன்புற நம் அரங்கநகரப்பனை ப்ரார்த்தித்து அநேக மங்க₃ளாஶாஸனங்களைச் செய்கிறோம்.

மங்க₃ளாநி ப₄வந்து। ஶுப₄ம் பூ₄யாத்॥

26—1—1977. ஸ்ரீராமாநுஜன்.

श्रीजगदाचार्यसिंहासनाधिपति पद्मविभूषण महामहिमोपाध्याय श्रीकाञ्ची प्रतिवादिभयङ्कर अण्णङ्गराचार्यमहाशयैः सादरं अनुगृहीता

॥ मुखपीठिका ॥

॥ श्रीरस्तु ॥

भगवता गीताचार्येण गीतासूपनिषत्सु दैवासुरविभागः कृतोऽस्ति– 'द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च' इति। स्वेनैव तद्विविच्यते स्म च 'दैवी सम्पद्विमोक्षाय निबन्धायासुरी मते'त्यभिदधता। दैवीं सम्पदमभिजातास्सन्तो यद्यपि दुर्लभा लोके, तथापि तत्र तत्र विरला विलोक्यन्त एव तथाविधा अपि महान्तः। तादृशव्यक्तिविशेषाश्शिष्ट-गरिष्ठा इति, ज्ञानानुष्ठानसम्पन्ना इति च व्यपदिश्यन्ते। तेष्वेषा भिदा विद्यते ज्ञानमात्रसम्पन्नाः केचित्, अनुष्ठानमात्रसम्पन्नाः केचिदिति। अनुष्ठानविरहिताः ज्ञातारः पङ्गुसमाः। ज्ञानहीना अनुष्ठातारस्तु अन्धसमाः इति गण्यन्ते। उभयपरिकर्मिता महान्तः प्रायो मृग्या इदानीम्। तादृशास्सर्वथा न सन्तीति न वयं वक्तुं प्रभवामः। क्वचित् क्वचिन्महाभागा इत्युक्तरीत्या तत्र तत्र परिमेया विभ्राजेरन्॥

षष्ट्याः संवत्सरेभ्यः प्राक् श्रीधन्विनव्यपुर्यां श्रीमद्वेदमार्गप्रतिष्ठापनाचार्याः उभयवेदान्तप्रवर्तकाचार्याः शिरुपुलियूर् अण्णन् स्वामिचरणाः शुद्धसत्वमहागुरवः इति शुभनाम्ना प्रथिता आचार्यसार्वभौमा असमाभ्यधिकज्ञानानुष्ठानसंपन्ना व्यराजन्त। तेषां परमपवित्र दिव्यमङ्गलविग्रह-सेवाभाग्यं सकृदलभत सोऽयं जनो विंशे वयसि। तेष्वेतेषु महानुभावेषु सर्वतोमुखज्ञानं सदनुष्ठानसाम्राज्यं च मिथः प्रस्पर्धमानमिव व्यराजत। चतुर्ष्वपि शास्त्रेषु समरूपं ज्ञानमेषामवबभासे। अनुष्ठाने तु 'वह्निमपि क्षालयन्त्यमी' इति वक्तव्या विरेजिरे। त एते महानुभावास्सदनुष्ठान-सरणिसंरक्षणे विशिष्य बद्धश्रद्धा इति सर्वलोकविदितमेतत्। अथ प्रकृतं प्रस्तुमः॥

'श्रीमद्वरवरमुनीन्द्रा उपदेशरत्नमालायां' "ஆசாரியர்களனைவரு முன்னுசரித்த, ஆசாரந்தன்னை யறியாதார் — பேசுகின்ற, வார்த்தைகளைக்கேட்டுமருளாதே, பூருவர்கள் சீர்த்தநிலைதன்னை நெஞ்சே! சேர்" इत्यनुजगृहुः। गाथारत्नमिदमखिलैरनुसन्धीयते। पूर्वाचार्यपरम्परासमादृतायास्सदाचारसरण्या विप्रतीपेषु नवनवेषु आचारेषु निष्ठिता नवीना यद्यदाचरन्ति यच्च यच्च कथयन्ति, तेष्वभिनिवेशो माभूदिति, परमतात्पर्यमस्यास्सूक्तेः। पूर्वैराचार्यैः परिष्कृता सदनुष्ठानसरणिः का नामेति जिज्ञासायाः प्रमाणजालैः प्रशमनमावश्यकम्। तादृशः प्रामाणिकवचनवृन्दनिरूपणभरितो निबन्धो न कोऽप्यवतीर्ण इह। सच्चरित्रपरित्राणादयो द्वित्रा निबन्धास्तु कतिपयविषयविमर्शमात्रविश्रान्ताः। न्यूनतालेशविरहितं निबन्धमेकं निबन्धरत्नं निर्मिमित्सवः श्रीमदुभयवे. शिरुपुलियूर्शुद्धसत्त्वमहागुरुचरणाः सदनुष्ठानदर्पणाख्यमत्यद्भुतं निबन्धं निबबन्धुः॥

स एष ग्रन्थः श्रीमद्वरवरमुनीन्द्रसंप्रदायनिष्णातानां सतामनुष्ठानसरणीनामशेषाणां प्रमाणगणैः उपपत्तिभूमप्रपञ्चनपटीयसोऽस्य प्रबन्धस्य बहुतिथेनापि कालेन अप्रकाशितस्य साम्प्रतं भागशः प्रकाशनमिति यत्तदिदं महदेव भागधेयं नः। एतत्प्रकाशनकृत्ये चिरादेव बद्धश्रद्धेषु श्रीमत्सु श्रीकृष्णपुराभिजनेषु घनपाठिषु न्यायवेदान्तविद्वत्प्रवरेषु श्रीशौरिराजार्येषु चिरं भृशं कृतज्ञा भवितुमर्हति कृत्स्नाऽपि श्रीवैष्णवमण्डलीति सप्रहर्षमावेदयति॥

श्रीकाञ्ची प्रतिवादिभयङ्कर अण्णङ्गराचार्यः।

॥ श्रीरस्तु ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ प्रस्तावना ॥

१ सदनुष्ठानदर्पणम्

सदनुष्ठानदर्पणाख्यस्य सत्प्रबन्धस्यादिमो भागोऽधिगतोऽस्माभिः। ग्रन्थोऽयं समग्रो द्वात्रिंशत्प्रतिफलनात्मको वर्तते महान्। तस्यैकदेशः प्रतिफलनसप्तकगर्भितः प्रथमभागोऽद्य मुद्राप्य प्रकाशितः। श्रीमद्भिः तिरुक्कण्णपुरं घनपाठिश्रीशौरिराजय्यङ्गार्स्वामिभिः अस्मत्प्रियसुहृद्भिः न्यायशिरोमणिभिः उभयवेदान्तनिष्णातैर्वेदभाष्यप्रवीणैरेतत्प्रकाशनकृते कृतो महान् परिश्रमः। अग्रिमभागप्रकाशने चैते कृतोत्साहाः कृतपरिकरबन्धाश्चेति महानयं हर्षविषयः॥

२ प्रबन्धृवैलक्षण्यम्

ग्रन्थस्यास्य प्रणेतारः शिष्टाग्रगण्याः सदाचारतत्पराः श्रीशुद्धसत्त्ववरदगुरवः (शिरुपुलियूर्स्वामीति सुप्रसिद्धाः)। स्वामिपादानामेषामुभयवेदान्तग्रन्थेषु रहस्येषु श्रुतिस्मृत्यागमादिशास्त्रेषु चानवद्यमप्रतिहतं चासीत्पाण्डित्यमित्येतदेतद्ग्रन्थं परिशीलयतां विदुषामन्तरङ्गेष्वनर्गलं प्रतिभायादेव। श्रीवचनभूषणमीमांसाभाष्य, संप्रदायचन्द्रिकादिग्रन्थोदाहरणात्तत्कर्तृभ्योऽर्वाकालिका एत इति सुगमम्। अत्रैव ग्रन्थे षष्ठप्रतिफलने 'श्रीकाञ्चीदिव्यदेशदीपप्रकाशसन्निधौ श्रीमन्निगमान्तगुरोरवतारस्थले श्रीमदाचार्यार्चादिव्यमङ्गलविग्रहादौ सपादोर्ध्वपुण्ड्रमद्यापि समुज्ज्वलति' इत्येतैरुपवर्णितत्वात्तत्रत्योर्ध्वपुण्ड्रविपर्यसनकालात्प्राचीना इमे इति ज्ञायते। हरिदिनविवेककृत्यादयः बहवः ग्रन्था एतद्भिरचिता इति ज्ञायते॥

३ विषयवैलक्षण्यम्

ग्रन्थेऽस्मिन्प्रतिपादिताश्च विषयाः परमैकान्तिनां श्रीवैष्णवानां कृतेऽवश्यं ज्ञातव्याः समुपादेयाश्च विद्यन्ते नितराम्। केवलवर्णाश्रमिभ्यः प्रपन्नाधिकारिणां ह्यनुष्ठानेऽस्त्यन्तरं महत् 'उपायापायनिर्मुक्तो मध्यमां स्थितिमास्थितः' इति लक्षितानाम्। 'वयन्तु किङ्करा विष्णोर्यूयमिन्द्रिय-किङ्कराः। अस्माकं हरिदासानां युष्माकं नास्ति सङ्गतिः॥' इति 'विल्लिपुत्तूर्पकवर्' नाम्नाऽभिख्यात - परमैकान्तिमहापुरुषवचनतश्चैतत् सुज्ञेयम्। श्रीमदष्टाक्षरप्रतिपाद्यसम्बन्धनवकज्ञानवतां तदीयपदत्रयार्थ-निष्ठावतां परार्थानुभवकैङ्कर्यनिरतानां श्रीवैष्णवोत्तमानां 'सन्तमेनं ततो विदुः' इति श्रुत्युक्तरीत्या निरुपाधिक सत्पदवाच्यानां यान्यनुष्ठानानि, सर्वाणि तानि सप्रमाणान्येव। यतो ह्येते प्रमाणैकशरणाः आस्तिकाग्रे-सरास्त्रैविद्यवृद्धाः न प्रमाणपथात् मात्रयापि स्खालित्यं क्षमन्ते सोढुम्। तदेतदनुष्ठानानां प्रामाणिकत्वं प्रथयितुं सर्वस्मिन्नपि अनुष्ठानविषये प्रमाणवचनान्यत्र संगृहीतानि श्रुतिस्मृत्यागमादिभ्यः। अतः श्रीवैष्णवी-यानुष्ठानेषु मूलप्रमाणानि अन्वेषयतामास्तिकानां कृतेऽप्युपादेयोऽयं ग्रन्थो वर्तते। अन्यत्सर्वं ग्रन्थत एवावगतं भविष्यतीति मनीषया नात्र चिकीर्षामो विस्तरम्॥

४ कामना अभ्यथना च

अग्रिमोऽप्येतद्ग्रन्थभाग एवमेवाचिरेण भवेत् प्रकाशितः इति कामयामहे। अभ्यर्थयामश्च धनिकानामुदाराशयानामास्तिकवर्याणां श्रीवैष्णवानां श्रीवैष्णवाभिमानिनां च महतां सन्निधौ महतोऽस्य ग्रन्थस्य प्रकाशनौपयिकमनर्घमर्थसाहाय्यं विधातुं विधापयितुं च इति॥

श्रीवैष्णवदासः विद्याभूषणं, तिरुनाङ्गूरु,

1—10—76
वृन्दावन्, यू.पि

प्र. भ. अणङ्गराचार्यः,
श्रीरङ्गमन्दिर आस्थान विद्वान्.

॥ श्रीः ॥

॥ श्रियै नमः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीमद्वरवरमुनये नमः ॥

॥ श्रीशुद्धसत्त्वमहागुरवे नमः ॥

बालव्याघ्रस्थलाचार्यो वरदाचार्यसंज्ञकः ।
शुद्धसत्त्वमहाचार्य गुरुपङ्क्तिदिवाकरः ॥ १ ॥

भक्तिवैराग्यसंपन्नः सर्वशास्त्रविशारदः ।
प्रख्यातशीलवान् धीमान् सदनुष्ठानतत्परः ॥ २ ॥

श्रीवैष्णवकुलाम्भोधिसुधानिधिरसीमधीः ।
सदनुष्ठानतत्त्वज्ञः परानुद्धर्तुमिच्छति ॥ ३ ॥

श्रीकौशिकाम्भोधिजपूर्णचन्द्रः धीभक्तिशान्त्यादिगुणैर्वरिष्ठः ।
महर्षितुल्यो निजधर्मसूक्ष्मं परैरशक्यं विशदीकरोति ॥ ४ ॥

ऋषीणां धर्मशीलानां स्मृतिसङ्घातघोषितम् ।
प्रबन्धयति लोकानां सदनुष्ठानदर्पणम् ॥ ५ ॥

श्रियःपतिचरणारविन्दयुगळं उपायोपेयत्वेन स्वीकृतवतां सात्त्विकानां श्रीवैष्णवानां समयाचारनिर्णयपरमिदं सदनुष्ठानदर्पणम्। दृश्यते हि स्मृत्यादिषु सात्त्विकाद्यधिकारिभेदेन आचारभेदः। आचारविषये शिष्टगरिष्ठानां पूर्विकाणां आचार एव मुख्यं प्रमाणम्; अनन्तरं वेदः इति—'धर्मज्ञसमयः प्रमाणं वेदाश्च' इत्याह भगवान् आपस्तम्बः। वेदभाष्यप्रणेत्रा विद्यारण्येनापि—'स्मृतिः प्रत्यक्षमैतिह्यम् अनुमानश्चतुष्टयम्' इत्यत्र अनुमानं शिष्टाचारः इति भाषितम्। उपनिषदि कर्मविचिकित्सायां शिष्टगरिष्ठानां गुणपूर्णानां आचारं ज्ञात्वा तथा वर्तितव्यं इति स्पष्टं प्रतिपादितम् "अथ यदि ते कर्म विचिकित्सा वा...यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः" इति। महाभारतेऽपि—महाजनाचरितः आचारः ग्राह्यः। श्रुतिस्मृतितर्कादिकं निर्णये न प्रयोजकं इति। 'तर्कोऽप्रतिष्ठः श्रुतयो विभिन्नाः नैको मुनिर्यस्य मतं प्रमाणम्। धर्मस्य तत्त्वं

निहितं गुहायां महाजनो येन गतस्स पन्थाः ।।' इति। श्रीरामायणेऽपि भगवता सतां धर्मः परमदुर्ज्ञेयः। शिष्टाचार एव निर्णायकः इति। "सूक्ष्मः परमदुर्ज्ञेयः सतां धर्मः प्लवङ्गम" इति। श्रीनाथयामुनरामानुज-लोकगुरुवेदान्ताचार्यवरवरमुनिप्रभृतिभिः अविच्छिन्नसम्प्रदायाचार्यपरम्परा-प्राप्ताः आचारविशेषाः सप्रमाणं प्रतिपाद्यन्तेऽस्मिन् सदनुष्ठानदर्पणे ।।

अत्र सात्त्विकस्मृतयः विशेषेण उदाहृताः। "वासिष्ठं चैव हारीतं व्यासं पाराशरं तथा। भारद्वाजं काश्यपं च सात्त्विकाः मुक्तिदाश्शुभाः ।।" इति। एतद्ग्रन्थप्रणेतारः भगवद्रामानुजस्थापितचतुस्सप्ततिसिंहासना-चार्यपरम्परायां तथा श्रीमद्वरवरमुनिस्थापितपञ्चरत्नसमाख्याचार्यपरम्परायां च अवातरन् ।।

अवतारकालः

एते आचार्याः इतःप्रपूर्वपरिवृत्तौ नन्दनसंवत्सरे (1831 A. D.) सिंहमासे हस्तर्क्षे अवतीर्य अनन्तरपरिवृत्तौ कुम्भमासपर्यन्तं (1909A.D.) इमां लीलाविभूतिं अलञ्चक्रुः। एषां एकोनपञ्चाशत्तमे वत्सरे (1881 A. D.) विषुचैत्रमासे इदं सदनुष्ठानदर्पणं विरचितमिति अनेन पद्येन ज्ञायते। "गतास्वथ कलेः करमतङ्गजनभःश्रुतिसमासु, विषुनामशरदि, प्रभौघवति, मेषमुपगच्छति, विभायुतसुदर्शनवरप्रदगुरुः। कृतिं निरमिमीत, सदनुष्ठितिं लसन्मुकुरनाममहितां जगति यो यतीश्वरवचोऽर्थविशदीकृतिपटुं प्रथियुतम्, तमहमेमि, शरणम् ।।" (शम्भुनटनवृत्तम्) एषां चतुस्तन्त्र-पारावारपारीणतादिकं प्रतिवादिमतनिरसनपूर्वकस्वमतस्थापनकौशलं च अनेन मुखपद्येन ग्रन्थपठनेन च ज्ञायते। "वन्दे समस्तशास्त्रार्थसन्देहच्छे-दिनं शुभम्। वरदं वावदूकानां भयदं गुरुपुङ्गवम् ।।" इति ।।

एतद्वंशीयैः पूर्विकैः श्रीपराशरभट्टारककृतभगवद्गुणदर्पणनामकस्य सहस्रनामभाष्यस्य निरुक्तिः पद्यरूपा परमभोग्या मुद्रिता विराजते। एतत्पूर्वतनैः आचार्यप्रवरैः संस्कृतवेदान्ते द्राविडवेदान्ते रहस्यप्रस्थाने च

बहवो ग्रन्थाः विरचिताः लुप्तप्राया दृश्यन्ते। सदनुष्ठानदर्पणमातृकाऽपि अनेकमित्राणां साहाय्येन कथञ्चित्प्राप्ता। पवित्रतमानां तेषां नाम्नां निरूपणमावश्यकमपि विस्तरभयान्नोक्तम्॥

अस्मिन् दर्पणे — सकलशास्त्रसंप्रदायग्रन्थपङ्क्तयः उदाहृताः (महाभाष्य, व्युत्पत्तिवाद, मीमांसा, रहस्यत्रयमीमांसा, श्रीभाष्य, श्रुतप्रकाशिका, तद्व्याख्या गुरुभावप्रकाशिका, श्रीवचनभूषणमीमांसाः वेदाहमेतंभाष्यं च) एषां सर्वतोमुखपाण्डित्यं प्रकटयन्ति। विशिष्य श्रुतप्रकाशिकाव्याख्या प्रधानभूता विलसति। अत्र पूर्विकैः अहोबिलमठं गोपालदेशिकादिभिः विरचिताः सर्वे ग्रन्थाः सबहुमानं उदाहृताः॥

अत्र प्रप्रथमतः शौचाद्याचारप्रकारः वर्ण्यते। तत्र निदानं चतुर्विधपुरुषार्थसिद्धिः। नित्यकर्मानुष्ठानमूल (वर्णाश्रमधर्म) शौचाद्याचारविकलस्य पुंसः आचमनेऽप्यनधिकारात् पुरुषार्थसाधनानुष्ठानं न संभवति। तथा विश्वगुणादर्शचम्पूग्रन्थे वेङ्कटाध्वरिभिः मद्रपुरीवर्णनप्रकरणे उक्तम् "तेषां दोषाः पारेवाचां ये नाचरन्ति शौचमपि" इति। काञ्चीवर्णने—

शौचं नाचरितुं यथाविधि कलौ शक्ता द्विजाः किंच ते
ये खल्वाचमनाप्लवादिनियमाः तान् स्मर्तुमप्यक्षमाः।
क्वामीषां पुनरग्निहोत्रनियमाः क्वेष्टेरनुष्ठानधीः
क्वाग्निष्टोममुखा मखास्सपशुकाः क्वात्याग्निचित्या तु सा॥

श्रियः विभुत्वे, उपायत्वे प्रपत्त्यादिविषये च पूर्वाचार्यप्रणीताः अस्माभिः अश्रुतपूर्वाः बहवः ग्रन्थाः उदाहृताः इति, ग्रन्थद्रष्टारः तद्दर्शनेन अमन्दमानन्दमनुभविष्यन्ति इति विशिष्य न लिख्यते दासेन॥

कृतज्ञताप्रकटनम्।

अस्मिन्नेव ग्रन्थे (140) पृष्ठे, ऊर्ध्वपुण्ड्रस्य पादद्वयाकारत्वनिरूपणावसरे, "'त्वत्पादमूलं शरणं प्रपद्ये' इत्यत्र न ह्येकपदप्रतीतिः। एकान्तिनां पुण्ड्रमतोऽपि हेतोः पाद्द्वयाकारमिति प्रतीतम्॥" इति दृश्यते।

एवमेव मुद्रापणविषये च संयमीन्द्राणां द्वयेनैवोपकृतम्। उभयवेदान्ताचार्यपीठस्थापकाः संप्रदायरक्षणैकजीविताः श्रीश्रीश्री त्रिदण्डि श्रीमन्नारायणसंयमीन्द्राः, श्रीश्रीश्री तिरुमलै तिरुपति ज्येष्ठमठाधिपतयः श्रीनिवासकैङ्कर्यैकजीविताः श्रीमत्परमहंसेत्यादि अप्पन् सुन्दररामानुजसंयमीन्द्राश्च महान्तमुपकारमकुर्वन्। परमहंसानामेतेषां निरवग्रहानुग्रहेणैव ग्रन्थोऽयं मुद्रितः श्रीमतां आस्तिकानां प्रेक्षणयोग्यो विलसतीति। ग्रन्थप्रणेतुः ज्ञानानुष्ठानसाम्राज्यमधिकृत्य, जगद्गुरु श्रीमत्परमहंसेत्यादि श्रीतोताद्रि रामानुजस्वामिपादैः, जगदाचार्यसिंहासनाधिपतिभिः परस्सहस्रग्रन्थप्रणेतृभिः पद्मविभूषण महामहिमोपाध्याय आदिविरुदभूषितैः श्रीकाञ्ची प्र. भ. अण्णङ्गराचार्यमहाशयैः; बृन्दावनम् रङ्गजीमन्दिरास्थानपण्डितैः विद्वद्वरिष्ठैः विद्याभूषणं तिरुनाङ्गूर प्र.भ. अण्णङ्गराचार्यमहाशयैश्च सम्यग्वर्णितमिति, न मया लिख्यते॥

ग्रन्थमुद्रणविषये महोपकारं कृतवतां एतेषां अन्येषां च सर्वदाऽधमर्णोऽहं कृतज्ञताप्रकटनमन्तरा प्रतीकारमन्यं कर्तुमशक्त इति विज्ञाप्य बद्धाञ्जलिः वर्ते॥

किञ्च आम्रफलकीटः (மாம்பழ உண்ணி) इति कश्चन सांप्रदायिको व्यवहारः वर्तते। तद्वदेव दासस्य ग्रन्थमुद्रणस्य च संबन्ध इति विनिवेद्य विरमामि। ग्रन्थस्थविषयाः सर्वेषामानन्ददायकाः, तत्र मुद्रणादिविषये दासकृतदोषाः न प्रतिबन्धका भवेयुः इति विश्वसिमि। ग्रन्थकृद्भिरेवोक्तं वाक्यं स्मरामि—

"न ख्यात्यै कृतिरेषा, किं तु सुसूक्तेर्निजार्थमननाय।
तद्दययाद्य भवन्तः विमृशन्त्वेतां विमत्सरास्सन्तः॥" इति।

द्रष्टारः सर्वे निर्मत्सराः गुणग्राहिणः सदनुष्ठानतत्पराश्च भवेयुः इति विश्वसिमि॥

इत्थं वैष्णवचरणरेणुः तिरुक्कण्णपुरम्
शौरिराजदासः।

॥ श्रीः ॥
श्रीमते रामानुजाय नमः ॥
श्रीमद्वरवरमुनये नमः ॥
श्रीशुद्धसत्त्वमहागुरवे नमः ॥

सदनुष्ठानदर्पणम् – द्वितीयो भागः

भूमिका

इह खलु आस्तिकानां सर्वेषां सदाचारविषये वेदादिरूपशास्त्र–शिष्टाचारद्वयमेव मुख्यप्रमाणम्। उक्तं च "तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ। ज्ञात्वा शास्त्रविधानेन कर्म कर्तुमिहार्हसि" (गीता-१६) " श्रुतिः स्मृतिर्ममैवाज्ञा " इत्यादि। तत्र वेदः शास्त्रं, तामस-राजस-सात्त्विक-स्वार्थपर-परार्थपरा इति पञ्चविधाधिकारिविषयम्। तत्र स्वस्वाधिकारानुरूपं तत्तदधिकारिभिः विषयाः उपादेयाः। एतदेवोक्तम् "यावानर्थ उदपाने सर्वतः संप्लुतोदके। तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः। त्रैगुण्यविषया वेदाः..." (गीता-३) इति। शास्त्रोक्तेष्वनुष्ठानेषु, सति संशये शिष्टानुष्ठानमेव निर्णायकमिति वेदेष्वेव उक्तम्—"अथ यदि ते कर्मविचिकित्सा वा...यथा ते तत्र वर्तेरन्...वर्तेथाः...तेषु वर्तेथाः" (तैत्तिरीयोपनिषत्) इति। शिष्टाचारप्रामाण्ये एतच्छ्रुतिरेव मुख्यं प्रमाणम्। तत्र भगवन्निर्हेतुककृपालब्धसार्वज्ञ्येन साक्षात्कृतपरावरतत्त्वाः, पराङ्कुशमुनय एव परमसात्त्विकाः, शिष्टाग्रगण्याश्च। योगदशायां तदुपदिष्टमेव तत्त्वोपदेशमन्त्रानुष्ठानादिकं सर्वं नाथोपज्ञं प्रवृत्तं, यतिवर, वेदान्ताचार्य, वरवरमुनि, कोयिलण्णन्, शुद्धसत्त्वाचार्यप्रभृत्यस्मत्पूर्वाचार्यैः परम्परया परित्रातं च सदनुष्ठानमुच्यते। प्रपन्नजनकूटस्थपराङ्कुशोपज्ञमेव सदनुष्ठानं, त एव "सत्"शब्दस्य मुख्यवाच्यभूताः इति सुष्ठूक्तम्।

एवं शठकोपनाथमुनिप्रभृतिसदनुष्ठानक्रमः पारम्पर्येण अविच्छिन्नः संप्रवृत्तः। अथ अर्वाकाले तत्र तत्र केचन तत्त्वविधाभेदाः भिन्नभिन्नानुष्ठानक्रमाश्च प्रादुष्यन्ति स्म। तदानीं, तत्तद्भिन्नभिन्नानुष्ठानक्रमान् सम्यक्कृत्य पूर्वाचार्यानुष्ठितसदनुष्ठानप्रकारं सम्यक् प्रदर्शयितुं एम्बार्जीयर् - तच्छिष्यभूतकुण्णत्तूरय्यन् - प्रभृतयः महान्तः कतिपयान् ग्रन्थान् निबबन्धुः। तत्परंपरायां शुद्धसत्त्वान्वये जनितोऽयं श्रीसुदर्शनसूरिः। तिरुवालि(ळि)यण्णन् इति सुप्रसिद्धोऽयं, यथाविधि, यथाक्रमं च सर्वाण्यपि शास्त्राण्यधीत्य, सदनुष्ठानपरश्च भूत्वा, अर्वाचीनानां सदनुष्ठानप्रकारेषु संशयविपर्ययनिरासपूर्वकनिर्णयार्थं सदनुष्ठानदर्पणाह्वयं ग्रन्थरत्नं इदं निरमिमीत। प्रायः शतसंवत्सरेभ्यः प्राक् अयं ग्रन्थः निरमीयत। अद्य यावत् तालपत्रकोशेष्वेव अयं स्थितः। अस्य ग्रन्थस्य प्रथमप्रतिफलनं श्रीवैष्णवाह्निकनाम्ना प्रथितम्, तत् प्रथमतः संस्कृते, द्राविडभाषायां च दासेन मया सम्मुद्रय प्रकाशितम्। ततः १९७७ संवत्सरे अस्य ग्रन्थस्य सप्तप्रतिफलनानि प्रकाशितानि। इदानीं तदुपरि द्वाविंशतिप्रतिफलनानि प्रकाशं नीयन्ते। इतः परं त्रीणि प्रतिफलनानि प्रकाश्यानि। अत्र बहवः सद्विषयाः श्रीभाष्य-श्रुतप्रकाशिका - भगवद्विषय - रहस्यत्रयश्रीवचनभूषणमीमांसा - वेदभाष्य - श्रीमद्वेदान्ताचार्यप्रणीतग्रन्थादि सकलशास्त्राणामप्यनुसारेण समीचीनतर्कोपपत्तिसाहाय्येन च निर्णीताः इत्यत्र गरीयसां विद्वद्वराणां सहृदयमेव प्रमाणम्। एतद्ग्रन्थकारविषयोऽयं मुक्तकश्लोकः "वन्दे समस्तशास्त्रार्थसन्देहच्छेदिनं शुभम्। वरदं वावदूकानां भयदं गुरुपुङ्गवम्।" इति।

एतद्ग्रन्थकारस्य अन्वयः श्रीभाष्यकारैः उभाभ्यामपि विद्यायोनिसंबन्धाभ्यामनुगृहीतः 'इळयविल्ली' इति विरुदेन वरवरमुनिभिः सश्लाघं अनुगृहीतश्च। एतच्छात्राणां सदनुष्ठानं जगति सुप्रसिद्धम्।

तत्र प्रथमोदाहरणभूताः तिरुपति पेरियजीयर्-पदवीमधिष्ठिताः, कतिपयवर्षेभ्यः प्राक् भगवच्चरणारविन्दं प्राप्ताः 'साधुरामानुजार्य' इति पूर्वाश्रमसुप्रसिद्धस्वामिनः ॥

महतां नियोगेन, आस्तिकानां द्रव्यसाहाय्येन च मया प्रकाशितेषु, एषु द्वाविंशतिप्रतिफलनेषु असर्वज्ञस्य मम अज्ञानाशक्तिभ्यां तत्र तत्र उपलभ्यमानान् दोषानुपेक्ष्य गुणानेव संगृह्य एतद्ग्रन्थसौष्ठवं ज्ञात्वा सर्वेऽपि महान्तः सदनुष्ठानपरायणाश्च भवेयुः इति मे प्रार्थना।

एतद्ग्रन्थसंमुद्रणे बहु बहुधा च उपकृतेभ्यः असंख्येयान् धन्यवादान् वितरामि। चतृषु मुद्रणालयेषु अयं ग्रन्थः मुद्रितः, तेषां सर्वेषामप्यहमधमर्णो भूयासम्।

इति

श्रीवैष्णव श्रीपादधूलिः

तिरुक्कण्णपुरं वे. शौरिराजः

ஸ்ரீ:
ஸ்ரீரங்கநாயிகா ஸமேத ஸ்ரீரங்கராஜ ஸ்வாமிநே நம:
ஸ்ரீமதே ராமாநுஜாய நம:
ஸ்ரீமத் வரவரமுநயே நம:
ஸ்ரீசுத்த ஸத்வ மஹாகு₃ரவே நம:

ஸதனுஷ்டான தர்ப்பணம்-இரண்டாம்பாகம்

முன்னுரை

"तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ। ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥" [கீதை-16] என்கிறபடி சாஸ்த்ரத்தில் சொன்னபடி அனுஷ்டிக்கவேண்டும். சாஸ்திரம் என்பது வேதம். அது தாமஸ, ராஜஸ, ஸாத்விக, ஸ்வார்த்த₂பு₄க்த ப்ரபந்ந, பரார்த்த ப்ரபந்நர்களான இந்த 5-விதமான ஸர்வாதிகாரிகளுக்கும் ஸாதாரணம். यावानर्थ उदपाने सर्वतः संप्लुतोदके। तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः॥ त्रैगुण्यविषया वेदाः [கீதை-3]. அனுஷ்டானத்தில் சந்தேகம் ஏற்படின் "अथ यदि ते कर्मविचिकित्सा वा ....तेषु वर्तेथाः" [தைத்-உபநி] என்று பெரியோர்களின் அனுஷ்டானத்தைப் பின்பற்றச் சொல்லிற்று வேதம். धर्मज्ञसमयः प्रमाणं என்றபடி பிரபந்ந ஜனகூடஸ்தரான நம்மாழ்வார்போல்வாரனுஷ்டானமே பின்பற்றத் தக்கது.

அவர் நாதமுனிகளுக்கு யோகதசையில் மந்த்ரரத்னம் முதலாக அருளிச்செயல்களையும் அருளி, ஸ்ரீவைஷ்ணவானுஷ்டானத்தையும் நியமித்தருள, அது நாதமுனிகள் தொடங்கி, எம்பெருமானார், வேதாந்தாசார்யர், மாமுனிகள், கோயில் அண்ணன், சுத்தஸத்வம் ஸ்வாமி என்று இவ்வாறுக ஆசார்யர்களால் பரம்பரையாக நாளதுவரை அவிச்சிந்நமாக அனுஷ்டிக்கப்பட்டு வருகிறது.

'ஸத்'சப்தத்திற்கு, எம்பெருமானால் மயர்வற மதிநலம் அருளப்பட்ட நம்மாழ்வாரே முக்யமான வாச்யராவார்.

அவர் உபதேசித்த அனுஷ்டானமே ஸதனுஷ்டானம். அவரே பிரபந்நஜநகூடஸ்தர்.

மத்யகாலத்தில் அவ்வனுஷ்டானங்களில் சிலவித ப்ரகார பேதங்கள் ஏற்பட்டன. அவற்றைச் சீர்படுத்த ஸ்ரீஎம்பார் ஜீயரும், அவருடைய சிஷ்யர்களான குன்னத்தூரய்யன் போல்வாரும் பல கிரந்தங்களை விரிவாக அருளியுள்ளார்கள். அந்தப் பரம்பரையில், சுத்தஸத்வம் திருவம்சத்தில் அவதரித்தவர் ஸ்ரீதிருவாழி அண்ணன் ஸ்வாமி. இவர் ஸமஸ்த சாஸ்திரங்களையும் முறையே அதிகரித்தும், அனுஷ்டித்தும் போந்து, பின்புள்ளாருக்கு அனுஷ்டானங்களில் ஸம்சயவிபர்யயங்கள் வராமைக்காக 'ஸதனுஷ்டான தர்ப்பணம்' என்கிற இந்நூலை அருளினர். இந்நூல் இயற்றப்பட்டு சுமார் நூறு வருஷங்களாகின்றன. இந்நாள்வரை ஓலைச்சுவடியிலிருந்த இதனைப் பெரியோர்கள் நியமனப்படி வெளியிடத் தொடங்கி, இந்நூலின் முதல் ப்ரதிபலனம், தமிழ் உரையுடன் 'ஸ்ரீவைஷ்ணவ ஆஹ்நிகம்' என்ற தலைப்பில் வெளியிடப்பட்டது. பிறகு 1977-ல் 1முதல் 7முடிய பிரதிபலனங்கள் வெளியிடப்பட்டன. இப்போது இதன் மேல் 22 பிரதிபலனங்கள் வெளியிடப்படுகின்றன. இன்னும் 3 பிரதிபலனங்கள் வெளியிடப்படவேண்டும். இந்நூலில் பல அருமையான விஷயங்கள் வேதம், ஸ்ரீபாஷ்யம், ச்ருதப்ரகாசிகை, ரஹஸ்யத்ரய ஸ்ரீவசனபூஷண மீமாம்ஸை, பகவத்விஷயம், ஸ்ரீவேதாந்தாசார்யரின் க்ரந்தங்கள் ஆகிய பல நூல்கள் மூலமும், பல சிறந்த உபபத்திகள் மூலமும் விசாரித்து விளக்கப்பட்டுள்ளன. இந்த ஸ்வாமியின் தனியன் **"वन्दे समस्तशास्त्रार्थसन्देहच्छेदिनं शुभम्। वरदं वावदूकानां भयदं गुरुपुङ्गवम् ॥"** என்பது.

இந்தத் திருவம்சம் எம்பெருமானாருடைய சரீரஸம்பந்தமும், உபதேச ஸம்பந்தமும் பெற்றது. 'இளையவில்லி' என்று மணவாள மாமுனிகளின் விசேஷ கடாக்ஷத்திற்குப்

பாத்திரமானது. 'பஞ்சரத்நம்' என்ற ஸமயாசார்யர்களில் முதன்மையும் பெற்றது. இந்த ஸ்வாமியின் சிஷ்யர்களின் அனுஷ்டானத்தைக்கண்டு உலகம் வியக்கிறது. அவர்களில், திருப்பதி பெரிய ஜீயர் ஆஸதானத்தை அலங்கரித்த 'ஸாது ராமானுஜாசார்யர்' என்று பூர்வாசிரமத்தில் அழைக்கப்பட்ட ஸ்வாமியும் ஒருவர்.

பெரியோர்களின் நியமனத்தாலும், ஆஸ்திகர்களின் பொருள் உதவியாலும் அடியேன் இந்த 22 பிரதிபலனங்கள் அடங்கிய 2-ம் பாகத்தை வெளியிடுவதில், அடியேனுடைய அறியாமையினுலும், மற்றும் பல குறைகளாலும் உள்ள குற்றங்களை நீக்கி, குணங்களைக்கொண்டு, இந்நூலின் பெருமையை உணர்ந்து ஸதனுஷ்டானங்களை அனைவரும் பின்பற்றி எம்பெருமானின் அருளுக்குப் பாத்திரமாகி உஜ்ஜீவிக்கவேணுமாய்ப் பிரார்த்திக்கிறேன்.

தாஸன்,

ஸ்ரீவைஷ்ணவ ஸ்ரீபாததூளி,

திருக்கண்ணபுரம் சௌரிராஜன்.



பதிப்புரை

ஸ்ரீ உ. வே. வித்வான் சௌரிராஜய்யங்கார் ஸ்வாமி— திருக்கண்ணபுரம் பாடசாலை வேத அத்யாபகர், கனபாடி, விக்ரமம் வெங்கடாச்சாரியருக்கும், அலர்மேல்மங்கை என்பவருக்கும் ஸீமந்தபுத்ரனாக விரோதிகிருது வருஷம், மாசி-மீ விசாக நக்ஷத்திரத்தில் (12—3—1912) அவதரித்தார் தம் திருத்தகப்பனாரிடம் க்ருஷ்ண யஜுர்வேதம் கநாந்தம் அத்யயனம்செய்து, பின்னர் மன்னார்குடி வேத பாடசாலையில் லக்ஷணமும் பயின்றார். சென்னை காகுமானி பாடசாலைமூலம் Entrance பரீட்சையில் தேறி, ஸ்ரீபெரும் பூதூர் உபயவேதாந்த வர்த்தினி காலேஜ்மூலம் நியாய சிரோமணி பட்டமும் பெற்றார். பின்னர் அந்தக் கல்லூரி யிலேயே ஆராய்ச்சியாளராகச் சேர்ந்து, **सुधास्वादिनी** என்ற நூலை வெளியிட்டார். இவ்வாராய்ச்சி செய்யும்பொழுதே ஷை கல்லூரி பிரின்ஸிபால் ஸ்ரீ உ. வே. வித்வான் ஆஸூரி பெரிய ராமானுஜாசாரியர் ஸ்வாமியிடம் ஸ்ரீபாஷ்ய காலக்ஷேபம் செய்தார்.

ஸ்வாமி மைசூர் ஸமஸ்தானம், புதுக்கோட்டை ஸமஸ்தானம், மன்னார்குடி அண்ணா ஸ்வாமி ஐயங்கார் வித்வத் ஸபை, திருப்பதி வெங்கடேச்வர வேதசாஸ்திர ஆகம வித்வத்ஸதஸ், மற்றும் வேதரக்ஷண நிதி ட்ரஸ்ட் ஆகிய வற்றின் சார்பாக நடக்கும் வேதபரீட்சைகளில் முதன்மை யாகத் தேறி, மிகச் சிறந்த ஸலக்ஷணகநாந வித்வானாக எல்லோராலும் கொண்டாடப்பட்டார். மன்னார்குடி, திருப்பதி, வேதரக்ஷண நிதி ட்ரஸ்ட் ஆகிய பரீக்ஷைகளில் பரீக்ஷகராகவும் பலகாலம் பணியாற்றினார். 1946 முதல் 1969 வரை, ஸ்ரீரங்கம் குவளகுடி சிங்கமய்யங்கார் பாட சாலையில் ஸாஹித்ய அத்யாபகராகவும், அத்யக்ஷராகவும் விளங்கி பல சிஷ்யர்களை Entrance மற்றும் பல பரீட்சை களுக்கும் தயார்செய்து அனுப்பியிருக்கிறார். 1946-லிருந்தே

ஸ்ரீரங்கநாதன் வேதபாராயண கைங்கரியத்திலும், உபந்யாஸங்கள் செய்வதிலும் ஈடுபட்டிருந்தார்.

கு. சி. பாடசாலையிலும், மற்றும் பல ஸபைகளிலும் அநேக புராணங்கள், ரஹஸ்ய கிரந்தங்கள் பற்றியும் உபய வேதாந்தங்கள் பற்றியும் பலமுறை உபந்யஸித்துள்ளார். 1956-58ல் ஸ்ரீ உ. வே. கோயில் அண்ணன் திருமாளிகையில் பகவத்விஷய காலக்ஷேபமும் 1959-60ல் ஸ்ரீ உ. வே. V. V. ஐயங்கார் ஸ்வாமி, நங்கவரம் வித்வான் ராகவாசாரியர் ஸ்வாமி ஆகிய இருவருக்கும் ஸ்ரீபாஷ்ய காலக்ஷேபமும் செய்து தலைக்கட்டியுள்ளார்.

ஸ்ரீஸ்வாமி, சுமார் 7, 8 ஆண்டுகளாக **सदनुष्ठानदर्शन** வெளியிடும் முயற்சியிலேயே ஈடுபட்டிருந்தார். கிரந்த கோசத்திலிருந்து நாகரலிபியில் எழுதி, பல பிரஸ்களின் மூலம் அச்சிட்டு முதல்பாகத்தை 1977-ல் வெளியிட்டு இரண்டாம்பாகத்தையும் முடிவுறும் தருவாய்க்குக் கொண்டு வந்தார். ஆனால், நம் துரத்ருஷ்டவசமாக, இரண்டாம் பாகத்தை, புத்தகரூபமாகப் பார்க்காமலேயே 27—5—1982 அன்று திருநாட்டுக்கு எழுந்தருளிவிட்டார். கடைசி 2 வருடங்கள் மிகுந்த நோய்வாய்ப்பட்டு இருந்தும், புத்தக வெளியீடு சம்பந்தமாகவே முயன்றுகொண்டிருந்தார்.

அவர் விட்டுப்போன இக்கைங்கரியத்தை ஸ்ரீவைஷ்ணவர்கள் அனைவருடைய ஆசீர்வாத திரவிய ஸஹாயத்துடன் அடியேன் நிறைவேற்றக் கடமைப்பட்டிருக்கிறேன். மஹநீயர்கள் அனைவரும் அடியேனுக்கு மனோதைரியத்தையும், மற்றும் இதர ஸஹாயங்களையும் அளிக்குமாறு பிரார்த்திக்கிறேன்.

தாஸன்,

ஸ்ரீவைஷ்ணவ ஸ்ரீபாததூளி,

T. V. S. ஜகந்நாதன்.

(ஸ்வாமி குமாரன்)

க்ருதஜ்ஞதா நிவேதனம்

ஸதனுஷ்டான தர்ப்பணம் க்ரந்தத்தின் இந்த இரண்டாம்பாகம் அச்சிட்டு வெளியிடுவதற்காக திரவிய ஸஹாயம் செய்த மஹநீயர்கள் பின்வருமாறு :—

1.	சுந்தரம் சாரிடீஸ், (ஸ்ரீ உ. வே. T. A. T. சாரியார் ஸ்வாமிமூலம்)	ரூ.	2000
2.	K. I. T. ராமானுஜாசாரியார் ஸ்வாமி, பாபட்லா.		800
3.	Prof. V. V. ராமானுஜ ஐயங்கார் ஸ்வாமி, (University of Madras)	...	500
4.	Advocate V. T. கோபால ஐயங்கார் ஸ்வாமி, திருவல்லிக்கேணி.	...	500
5.	ஸ்ரீமத் பரமஹம்ஸேத்யாதி எம்பார் ஜீயர் அப்பன் சடகோபராமானுஜாச்சாரியார் வர்ஷாராதன நினைவுக் கமிட்டி.	...	600
6.	காரைக்குடி பாத்திரக்கடை T. R. ராகவ ஐயங்கார் குமாரர் T. R. ஸ்ரீநிவாஸ ஐயங்காரும், R. ஸ்ரீநிவாஸனும்.	...	600
7.	R. வரதராஜ ஐயங்கார் ஸ்வாமி, பெங்களூர்.		500
8.	S. P. பார்த்தஸாரதி ஐயங்கார் ஸ்வாமி, சிதம்பரம்.		300
9.	திருநாங்கூர் P.B.K. ஸ்ரீநிவாஸாச்சாரியார்ஸ்வாமி,ஸ்ரீரங்கம்.		300
10.	Dr. M. S. ரங்காச்சாரியார் ஸ்வாமி, சென்னை.		200
11.	திருக்கண்ணபுரம் T. S. ராஜகோபால ஐயங்கார் ஸ்வாமி.		100

இவர்கள் அனைவருக்கும் அடியேனுடைய க்ருதஜ்ஞதையைத் தெரிவித்துக்கொள்கிறேன்.

மேலும் இப்புத்தகம் சென்னை பாரதி விஜயம்பிரஸ், லக்ஷ்மிவிஜயம் பிரஸ்களில் அச்சிடப்பட்டபொழுது கிரந்த கோசத்திலிருந்து எழுதிக் கொடுத்தும், புரூஃப் பார்த்தும் கொடுத்த ஸ்ரீ உ. வே. T. A. K. வெங்கடாச்சாரியர் ஸ்வாமி, Dr. M. S. ரங்காச்சாரியர் ஸ்வாமி, R. கோவிந்தய்யங்கார் ஸ்வாமி ஆகியோருக்கும் இந்நூலை அச்சிட்ட ஸ்ரீரங்கம் வாணிவிலாஸ் பிரஸ், சென்னை பாரதிவிஜயம் பிரஸ், லக்ஷ்மிவிஜயம் பிரஸ், மற்றும் திருச்சி புத்தூர் ஸ்ரீநிவாஸம் பிரஸ் ஆகியபிரஸ்களின் உரிமையாளர்களுக்கும் அடியேனுடைய ஆழ்ந்த க்ருதஜ்ஞதையைத் தெரிவித்துக்கொள்கிறேன்.

समर्पणम्

प्रपन्नश्रीवैष्णवैः अनुष्ठेयानि नित्यनैमित्तिककर्माणि श्रुति-स्मृति-इतिहास-पुराण-वचनैः, शिष्टाचारैश्च निष्कृष्य स्थापयन्तं इमं ग्रन्थं, सम्यक् परिशोध्य, मुद्रणाय अतीव प्रयासं कृत्वा, अस्य द्वितीयभागस्य प्रकाशनसमये इमां लीलाविभूतिं उत्सृज्य नित्यविभूतिं गतवतः, सलक्षणघनपाठिनः, उभयवेदान्ताचार्यस्य तिरुक्कण्णपुरं शौरिराजय्यङ्गार् स्वामिनः चरणारविन्दयोः अयं ग्रन्थः समर्प्यते ।

ஸமர்ப்பணம்

பிரபன்ன ஸ்ரீவைஷ்ணவர்கள் அனுஷ்டிக்கவேண்டிய நித்ய நைமித்திக கர்மாக்களை ஶ்ருதி ஸ்ம்ருதி இதிஹாஸ புராண வாக்கியங்களாலும், ஶிஷ்டாசாரங்களாலும் ஸ்தாபிக்கும் இந்த கிரந்தத்தை நன்கு பரிசோதித்து, பதிப்பித்து, இந்த இரண்டாவது பாகம் வெளிவரும் சமயத்தில், இந்த லீலாவிபூதியைவிட்டு நித்ய விபூதிக்கு எழுந்தருளிய ஸலக்ஷணகனபாடி, உபயவேதாந்தாசாரியர் திருக்கண்ணபுரம் சௌரிராஜய்யங்கார் ஸ்வாமியின் திருவடித்தாமரைகளில் இந்த கிரந்தம் ஸமர்ப்பிக்கப்படுகிறது.

கீர்த்திமூர்த்தி ஸ்ரீ உ. வே. ஸௌரிராஜய்யங்கார் ஸ்வாமி.

श्रीवेङ्कटार्यघनपाठिवरैकसूनुम श्रीतातवेङ्कटगुरूत्तमलब्धदास्यम् ।
अ.सूरिलक्ष्मणगुरूक्तसमस्तभाष्यम् श्रीशौरिराजघनपाठिवरं भजामः ॥

श्रीः

श्रियै नमः श्रीरस्तु

॥ सदनुष्ठानदर्पणे (गृहार्चायां घण्टानादवर्जनविषयो नाम) द्वादशप्रतिफलनम् ॥

प्रपन्नाः गृहे भगवदाराधनसमये घण्टानादं वर्जयन्ति। तदुपपन्नम् - वचनात् - शिष्टाचाराच्च तथाहि - संग्रहे—घण्टानादं तथा वाद्यं नृत्तगीतादिकान्यपि। गृहार्चने यः कुरुते रौरवं नरकं व्रजेदिति। हयग्रीवसंहितायां—"प्रपत्तौ नियतो विप्रः प्रत्यहं पद्मसंभव। गृहार्चनविधौ शंखं घण्टानादश्च वर्जयेदि" त्यादि।

न च वासिष्ठसंहितायां—

" आगमार्थन्तु देवानां गमनार्थन्तु रक्षसाम्।
कुरु घण्टारवं तत्र देवताह्वा (र्च) न लक्षणम्" इत्युक्तेः॥ संग्रहे।

" सर्ववाद्यमयी घण्टा केशवस्य सदा प्रिया।
वादनाल्लभते पुण्यं यज्ञकोटिशतोद्भवम्॥
सर्वेषामप्यलाभे तु शङ्खमेकं विशिष्यते।

शङ्खोदकं सदा पूतं अतिप्रियतमं हरेः" ॥ इत्युक्तेश्च शंखोदकसहित घण्टानादः आवश्यकः इति वाच्यम्,

वसन्ति किल दैवतान्यविरतं सतां सन्निधौ
पिशाचमुखदुर्ग्रहास्त्वपसरन्ति भीताः स्वयम्।
हरिर्द्रमिडसूरिसूक्त्यमृतपानबद्धादरः
तदत्र हरिपूजने परिहरन्ति घण्टाममी॥

सहैव तु सुरान्तरै रविकुमारदुर्गादिभिः
क्वचिद्वचनचोदिते सपरिवारगेहार्चने ।
नयैस्तु सदसद्विवेचनचणैः हराधिष्ठिता-
मिमामपि गुरूत्तमा नियमयन्ति घण्टाममी ॥

भूतबस्युपरि गीतवाद्ययुक्पूजनं तु गुरुमन्दिरैस्समम् ।
षंगिवंश्यमुखदेशिकोदितं संघसंगविरतस्य नोचितम् ॥ इति

देवतार्चनकाले दिव्यालये सर्वैरपि घण्टानादस्य प्रयुज्यमानत्वेन तत्र लोकनिन्दाविरहेऽपि; अर्थव्ययायासबाहुल्यविरहेऽपि बालानामपि घण्टानादस्याकर्षकत्वात् अयं भगवदाराधनं करोतीति प्रख्यापकत्वेन डंभार्थत्वाच्च, तत्र सर्वेषां रागप्राप्तिसत्वेऽपि घण्टायां ब्रह्माणमावाहयामि, नाळे रुद्रमावाहयामि इति घण्टायां देवतान्तराधिष्ठानस्य श्रीवैखानसादौ प्रतिपादितत्वात् ,

பெரிய திருமலை நம்பி इति द्रामिडनामक श्रीशैलपूर्णाचार्यविरचित आराधनकारिकायां घण्टाचालनानुक्तेः तच्छिष्यैः श्रीभाष्यकारैः तस्यापरिगृहीतत्वात् । श्रीनिगमान्तगुरुभिः श्रीपाञ्चरात्ररक्षायां नित्यव्याख्यानाधिकारे घण्टाचालनानुक्तेः । तत्प्रणीताराधनकारिकायां च घण्टानादरणात् । तत्कारिकायां तन्नामाङ्कनराहित्येन तदप्रणीतत्वशङ्कायां न्यासदशकेऽपि तन्नामाङ्कनराहित्येन तदप्रणीतत्वापातात् । अनन्तसंहितायां—

पञ्चसंस्कारयुक्तानां वैष्णवानां विशेषतः । गृहार्चनविधाने तु शंखं घण्टारवं त्यजेत् ॥ इति - गृहार्चने विशेषनिषेधाच्च प्रपन्नैः गृहे भगवदाराधनसमये घण्टाचालनं न कर्तव्यमेव । तथैवोक्तं सच्चरित्रपरित्राणे । पराशर भारद्वाज शाण्डिल्याद्युक्तेषु गृहार्चनकल्पेषु घण्टानादनं नोक्तम् । भागवते च एकादशस्कन्धे गृहार्चनकल्पे तन्नोक्तम् । भगवता भाष्यकृता नित्ये तन्नोक्तं, वत्साभिजनैः वरदगुरुभिः प्रणीतगृहाराधनकल्पे तन्नोक्तम् , स्मृतिरत्नाकरेऽपि

तन्त्रोक्तम् , अतस्तत्तत्कल्पविशेषेषु दिव्यालयगृहादौ घण्टानादनं तदभावश्चोपपन्नः। घण्टानादनाभावकल्पे भूताद्यपसर्पणन्तु,

उत्पतन्तु च भूता ये पृथिव्यन्तरवासिनः।
ये चात्र विघ्नकर्तारः ते नश्यन्त्वाज्ञया हरेः॥

इत्यादि मन्त्रपठनात् यागभूमिप्रोक्षणविशेषाच्च सिध्यति। यथाहि श्राद्धसमये आयसं घण्टानादञ्चेत्यादितः घण्टाविरहेऽपि अपहता असुरा रक्षांसि पिशाचा ये क्षयन्ति पृथिवीमनु" इत्यादि मन्त्रपठनेन प्रोक्षणेन च असुराद्यपसर्पणं सिध्यति तथैव भगवदाराधने घण्टाविरहकल्पेऽपि उक्तविधया भूतापसर्पणं सुलभम्। एतेन अनुक्तमन्यतो ग्राह्यमित्यनेन तत्प्रसञ्जनमपि प्रत्युक्तम्। प्रयोजनस्यान्यथासिद्ध्या तदपेक्षाविरहात्। किञ्च घण्टानादनकल्पेऽपि दक्षिणहस्तेन दीपादिदानसमये वामेन घण्टानादनं न युक्तम्। दक्षिणाचारेण कर्तव्यमिति कर्तव्यसामान्यस्य दक्षिणहस्तेन कर्तव्यनियमात्। नहि होमादिषु हविष्पात्रादेः वामेन ग्रहणवत् घण्टानादने तद्विधानमस्ति। अतः वामेन तन्नादनमयुक्तम्। किञ्च सङ्ग्रहे।

"उद्घाटने कवाटस्य प्रस्तुते पूजने तथा।
आवाहने च स्नपने पुष्पधूपे च दित्सिते॥
नीराजने यवनिकासमुद्धारे निवेदने।
होमे भूतबलौ कर्मण्युद्वाहे चालने मणेः॥
उत्सादनं पिशाचादेः प्रीणनञ्च हरेः परम्।
सन्निधानममर्त्यानां घण्टायाश्चालने भवेत्॥
असंस्कृतायाश्चालने ग्रामादेश्चालनं भवेत्।
निष्फला चापि पूजा स्यात् परस्य परमात्मनः॥ इति

असंस्कृतायाश्चालने च अनर्थप्रसंग उक्तः। असंस्कृताः अप्रतिष्ठिताः। अत्र च ग्रामार्चना लिङ्गभूयस्त्वात् घण्टानादनं आलयार्चनाविषयमित्यवगम्यते। निष्फलेत्यनेन च फलार्थपूजा विषयं घण्टानादनमिति लभ्यते। अतः अनन्यप्रजोजनाधिकारिणां गृहार्चने तदभावः उपपद्यते। घण्टाविरह कल्पे च गृहार्चनविधाने तु शंखं घण्टारवं त्यजेदिति निषेधेपि अनुकूलः यत्तु वंगीश्वरवचनं :—

घण्टानाथसनाथौ द्वौ धूपदीपौ निवेदयेत्।
तन्नादपहितावेतौ दुष्टसत्वनिबर्हणौ ॥

भगवत्प्रीतिजनकौ शृण्वतां पापनाशकौ। इति, तत्र पापनाशस्य फलस्योक्तेः तादृशफलाभिसंधिमदधिकार विषयत्वं स्पष्टम्। "अर्घ्य धूप प्रदीपेषु घण्टां भोज्ये निनादये"दिति भट्टपराशरपादवचनमपि अधिकारि पाकानुगुण आराधनकल्पाभिप्रायकमित्यनन्य प्रयोजन उत्तमाधिकारिणां तदप्रसंगः तर्हि अधिकारिपाकानुगुण मध्यमाधिकारि विषये भगवदाराधनकल्पः विस्तरेण उपदिष्टः। स्वयन्तु सङ्ग्रहेण स्वाधिकारानुगुणं भगवदाराधनमनुष्ठितमिति - पूर्व ग्रन्थेषुस्थितमिति अतः प्रपन्नैः गृहे भगवदाराधनसमये घण्टानादनं न कार्यमिति सिध्यति [द्ध] इति श्रीसदनुष्ठान दर्पणे गृहाराधने घण्टानादवर्जन विषयो नाम द्वादश प्रतिफलनम् ॥

॥ श्रीरस्तु ॥

॥ श्रीसदनुष्ठानदर्पणे त्रयोदशप्रतिफलनम् ॥

भक्तनिवेदित प्रसादादेः श्राद्धात्मकतदीयाराधनादौ विनियोगप्रकारविषये प्रमाणम्। प्रपन्नानां द्राविडवेदपारायणपूर्वक श्री शठकोपसूरि, श्रीरामानुज गुरुवर्य, श्रीरम्यजामातृमुनिवर्य प्रभृति भक्त निवेदित प्रसादादिना श्राद्धात्मक तदीयाराधनं कार्यम्। वचनात् शिष्टाचाराच्च। तथाहि श्रीगारुडपुराणे बिल्वारण्य माहात्म्ये दशमाध्याये।

आराधनानां सर्वेषां विष्णोराराधनं परम् ।
तस्मात्परतरं प्रोक्तं तदीयाराधनं नृप ॥ इति

स्मृतौ, विष्णोराराधनाच्चापि तदीयाराधनं परमिति श्रुतौ "यस्य देवे परा भक्तिः यथा देवे तथा गुरौ " इति उपनिषदि "आचार्य देवो भव" इति, "योवैस्वान्देवतामतियजते प्रस्वायैदेवतायैच्यवते न परां प्राप्नोति पापीयान् भवति इति" शंखस्मृतौ " विष्णुपूजां प्रकुर्वीत वैष्णवाराधनावधि ।

तच्छेषेणैव हविषा नित्यकर्मसमाचरेदिति" अत्र कर्मशब्दः प्राणाग्निहोत्र श्राद्धादिपरः संकोचक प्रमाणानुपलब्धेः भगवदाराधनादेः भक्ताराधनपर्यन्तत्वाभे प्रत्यवायः उक्तः भगवदाराधनादेः ।

अहमेव द्विजश्रेष्ठ नित्यं प्रच्छन्नविग्रहः ।
भगवद् भक्तरूपेण लोकान् रक्षामि सर्वदा ॥
ताननाहृत्यमोहेन मत्पूजां कर्तुमिच्छति ।

वृथा मदर्पणं ब्रह्मन् भस्मनीव हुतं हविः ॥ इति सन्मार्गदर्पणे तृतीयपरिच्छेदे । तच्चभगवदाराधनं :—

" नमे स्नानं बहुमतं तं विना कैकयी सुतम् ।
अनाहत सुतं गेही पुरुषं नाभिनन्दति ॥
तथानर्चित सद्भक्तं भगवान्नाभिनन्दति ।

रसान्भक्तस्य जिह्वायां अश्नामि " । इत्यादिभिः तदीयाराधनपर्यन्तमेव भगवत्तोषकरमवगम्यते । अतः "ज्ञानीत्यात्मैव मे मतं" इत्याद्युक्तरीत्या भगवतोपि धारकतया अभ्रियत । श्रीमदनन्तवैनतेयादिपर्यन्तमेव भगवन्निवेदितं पैतृकादिषु विनियोगमर्हति ननु "नमे स्नानं बहुमतं अनाहतं सुतं गेहीत्यादिभिः स्त्रीयाराधनपर्यन्तमेव स्वाराधनं प्रीतिकरं इत्येतावन्मात्रमव-

गम्यते नतु तदीयनिवेदितस्यापि । पैतृकादिषु विनियोग उच्यते—" रसान्भक्तस्य जिह्वायामश्नामी " त्युक्त्या पुरतो विन्यस्तस्य अन्नाद्यस्य रसान् भक्तरसनाग्रवर्त्येव भगवान् स्वीकरोतीत्यवगमात् भक्त निवेदनपर्यन्तमेव भगवन्निवेदितमिति निश्चीयते । तथा च भगवन्निवेदितस्यैव पैतृकादिषु विनियोगमभ्युपगच्छद्भिः तदीयनिवेदितस्यापि तत्रोपयोगः स्वीकृतो भवति, भक्त निवेदनाभावे भगवन्निवेदनपूर्त्यभावात् । न च कण्ठरवेण भक्तनिवेदितस्य वैश्वदेव श्राद्धादिषु विनियोजकवचनाभावः शङ्कनीयः—" विष्णवेकल्पितश्चान्नं दद्याद्भक्तेभ्य एव च ।

वैश्वदेवं ततः कुर्यात् श्राद्धकर्मादिकं तथा " ॥ इति वचनस्य जागरूकत्वात् अस्यार्थः—विष्णवे निवेदितं अन्नाद्यं भक्तेभ्यः प्रदाय भक्तशिष्टादेव वैश्वदेवादि कर्म कुर्यादिति अत्र ततः शब्देन भक्तशिष्ट ग्रहणौचित्यात्, तस्यैवाव्यवहित पूर्व प्रकृतत्वात् । न च ततश्शब्दस्य आनन्तर्ये प्रसिद्धि प्राचुर्यात् भक्त निवेदनानन्तर्यं वैश्वदेवस्य गम्यते तथाचायमर्थः—भगवदाराधनानन्तरं भक्तानाराध्य वैश्वदेवादिकं कुर्यादिति एवञ्च न भक्तशिष्टस्य वैश्वदेवादिषु विनियोगसिद्धिरिति वाच्यम् । किमिदं विष्णवे इत्यौशनस स्मृति वचनं, अन्नादेः भगवदाराधनादिषु विनियोगपौर्वापर्यमवगमयतीति, उत भगवदाराधनादीनां श्राद्धकर्मपर्यन्तानां क्रमविशेषं, अथ उभयमपीति विवेचनीयम् । अत्र च न तृतीयः, अर्थद्वय विधानलक्षण वाक्यभेदप्रसंगात् । न च द्वितीयः, " विष्णवे कल्पितश्चान्नं दद्याद् भक्तेभ्य एव चेति " भगवन्निवेदितस्य भक्तनिवेदना विधानानुपपत्तेः । तदाहि " विष्णुमाराध्य तद्भक्तान् समाराध्य विशेष विदिति वचनव्यक्तिरभविष्यत् । ततो द्रव्यविनियोग पौर्वापर्यावगमकमिदमवगम्यते । एवं श्लोकस्थ ततश्शब्दस्य भक्तशिष्टादित्यर्थो लक्ष्यते, न तु भक्ताराधनानन्तर्यं, वैश्वदेवादीनामिति सामान्याधिकारि विषयक उशनस्मृति वचनार्थ निरूपणपूर्वकं नित्यसूरि पराङ्कुशमुनिवर्यादि भक्तनिवेदित प्रसादादिना प्राणाग्निहोत्र पैतृकादीन्यनुष्ठेयानीति प्रतिपादितम् ।

तथैवोक्तं सच्चरित्रपरित्राणे च सुधी विलोचने :—"स्वल्पैरप्यन्नपानाद्यैः पादोदकविमिश्रितैः ।

भुक्तैर्भगवतासन्तं तोषयेत्पितृतृप्तये ॥

यः श्राद्धकाले हरिभुक्तशेषं ददाति भक्त्यापितृदेवतानां ।
तेनैव पिण्डश्च तिलैर्विमिश्रं आकल्पकोटीः पितरः सुतृप्ताः ॥

इति उशनाः—

विष्णवे कल्पितश्चान्नं दद्याद्भक्तेभ्य एव च ।
वैश्वदेवं ततः कुर्यात् श्राद्धकर्मादिकं तथा ॥ इति

शाण्डिल्य नारदादिभिः पितृभ्यः विष्णुनिवेदित दानस्मरणात् पूर्वं तदपूजने तद्दानायोगादिति । अत्र यथा भगवद्धरिविष्णुशब्दैः सामान्येनोक्तावपि तदवतारभूत रामकृष्णाद्यर्चामूर्ति निवेदितस्य श्राद्धेदानमुपपन्नम् । अपवादकाभावे सति उत्सर्गस्य त्यागायोगात् । पराङ्कुशादीनां भगवदवतारत्वं च अनेक प्रमाणसिद्धम् । तथाहि प्रपन्न धर्मसार समुच्चये ब्रह्माण्ड पुराणे इत्युपक्रम्य प्रथमाध्याये ब्रह्माणं प्रतिभगवान्—

द्वितीये तु परार्धेन्ते दिनेत्वाद्ये तु सप्तमे मन्वन्तरे वर्तमाने अष्टाविंशे चतुर्युगे ।

कलेरादौ जन्मयोगी शठकोप इति स्मृतः मद्भक्तोऽहं भविष्यामि नेतुं द्राविडतां श्रुतिं ॥ इत्यादि ब्रह्माण्ड पुराणे उत्तरखण्डे अशीतितमेऽध्याये मार्कण्डेयार्जुन तीर्थयात्रायां ताम्रपर्णीमाहात्म्ये—

विष्णोरंशांशसम्भूतो वेदवेदार्थ तत्ववित् ।
स्तोत्रं वेदमयं कर्तुं तत्र द्राविडभाषया ॥

जनिष्यति सतां श्रेष्ठो लोकानां हितकाम्यया । इत्यादि ।

नह्यवतारत्वेपि

धन्वन्तरिमुखाः केचिदमराः प्रख्यशक्तयः ।
मनुष्याकृतयो देवाः नोपास्यन्ते कदाचन ॥ इति

धन्वन्तरि प्रभृतीनां अर्चन प्रतिषेधवत् पराङ्कुशादीनामाराधनं प्रतिषिद्धं प्रत्युत तद्विधिरेव दृश्यते तथा च वैकुण्ठनाथीये नारायणसंहितायां :—

" मद्भक्तान् शठकोपादीन् पूजयेद्वैष्णवोत्तमः ।
मन्त्ररत्नविधानेन उपचारैश्च सर्वशः ॥ " इति ॥

विष्णुतत्वे :—

" शठारि परकालादि भक्तान् संपूजयेत् द्विजः वैष्णवांश्च विशेषेण मन्त्ररत्न विधानतः " इति शाण्डिल्य संहितायां :—

" शठकोपादि भक्तानां पूजांकुर्याद्विशेषतः " इति ।

वराहसंहितायां :—

शठारिपरकालादि भक्तानान्तु विशेषतः ।
मूर्त्ति प्रतिकृतिं कुर्यात् लोहशैल मृदादिभिः ॥

इत्यादीन्युदाहृतानि । अत्राप्युदाहरिष्यन्ते, वचनेषु भक्तशब्दाभ्यासश्च ।

विष्णवेकल्पितश्चान्नं दद्याद्भक्तेभ्य एव च ।

वैश्वदेवं ततः कुर्यात् श्राद्धकर्मादिकं तथे " त्यादौ शठकोपादीनामेव परामर्शार्थः । अत एवहि पराङ्कुशादीनां अभिनवदशावतारत्वं वेदान्ताचार्याणा मभिमतमिति प्रसिद्धम् । भाष्यकाराणाञ्च भगवदवतारत्वं तदभिमतम् । यथाहुः—" सामूर्तिर्मधुमथनस्य जयति त्र्यन्त संरक्षणी, काषायेण गृहीत पीतवसना दण्डैस्त्रिभिर्मण्डिता " इत्यादि । किञ्च ।

"यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः" इति पुरुषं प्रति विहितस्य अन्नस्य तत्कर्तृक श्राद्धीयदेवताः प्रत्यन्नत्वं विहितः—"भगवद्भुक्तशेषं यद्भुक्तं भागवतेनयत्। तदेव भोज्यमुद्दिष्टं भगवद्यागसेविभिः" इति विशिष्टाधिकारिणः भगवद्भागवत भुक्तान्नभोजन नियमः उक्तः। तथा च भागवतभुक्तान्नस्य श्राद्धीय देवतार्थं ब्राह्मणेभ्यः दानस्य "यदन्नः" इत्यादि वचनाभिप्रेतत्वात् पराङ्कुशादि निवेदितस्य श्राद्धे दानं युक्तम्॥

न च जीवद्भक्ताचार्य भुक्तशिष्टान्नेनापि श्राद्धकरणं शङ्क्यं, तेषामपि पित्र्यर्थे वरणसंभवेनादोषात्। यथोक्तं शाण्डिल्येन

"यथार्हञ्च यथाशक्ति संविभज्यान्नमम्बु च।
दद्यात् पितॄन् समुद्दिश्य भगवद् ज्ञानयोगिन" इत्यादि।

भरद्वाजेन च:—"अपदिश्य पितॄन् देवान् गुरौ यत्प्रतिपाद्यते। देशकाल क्रिया मन्त्र निरपेक्षं तदक्षय"मित्यादिकमुक्त्वंतम्। किञ्च विशिष्टाधिकारि विषये नित्यनैमित्तिककर्मसमवेत मन्त्राणां अन्तर्यामिमात्रविषयत्वं, अव्यवधानेन भगवत्परत्वं वाऽऽश्रित्य पारमैकान्त्यमाचार्यैः निर्व्यूढं। तत्र च प्राणाहुत्यादौ प्राणादिशब्दानां भगवत्परत्वं जुहुयात्, "प्रणवेनाग्नौ विष्णौ प्राणादि संज्ञक" इति शाण्डिल्य वचनसिद्धम्। एवञ्च लक्ष्मीप्रभृति भाष्यकारान्त भागवत निवेदितान्नेन प्राणाद्यात्मक भगवद्दैवत्य प्राणाहुतिवत् तेन पितृदेवताशब्दविषय भगवद्दैवत्य श्राद्धकरणमुपपन्नम्। "विष्णवेकल्पितञ्चान्नं" इति वचनं सुधीविलोचने उदाहृतमिति तत्रापि परांकुशादि निवेदितेन श्राद्धकरणमभिप्रेते।

"विष्णवेकल्पितञ्चान्नं दद्याद्भक्तेभ्य एव च। वैश्वदेवं ततः कुर्यात् श्राद्धकर्मादिकं तथा"। इति वचनस्यायमर्थः विष्णव इत्येतत्समभिव्याहारात्, भक्तेभ्य इत्येतत् विष्णुवदर्चारूप पराङ्कुशादि भक्तपरः। एवकारश्च

पूर्वोदाहृत नारायणादि संहितामूलक नित्याराध्यत्व प्रसिद्धिं द्योतयति इति तच्छब्दः अव्यवहित पूर्ववाक्य प्रकृताकारविशिष्टपरामर्शकः। तथा च अर्चात्मना अवस्थिताय भगवते निवेदितमन्नं अर्चात्मनाऽवस्थितेभ्यः नित्याराध्यतया शास्त्रप्रसिद्धेभ्यः परांकुशादिभ्यः निवेदयेत्। तेभ्यो निवेदितेन तेनान्नेन श्राद्धकरणपूर्वकं वैश्वदेवं कुर्यादिति वचनान्तरवशात् पाठक्रमभङ्गेन वैश्वदेवस्य श्राद्धानन्तर्यं कल्प्यम्, श्राद्धकर्म आदिः यस्य तदिति वैश्वदेव विशेषणत्वेन श्राद्धकर्मणः प्राथम्यं सिद्धम्। वैश्वदेव शब्दो वा श्राद्धीय विश्वेदेव ब्राह्मण-भोजनपरः भगवन्निवेदितान्नस्य एकदेशं भक्तेभ्यो दद्यात् एकदेशान्तरेण च श्राद्धादिकं कुर्यादित्यर्थस्तु कल्पितान्नशब्दयोः लक्षणाप्रसङ्गेन तच्छब्दस्य शब्दसन्निधावपि अव्यवहित पूर्वपरामर्शभङ्ग प्रसङ्गेन दद्याद्भक्तेभ्य इत्यस्य प्रकृतान्वयासामञ्जस्य प्रसङ्गेन च न सम्भवति। अतः यथोक्त एवार्थः, अतः पराङ्कुशादि निवेदितेन श्राद्धकरणमुपपन्नम्, शिष्टाचारश्च भूरिशः दृश्यते, एवञ्च केषाञ्चिद्वैष्णवानां श्राद्धदेयस्य पराङ्कुशाद्यनिवेदनं अन्यस्य तदानीन्तनेभ्यः निवेदनञ्चामूलकमिति सिद्धमिति॥

ननु श्राद्धादिसमये निमन्त्रित ब्राह्मण भोक्तव्यस्यान्नस्य शठकोपमुन्यादि भक्तनिवेदने सति मनुष्यान्तरशेषत्वापत्त्या तद्दिने द्राविडवेदपारायणे प्राकृत भाषा प्रसंग दोषापत्त्या भक्तनिवेदन द्राविड सेवादिकं न कर्तव्यमिति चेन्नः— भार्गवपुराणे उत्तरखण्डे नरनारायण संवादे महायोगि माहात्म्ये एकोनचत्वारिंशाध्याये नारायणः:—

कासारयोगिनं भूतनामानं महदाह्वयम्।
भक्तिसारञ्च योगीन्द्रं शठकोपमुनीश्वरम्॥
मुनिं मधुरकव्याख्यं कुलशेखरयोगिनम्।
मुनिवाहनयोगीन्द्रं भक्तपादरजोभिधम्॥

श्रीविष्णुचित्तं योगीशं परकालमुनीश्वरम् ।
त्रिदण्डमण्डितकरं रामानुजयतीश्वरम् ॥

द्वादशैतान्महाभागान् महाभागवतोत्तमान् ।
आराधय सदा भक्त्या कृत्वा मृण्मयविग्रहान् ॥

एते द्वादशलोकेऽस्मिन महाभागवतोत्तमाः ।
ममातीव प्रियतमा मम प्राणसमाहिताः ॥

ब्रह्मरुद्रादि देवेभ्यः सनकादिभ्य एव च ।
सर्वब्रह्मर्षि मुख्येभ्यः योगिभ्यस्तेऽधिकाभुवि ॥

किं भाषणेन बहुना शृणुवक्ष्यामि सुव्रत ।
मत्त एवाधिका लोके श्रीभूमिभ्यां मम प्रियाः ॥

मत्पूजायाः परं तेषां पूजा सद्योपवर्गदा ।
आराधयन्ति ये लोके एतान्भागवतोत्तमान् ॥

ते प्राप्नुवन्ति परमंपदं दुर्लभमच्युतम् ।
न कर्म नहि मे भक्तिः न योगोज्ञानमुत्तमम् ॥

तेषामाराधनादेव मुक्तिं यान्ति नराः पराम् ।

इत्यादिभि : पराङ्कुश परकालादीनां ब्रह्मरुद्रपित्रादि देवेभ्यः अधिकत्व प्रतिपादनपूर्वकं तदाराधन निवेदनादेः मुख्यत्व प्रतिपादनात् ॥ स्मृत्यर्थसारसङ्ग्रहे :—"उत्सवादौ द्विजातीनां आशौचान्ते विशेषतः । अध्येतव्यं द्रामिडीय गाथा चतुः सहस्रक"मिति श्राद्धादौ सर्व दिव्य-प्रबन्धानां अनुसन्धेयत्वोक्तेः वैनतेयद्रामिडब्रह्मोपनिषदि वैष्णवैर्वैष्णवस्थानेष्व-ध्येतव्या, प्राकृतधर्मविहीनैः अप्राकृतव्यवस्थावद्भिः मदत्रयवर्जितैः ग्रामकुला-दिव्यपदेशहीनैः सात्त्विकैर्मोक्षैकपरैः शुभादावभ्युदयार्थिभिः आशौचान्ते मोक्षा-र्थिभिरिति । ब्रह्माण्डपुराणे "वृद्धावादौ क्षयेचान्ते द्राबिडब्रह्मसंहिता ।

अध्येतव्या द्विजैः श्रेष्ठैराद्या गीतासहस्रकी "ति, तत्रैव गीतामाहात्म्यनामक षोडशाध्याये :—

सहस्रशाखाध्ययनं विनाकर्म शुभाशुभम् ।
यः कुर्यात्सदुराचारः शूद्र एव न संशयः ॥
तस्मात् शुभाशुभे विप्र विशेषेण तु वैदिके ।
सहस्र शाखाध्ययनं कारयेद्विज पुङ्गवैः ॥

इत्यादिभिः श्राद्धकालेऽपि द्राविडवेदपारायण कर्तव्यस्य च प्रतिपादनात् ॥ वासर्व श्रीवैष्णवानां तदीयाराधने पुरुषपाक एव । अत्रेदं अवधेयम् । सर्व श्रीवैष्णवानां तदीयाराधने पुरुषपाक एव कर्तव्यः सर्वश्रीवैष्णवानां उपयोगयोग्यत्वात् । यद्यपि वासिष्ठसंहितायां द्वितीयाध्याये ॥

" आहृतं पाचयेत्पत्नी पञ्चसंस्कार तत्परा ।
पञ्चसंस्काररहिता पाकं यत्नेनवर्जयेत् ॥
तया कृतन्तु यच्चान्नं अनिवेद्यं सदा हरेः ।
निवेदयेच्च यो मोहात् स पाषण्डी भवेत्सदा ॥
स्नात्वा शुद्धाम्बर धरा हरिद्रालेपनावृता । "

इति स्त्रीणां स्नानपूर्वक पाकाधिकारः उक्तः, तथापि तत्कृतपक्वान्ना-दीनां स्वेष्टबन्धुमात्रार्हत्वेन सर्वश्रीवैष्णवभोजनार्हत्वाभावात्—नात्र पुरुषस्य पाकानधिकारशङ्कावकाशः आपस्तम्बेन " आर्याः प्रयता वैश्वदेवान्नसंस्कार कर्तारःस्युः " इति सामान्याधिकारि कर्तव्य वैश्वदेव विषयेपि पुरुषाणामन्न संस्कर्तृत्वस्य प्रतिपादितत्वात् क्वचित्कोशेषु वैश्वदेवशब्दो न दृश्यते पराशर-संहितायां विशिष्टपरमधर्मशास्त्रे द्वितीयाध्याये पञ्चसंस्कारममलमेतत्कृत्वा तदागुरुः नित्यनैमित्तिके सम्यक् पश्चात्तद्वद्गुमुत्तमं । नियोजयेत् प्रपन्नश्च पङ्क्तिपाकादि कर्मसु ॥ इति पुरुष कर्तृक पाकस्यैव मुख्यत्व प्रतिपादनात्, तथैव शिष्टाचाराच्च ।

ताम्रसौवर्ण रजतादि पात्राणां शुद्धिप्रकारः ।

ताम्रपात्राणां आम्लोदकैः शुद्धिः कर्तव्या, सौवर्णपात्राणां शुद्धजलोदकैः शुद्धिः, राजतपात्राणां गोमयोदकैः शुद्धिः, कांस्यपात्राणां पञ्चगव्य भस्मोदकैः शुद्धिः, आयस पात्राणां गोमयोदकैः शुद्धिः, सर्वत्र तुलसी-मृद्वा अश्वत्थ मृद्वा तटाकादौ जानुदघ्न जलात्परस्य मृद्वा ग्राह्या । एतेषां पात्राणां अशुद्धितारतम्ये द्विवारं चतुर्वारं द्वादशवारं द्वात्रिंशद्वारं समन्त्रकं शुद्ध्यावृत्तिः बोध्या । शिष्टाः, द्वयेन द्विवारं, नमोन्तैः, वासुदेवादि चतुर्नामभिः चतुर्वारं नमोन्तै केशवादि द्वादशनामाभिः द्वादशवारं नमोन्तैः केशवादि द्वादशना-मभिः, नमोन्तैः वासुदेवादि चतुर्नामभिः, वाक्यगुरुपरम्परा मूलमंत्रद्वयमन्त्रैः षोडशाभिः द्वात्रिंशद्वारं, ताम्र पैत्तलादि पात्राणि आम्लजलादिभिः शोधयन्ति, तदुपपन्नमेव । "ततोर्घ्यादीनि पात्राणि मूलमन्त्रेण शोधयेदिति" वासिष्ठ संहितायामुक्तम् । अस्मिन्वचने मूलमन्त्रग्रहणं गुरुपरंपरापूर्वकद्वयाद्युपलक्षणम् । सच्चरित्रपरित्राणे "मूलमन्त्रेण मन्त्रयेदिति" वासिष्ठवचनं द्वयस्याप्युपलक्षणं इत्यभिप्रायेण द्वयेनैवेति । सर्वत्राप्येवं मूलमन्त्रोक्तिस्थले द्वयं द्रष्टव्यमिति, तत्रैव गुरुपरम्परा पूर्वकत्वन्तु नियतमिति । अत एव गुरुपरम्परारहित मन्त्ररत्नं मन्त्रान्तरतुल्यमित्याचार्या अभिदधुः इति ॥

श्रीवचनभूषणे जप्तव्यं गुरुपरम्परैयुम् द्वयमुमिति । आदौ गुरूणां विज्ञानं मन्त्ररत्नार्थचिन्तनमिति । श्रीमद्वरवरमुनिवर्य प्रणीत संस्कृताराधन कारिकायां "पात्राणि पञ्चोद्धरण्या प्रक्षाल्योत्तरवाक्यतः" इत्याद्युक्तेः । तत्र भगवदाराधनयोग्य ताम्रादिपात्राणां शुद्ध्यर्थं मन्त्रस्योक्तत्वेन तन्न्यायेन आराध-नार्थं हविः पात्रादीनां शुद्ध्यर्थं तादृश मन्त्रग्रहणं युक्तमेव । दारुपात्राणां अश्मपात्राणाञ्च शुद्धजलैः शुद्धिः, वेणुविदलादिकृत पात्राणां शुद्धजलैः शुद्धिः पण्यवस्तूनां आतपशोषण प्रोक्षणादिभिः शुद्धिः, उच्छिष्ट मूत्रादि स्पर्शे कांस्य त्रपुसीसादि पात्राणां त्रिरात्रं दशरात्रं वा सगोमूत्रं भूमौ निक्षिप्य तत उद्धृत्य

यथासंभवं पूर्वोक्तशुद्धिः दारुपात्राणां उच्छिष्टादि स्पर्शे तक्षणात् गोमूत्रगोमयैः शुद्धिः वेणुविदळन पात्राणां शूर्पादीनां उच्छिष्टादिस्पर्शे गोमयोदकैः शुद्धिः । अमेध्याद्यत्यन्तोपहितौ एतेषां त्याग एव इत्थं शिष्टाचार व्यवस्था ॥

श्रुतौ "यान्यस्माकं सुचरितानि । तानि त्वयोपास्यानि । नो इतराणि । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः" इति । आपस्तम्बधर्मे "धर्मज्ञ समयः प्रमाण" मिति, स्मृत्यन्तरे शिष्टाचारः स्मृतिः वेदः त्रिविधं धर्मलक्षणं । सुमंतुवचने "सगरीयान् महाबाहो सर्वशास्त्रोदितादपि" इति शिष्टाचारस्यैव व्यवस्थापकत्व प्रतिपादनात् शुद्ध्यादौ सर्वत्र सत्संप्रदाय प्राप्तमवगन्तव्यम् । शुद्ध्यादौ प्रमाणं मनुस्मृतौ पञ्चमाध्याये :—

मृत्तोयैः शुद्ध्यते शोध्यं नदी वेगेन शुध्यति ।
नानाविधानां द्रव्याणां शुद्धेः शृणुत निर्णयम् ॥

तैजसानां मणीनाञ्च सर्वस्याश्ममयस्य च ।
भस्मनाद्भिः मृदा चैव शुद्धिरुक्ता मनीषिभिः" ॥ इति

तैजसानां सुवर्णादीनां मरकतमणीनां, पाषाणमयस्य अशुद्धस्पर्शे भस्मना, जलेन, मृत्तिकया च शुद्ध्यतीत्यर्थः । बृहस्पतिः अंभसा हेमरौप्यायः कांस्यं शुध्यति भस्मना । आम्लैः ताम्रञ्च पुनः पाकेन मृण्मयम्" ॥ इति । मृण्मयं मृत्पात्रमित्यर्थः ।

मनु :—"ताम्रायः कांस्य रैत्यानां त्रपुणः सीसकस्य च । शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिः" इति । क्षारं भस्मादि, अयः लोहं, रीतिः पित्तलं तद्भवं पात्रं रैत्यं त्रपुरङ्गं एषां भस्म आम्लोदकैः शोधनं कर्तव्यम् । यथार्हं यस्य यदर्हति तेन तच्छोधनं कर्तव्यमित्यर्थः अंभसा हेमेति बृहस्पति वचनात् विशेषो बोद्धव्यः इति कुल्लूकभट्टीय व्याख्या ॥

याज्ञवल्क्यस्मृतौ आचारकाण्डे :—

" त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः। भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावो द्रवस्य तु " इति द्रवस्य घृतादेः प्रस्थप्रमाणाधिकस्य श्वकाकाद्युपहतस्य प्लावः प्लावनं समानजातीयेन द्रवद्रव्येण भाण्डस्यापूरणं यावन्निस्सरणं शुद्धिरित्यनुवर्तते। ततोऽल्पस्य त्यागः, बहुत्वं अल्पत्वञ्च देशाद्यपेक्षया वेदितव्यम्। यथाह बोधायनः—

देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं।
उपपत्तिमवस्थाञ्च ज्ञात्वाशौचं प्रकल्पयेत्।

इति यदातु उपघातातिशयः तदा आम्लोदकानामावृत्तिः।

गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च।
शुद्ध्यन्ति दशभिः क्षारैः श्वकाकोपहतानि च॥
पराशर स्मरणादिति विज्ञानीयेश्वर व्याख्या॥

बोधायनः—तैजसानां पात्राणां उच्छिष्टोपहतानां त्रिः सप्तकृत्वः परिमार्जनम्। तथा मूत्रपुरीष लोहितरेतः प्रभृत्युपहतानां पुनः करणमिति। तत्र पुनः करणं चिरन्तनलेप विषयं द्रष्टव्यमिति माधवीयव्याख्या। तत्रैवाङ्गिराः—

गण्डूषं पादशौचञ्च न कुर्यात्कांस्य भाजने।
षण्मासं भुविनिक्षिप्य पुनराकारमादिशेत्॥ इति।

उशना अपि:—सुवर्ण रजत ताम्र त्रपु सीस कांस्यानां अद्भिरेव भस्मसंयुक्ताभिः मणिमयानां अद्भिरेव मृत्संयुक्ताभिः तैजसानां भस्मना त्रिः प्रक्षालनम्, कनक रजत मणि शङ्ख शुक्त्युपलानां वज्रविदलन रज्जु चर्मणाञ्चाद्भिः शौचमिति। विष्णुः—" विण्मूत्ररेतः शवलिप्तरक्तमावर्तनोल्लेखन तापनाद्यैः त्रिः सप्तकृत्वः परिमार्जनैः वा भस्माम्बुना शुध्यति तैजसानां" इति। एतेषां सर्वेषां यथायोगं चिर क्षिप्र संलेप भेदेन व्यवस्था द्रष्टव्या इति शङ्खः।

मांसरुधिरोपहतानां मृदरी कंगुद बिल्व सर्षपकल्प गोमूत्र भस्म गोमयानि शौचद्रव्याणीति । कांस्यन्तु पञ्चगव्येनेत्यन्यत्र भगवच्छास्त्रे ।

" पाकस्थानेषु यत्पात्रं बहिः स्यान्नकदाचन ।

कदाचिदपि निर्गच्छेत् होमः शान्तिः यथाक्रमम् ॥

द्वात्रिंशत् शुद्धयते पात्रं पञ्चगव्येन शोधयेत् । " इति ।

अत्र कांस्यपात्रादीनां पञ्चगव्य भस्ममृज्जलैः द्वात्रिंशत् शुद्धिरुक्ता याज्ञवल्क्य स्मृतावाचारकाण्डे :—

" तक्षणं दारुशृङ्गास्थ्नां गोवालैः फल संभुवां " इति । अत्र विज्ञानेश्वरीय व्याख्या - सलेपानां शुद्धिमाह—तक्षणमिति । दारूणां उच्छिष्टस्नेहादि लिप्तानां मृद्भस्मोदकादिभिः, अनपगतलेपानां यावन्नापैति अमेध्यात्को गन्धो लेपश्च तत्कृतः तावन्मृद्वारिवोदयं सर्वासु द्रव्यशुद्धिष्विति सामान्य शुद्धि विधानात्—तक्षणं तावन्मात्रावयवापनयं शुद्धिः फलसंभुवां बिल्व-अलाबु नारिकेलादि संभूतानां पात्राणां गोवालैः उत्कर्षणात् शुद्धिः । इदानीं सलेपानामेव केषाञ्चित् लेपापकर्षण विशेषहेतूनाह :—

" सोषैरुदकगोमूत्रैः शुध्यत्याविककौशिके ।

सश्रीफलैरंशुपट्टं सारिष्टैः कुतपं तथे"ति ॥

ऊषरमृत्तिका सहितेन गोमूत्रेण उदकेन वा लेपापेक्षया ऊर्णामयं कौशिकं कोशभवं सरीपट्टादि प्रक्षलितं शुद्धयति । उदकगोमूत्रैरिति बहुवचनं पश्चादुदक प्राप्त्यर्थम् । अंशुपट्टं वल्कलतन्तुकृतं सश्रीफलैः बिल्वफलसहितैः, कुतपः पार्वतीयछागरोमनिर्मितः कम्बलः अरिष्टफलसहितैः फेनकसहितैः उदक गोमूत्रैः शुद्धयतीत्यनुवर्तते । एतच्च उच्छिष्टस्नेहादि योगे सति वेदितव्यम् । अल्पोपघाते तु प्रोक्षणादिः क्षालनासहत्वात् सर्वत्र द्रव्याविनाशेनैव शुद्धेरिष्टत्वात् । तथाच देवल :—

और्ण कौशेय कुतप पट्टक्षौम दुकूलकाः ।
धान्य कल्केस्तु फलजैः रसैः क्षारानुगैरपी'' ति ॥

क्षौमवदेव शाणस्य समानयोनित्वात् और्णादिग्रहणं तदारभ्य तूलिकादि प्राप्तयर्थम् । अल्पोपघाते नैव क्षालनं कर्तव्यं । अमेध्यादन्यत्र :—

" तूलिकामुपधानञ्च पुष्परक्ताम्बरन्तथा ।
शोषयित्वातपे किञ्चित् करैः संमार्जयेन्मुहुः ॥
पश्चाच्च वारिणा प्रोक्ष्य विनियुञ्जीत कर्मणि ।
तान्यप्यतिमलिष्ठानि यथावत्परिशोधये''दिति ।

देवलस्मरणात् पुष्परक्तानि कुङ्कुमकुसुमादिरक्तानि पुष्परक्तग्रहणं अन्यस्यापि हरिद्रारक्तस्य क्षालनासहस्य प्राप्तयर्थम्, न माञ्जिष्ठादेः, तस्य क्षालनसहत्वात् । शङ्खेनाप्युक्तम् :—

" रागद्रव्याणि प्रोक्षितानि शुचीनीति " इति ॥

पराशरस्मृतौ सप्तमाध्याये :—

मुञ्जोपस्करशूर्पाणां शाणस्य फलचर्मणाम् ।
तृणकाष्ठस्य रज्जूणां उदकाभ्युक्षणं मतं " इति ॥

अत्र माधवीय व्याख्याः—मुञ्जादीनां वेण्वादिवत् शुद्धिमाह - मुञ्जेति । मुंजो रशनादि प्रकृति भूतः तृणविशेषः, तेन संपादितो विष्टरादि उपस्करः । यद्यपि पूर्व-वचने वेणुविकाराणां कटव्यजनादीनां प्रोक्षणस्योक्तत्वात् तेनैव शूर्पशुद्धिरभि-हिता । तथापि तण्डुलफलीकरणादौ तल्लेपस्य लग्नत्वात् शुद्धयन्तराशङ्का भवति । तन्माभूदिति पुनर्ग्रहणम् । शाणः, गोण्यादिहेतु वल्कलविशेषः, तेन तद्विकाराः सर्वे विवक्षिताः । फलं आम्लादिः, चर्म कृष्णाजिनादि तृणञ्च काष्ठञ्च तृणकाष्ठं, रज्जवः प्रसिद्धाः, अत्र फलशब्देन शाकमूलादीन्युपलक्ष्यन्ते ।

प्रोक्षणं प्रक्षालनं च तदुभयं यथायोग्यं द्रष्टव्यमिति । स्मृति रत्नाकरे तैजसानामुच्छिष्टानां गोशकृन्मृद्भस्मभिः परिमार्जनं अन्यतमेनवेति । कीटाद्युपहतस्य तु उत्प्लवनमेव । यथाहमनुः—

"द्रव्याणाञ्चैव सर्वेषां शुद्धिरुत्प्लवनं स्मृतम् ।" उत्प्लवनञ्च वस्त्रान्तरितपात्रे प्रक्षेपः अन्यथा कीटाद्युपगमस्यासंभवात् । शूद्रभाण्डस्थितास्तु मधुदधिपयस्तद्विकाराश्च पात्रान्तरानयनेन शुद्धा इति गौतमस्मरणात् पात्रान्तरापनयनात् शुद्धिः मधुघृतादेः वर्णापशदहस्तात्प्राप्तस्य पात्रान्तरानयनं पुनः प्लवनञ्च कार्यमिति च प्रमाण संग्रहे पात्र शुद्धि प्रमाणानि :—

प्रपन्नानां मुमुक्षूणां पात्राणां शुद्धिरिष्यते ।
पाषण्ड पतितैर्नीचैः पात्रस्पर्शापनुत्तये ।
पुण्डरीकाक्षमन्त्रेण द्वत्रिंशत् शुद्धिरिष्यते ॥
सर्वेषामेव पात्रणां शुद्धिः द्वादशसंख्यया ।
सलेपेत्वग्निना शुद्धिः ततो मन्त्रेण शुद्ध्यति ॥
मन्त्रतश्शुद्धिमाप्नोति केशवादित्रिवारतः ।
स्वर्णरौप्यादिपात्रणां उच्छिष्टस्पर्शनेयदि ॥
केशवादि त्रिवारेण शुद्धिरुक्तामनीषिभिः ।
कांस्यताम्रारकूटानां तत्तद्द्रव्येण शुद्ध्यति ॥
द्वयेन मन्त्ररत्नेन पुण्डरीकाक्षमन्त्रतः ।
द्वात्रिंशत् संख्ययाचापि शुद्धिरुक्तामनीषिभिः ॥
नित्यञ्च यज्ञपात्राणां द्वयेन प्रणवेन वा ।
मूलमन्त्रेण वा कुर्यात् द्वात्रिंशत् शुद्धिरिष्यते इति ।

उच्छिष्टपात्रपुनः शुद्धिप्रमाणं :—

उच्छिष्टं चालयित्वाथ गोमयाद्भिर्विलेपयेत् ।
ततो द्भिर्गोमयैः शुद्ध्येत् द्वितीया शुद्धिरिष्यते ॥

इति । ईश्वरसंहितायां मानसपूजाविधिनामक द्वितीयाध्याये नारदः—

विनीतान् शिष्यपुत्रादीन् स्नातानाज्ञापयेत्ततः ।
पात्रशुद्धिं च तैरेवकारयेत् द्विजसत्तमाः ॥
आम्रकल्केन तोयेन हैमं ताम्रञ्च शोधयेत् ।
राजतं गृह्धूमेन शान्ताङ्गारेण वा पुनः ॥
भस्ममिश्रेण तोयेन लोहयुक्तं विशोधयेत् ।
शङ्खशुक्तिमयानाञ्च लवणेनविशोधयेत् ॥
फलपत्रमयानाञ्च मृद्भिरद्भिश्च शोधयेत् ।
लेपगन्धापनोदेन शुद्धिर्भवति कारयेत् ॥
द्रव्यशुद्धिर्भवत्येव यथावद्विधिचोदिता इति ।

शाण्डिल्यस्मृतौ :—

अपर्युषितलिप्तेषु तापितेष्वातपाग्निभिः ।
मृण्मयेषु च पात्रेषु पचेयुः क्षालितेषु च ॥
मृण्मयेषु नवेष्वेव शक्तश्चेत् पाचयेद्धविः ।
पक्षादूर्ध्वं न कर्तव्यं मृण्मयेपचन क्रिया ।
भिन्नानि विकलाङ्गानि विकटानि तथैव च ॥
शर्करास्थि समेतानि भाण्डानि परिवर्जयेत् ।
पक्षादूर्ध्वं न सङ्ग्राह्यं मुद्गसारं घृतं तथा ॥
ताम्बूलंतण्डुलश्चैव मासादूर्ध्वं न सञ्चयेदिति ॥

अत्र मुख्यभेदेन मृत्पात्र शुद्धयादिरुक्ता । मुख्यपक्षे प्रत्यहं नूतन-मृत्पात्रग्रहणमुक्तं पराशर संहितायां :—

महानसस्थलादींश्च गोमयेनानुलिप्य च ।
प्रत्यहं नूतनं भाण्डं मृण्मयन्तु समाहरेदिति ॥

प्रत्यहं विष्णुपूजार्थे द्विजानां मुक्तिसिद्धये ।
प्रत्यहं ताम्रपात्रे वै मृण्मयं नूतनन्तु वा ॥
अन्तर्बहिर्विशोध्याथ तत्तद्द्रव्येण लोहजान् ॥ इति ॥

भगवदाराधन भक्ताराधनयोः द्राविडवेदमन्त्रग्रहणे प्रमाणम् ॥ याज्ञवल्क्य द्रामिड ब्रह्मोपनिषदि - सहस्रशाखां भगवद्यजनादि माङ्गल्ये श्राद्धे च वैष्णवो गायेदिति । वैनतेयद्रामिड ब्रह्मोपनिषदि—सन्निधौ नारायणस्य सम्यगनुसन्धेया तदाराधन काले इति ॥ ब्रह्मकैवर्तपुराणे :—

" द्रामिडोपनिषद्गाथा वाक्येनाष्टाक्षरेणवा ।
पुंसूक्तेन च वा कार्यं देवताराधनं द्विजैरि"ति ॥

अत्र चकारः पुरुषसूक्तस्य अष्टाक्षरस्यापि प्रत्येकं द्रामिड श्रुतिवाक्येन समं समुच्चयं प्रतिपादयति । वाकारौ द्राविडश्रुतिवाक्यसमुच्चितस्य अष्टाक्षरस्य तथाविधपुरुषसूक्तस्यापि विकल्पं प्रतिपादयतः । अतः केवलाष्टाक्षरादिभिराराधन निषेधः फलितः । सच्चरित्रपरित्राणे द्रमिडोपनिषत्तात्पर्यरत्नावल्यां :— " भाषागीतिः प्रशस्ता भगवति वचनात् राजवच्चोपचारात् साचागस्त्यप्रसूतात्रिति परिजगृहे भूमिकाभेदयोग्या । यत्तत्कृत्स्नं श्रुतीनां मुनिगणविहितैः सेतिहासैः पुराणैः तत्रासौ सत्वसीम्नः शठमथनमुनेः संहिता सार्वभौमी ॥" इति वेदान्ताचार्योक्त्या शठारि प्रभृति सूक्तीनां तत्तदुपचारेषु मन्त्रत्वेन लिङ्गाधीनो विनियोगः इति ।

आराधनसमये भक्ष्याहारासने द्राविडवेद सेवाक्रमे प्रमाणम् । ब्रह्माण्डपुराणे :—

गाथा द्राविडवेदस्था ये पठन्ति दिने दिने ।
मद्भक्तास्ते विशेषाच्च नित्यं प्रीतिकराहिते इति ॥

पराशर संहितायां विशिष्टपरमधर्मशास्त्रे एकविंशाध्याये :—

भाषागानं विष्णुभक्तैः उक्तं वेदान्तनिर्णयम् ।
तदा तद्देवदेवस्य नित्यार्चायाश्च पूजकः ॥
अलङ्कारासने सम्यक् एतद्वेदादिकं क्रमात् । इति ।

श्रीमदाराधनकाले पुनर्मन्त्रासने प्रबन्धनिगमनसमये पुष्पाञ्जलिप्रमाणं । हारीतस्मृतौ चतुर्थाध्याये :—

नैवेद्यं शुचिहृद्यान्न पायसापूपसंयुतम् ।
फलैश्च भक्ष्यभोज्यैश्च पानकैर्व्यञ्जनैस्सह ॥
गवाज्यञ्च दधिक्षीरं शर्करां च निवेदयेत् ।
नीराञ्जनं ततो दत्वा ताम्बूलञ्च निवेदयेत् ॥
विष्वर्चित चतुर्भागं क्रमाद् द्दक्सस्य चार्पयेत् ।
अनन्ततार्क्ष्य सेनेश पवित्राणां निवेदयेत् ॥
सर्वैश्च वैष्णवैर्मन्त्रैः कुर्यात् पुष्पाञ्जलिं ततः ।
प्रणमेच्च ततो भक्त्या साष्टाङ्गं दक्षिणादिशि ॥
उरसा शिरसा दृष्ट्या मनसा वचसा तथा ।
पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग उच्यते ॥

श्रीपरांकुशमुनिवरादि भक्तप्रतिष्ठाराधनविषये प्रमाणं । वराहसंहितायां:—

शठारि परकाल भक्तानान्तु विशेषतः ।
मूर्तिं प्रतिकृतिं कुर्यात् लोहशैलमृदादिभिः ॥
तत्तद्वर्णाकृतिं कृत्वा हस्तमुद्राऽऽसनानि च ।
पूर्वोक्तेन विधानेन प्रतिष्ठा प्रोक्षणादिकम् ॥
कृत्वा संपूजयेन्नित्यं त्रिकालं वैष्णवोत्तमः ।
मद्भक्त शठकोपादि भक्तानां पूजनेसदा ॥

मम पूजा शताधिकं सर्वथा नात्रसंशयः ।
सहस्रवार्षिकीपूजा विष्णोर्भगवतो हरेः ॥
सकृद्भागवतार्चायाः कोटिभागेन नो समेति ।

पराशर संहितायां द्वाविंशाध्याये :—

नित्यान्मुक्तान् गुरून् सम्यक् विष्णुनासह पूजयेत् ।
विष्णुसायुज्यसिध्यर्थं प्रपन्नस्तु सदाद्विजः ॥
यदाकारेण देवेशं पश्यन्ति च तदाकृतिम् ।
कुर्यात्तद्विष्णुभक्तान्वै मुक्तान्गुरुपरंपरां ॥ इति ॥

श्री पाञ्चरात्रे पाद्मसंहितायां कुरुकापुरीमाहात्म्ये सनत्कुमारनारदसंवादे नारदं प्रति सनत्कुमारः—

मन्दिराणां शतानान्तु पादुकाशतमिष्यते ।
एकैकशावतारेषु शटकोपः पृथग्विधः । इति ॥

अत्र प्रतिदिव्यदेशे श्रीशठकोपप्रतिष्ठावत् श्रीमच्छठकोपसूरिप्रतिष्ठा प्रतिपादिता । श्रीवैखानसे आनन्दसंहितायां:—

कोपाग्निना शठं दग्ध्वा वैष्णवीपादुका सुरं ।
शठकोप इति व्याख्यां प्राप्ता भक्तोत्तमैस्तदा ॥ इति ॥

श्रीरङ्गमाहात्म्ये :—

तदा महासुरः कश्चित् शठो नाम दुरासदः ।
अवध्यत्वमनुप्राप्तः सर्वैरपि सुरासुरैः ॥
सरयूतीरमासाद्य पीडयिष्यन् द्विजोत्तमान् ।
मुनिवेषधरोदेवं भक्तैः परिचचार ह ॥
कदाचिदन्तरं वीक्ष्य तत्रत्यान परिचारकान् ।
रात्रौ हत्वा जहाराशु हारं भगवताधृतम् ॥

तस्मिन् धृतिश्च कान्तिश्च विक्रमश्च विवर्धते ।
तं हत्वा विश्वपानाळं दानवैरभिपूजितः ॥

मुदा परमयायुक्तः तस्थौ तत्र महासुरः ।
ततः प्रभातसमये त्वयोध्याधिपतिर्नृपः ॥

स्नात्वाऽभिगम्य देवेशं नापश्यत्परिचारकान् ।
हारञ्च परमं दिव्यं विष्णुवक्षस्थलस्थितम् ॥

किमेतदिति संभ्रान्तो विषण्णो भूनरेश्वरः ।
ततः प्रणम्य देवेशं स्तुत्वा स्तोत्रैर्मनोहरैः ॥

किमेतदिति पप्रच्छ मनुपत्रस्तमीश्वरम् ।
भगवन्देव देवेश त्वदीयाः किंकरा हताः ॥

केनवापहृतो हारः संशये सर्वमच्युत ।
एवमिक्ष्वाकुना पृष्टो देवेशो भक्तवत्सलः ॥

प्रत्युवाच जगन्नाथः प्राञ्जलिं दीनमानसम् ।
न मत्प्रियं भवेत्तस्माद्भक्ति हीना हता इमे ॥

हृतश्च रक्षसाहारः मदुरः स्थलशोभितः ।
अचिराद्दानवंक्रूरं नयिष्ये याम्यमालयम् ॥

इत्युक्त्वा तं महीपालं देवः श्रीरङ्गनायकः ।
मुहूर्तं चिन्तयामास ततः स्वीयाञ्च पादुकाम् ॥

क्षिप्रमाज्ञापयामास शठस्य निधनं प्रति ।
ततो भगवदाज्ञां वै प्रतिगृह्य च पादुका ॥

वायुवेगा समाविशत्सा पातालरसातलम् ।
शठभृत्यास्ततो दृष्ट्वा पादुकांगममद्भुतम् ॥

न्यवेदयन् शठायाशु सोऽपि संभ्रान्तमानसः ।
निक्षिप्य संवृते देशे हारं विष्णोरतिप्रियम् ॥

तीक्ष्ण कण्टक संपूर्ण वृक्षरूपं समास्थितः ।
तादृग्रूपैः स्वभृत्यैश्च संवृतः समदृश्यत ॥

पादुका मार्गमाणा वै हारं तं रक्षसा हृतम् ।
अपश्यती सुदुःखार्ता दध्यौ हरिपदाम्बुजम् ॥

ध्यानेन ज्ञात्वा तस्य मायारूपं दुरात्मनः ।
कोपमाहारयामास भृशं श्रीरङ्गपादुका ॥

सा च दावानलोभूत्वा वृक्षं षण्डं ददाह वै ।
तस्मिन्कोपाग्निना दग्धे शठे सहपरिच्छदे ॥

तत्रत्या योगिनः सर्वे तुष्टुवुः परयामुदा ।
तत्रत्यैः पूज्यमाना सा हारंचादाय पादुका ॥

अयोध्यामगमत् शीघ्रं इत्यादि । अत्र भगवद्दिव्यपादुकायाः शठकोपनिर्वचनं प्रतिपादितम् । श्री पाञ्चरात्रे पाद्मसंहितायां :—

भक्तस्थापनहीनेतु नास्ति मुक्तिर्हरिस्थले ।
तस्मात्तान्विष्णु भक्तान्वै स्थापयेत् हरिमन्दिरे ॥
अत्र श्रीविष्णुसन्निधौ भक्तप्रतिष्ठाभावे मुक्त्यभावः प्रतिपादितः ।

श्री विष्णुरहस्ये :—

कारयेदर्चनं तेषां भक्तानां च दिने दिने ।
एतेषां भक्तिमूर्तीनां परतन्त्रेणवर्त्मना ॥ इति

अत्र भक्तानां प्रतिदिनमाराधनीयत्वमुक्तं ।

शाण्डिल्य स्मृतौ :—

अनाहूत सुतं गेही पुरुषं नाभिनन्दति ।
तथाऽनर्चित सद्भक्तं पुरुषं नाभिनन्दति ॥

यथा कुटुम्बिकः श्रीमान् कुमारैरनुमोदते ।
मोदते भगवान् भक्तैः तथा नियतमानसैरिति ॥

स्थलान्तरे :—त्यक्तभक्तार्चना व्यर्था अरसा ऊषरांम्बुवत् ॥ इति अत्र भक्ताराधनाभावे भगवतः सन्तोषाभावः प्रतिपादितः । वैकुण्ठनाथीये नारायण संहितायां :—

मद्भक्तान् शठकोपादीन् पूजयेद्वैष्णवोत्तमः ।
मन्त्ररत्नविधानेन उपचारैश्च सर्वशः ॥

मत्सान्निध्यं सदा तत्र मम प्रीतिकरं शुभम् ।
मयि पूजादिकं विद्धि मत्सान्निध्यमवाप्नुयात् ॥ इति ।

शाण्डिल्यसंहितायां :—

शठकोपादि भक्तानां पूजां कुर्याद्विशेषतः ।
पुंसूक्तोक्तेन मार्गेण श्रीमदष्टाक्षरेण वा ॥
मन्त्रद्वयेन वा कुर्यान्मूर्तिमन्त्रेण वा द्विजः । इति ।

अत्र भक्ताराधन सद्भावे भगवतः सन्तोषः भक्ताराधनस्यावश्यकत्वं च प्रतिपादितम् । तथैवोक्तं सच्चरित्र परित्राणे श्री विष्णुतत्वे :—

शठारिपरकालादि भक्तान् संपूजयेद्द्विजः ।
वैष्णवांश्च विशेषेण मन्त्ररत्न विधानतः ॥ इति ।

इदं पराङ्कुशाद्यानामामाराधनं भगवदाराधनेनसह समुच्चयेन विकल्पेन वा यथाधिकारं कर्तव्यम् । अनेक दिव्यमङ्गलविग्रह सद्भावे तु हविर्निवेदना-दीनां पौर्वापर्यायोगात् तत्तन्मूर्ति नाम्नां द्वन्द्वनिर्देशेपि पौर्वापर्यस्यावर्जनीयत्वात्

मूर्तिमन्त्रेण च मूर्तिशब्दस्य च सामान्यतः विशेषतश्च मूर्तिबोधक शब्दघटित मन्त्रपरत्वस्य न्याय्यत्वात् युगपदुद्देश्य सिद्ध्यर्थं सर्वमङ्गलविग्रहायेति मन्त्ररत्न खण्डद्वयमध्ये निर्दिश्याराधनं कार्यमिति पूर्वाचार्यैरुपपादितमिति पूर्वग्रन्थेषु स्थितमनुसन्धेयमिति ।

तुलस्यर्चनस्य मुख्यत्वम् । श्रीपाञ्चरात्रे पराशर संहितायां :—

भक्तानभ्यर्चयेद्भक्त्या पावनैस्तुलसीदलैः ।
भगवत्पादुका बुध्या मूर्तिमन्त्रैश्च वैष्णवैः ॥ इति ॥

अत्र श्रीतुलस्या भगवद्भक्तार्चनस्य कार्यत्वप्रतिपादनेन श्री तुलस्यर्चनस्य मुख्यत्वं लब्धम् , तदुक्तं स्मृतिरत्नाकरे वैष्णवधर्मशास्त्रे :—

पुष्पालाभे तुलस्यास्तु पत्रैर्मामर्चयेद्बुधः ।
पत्रालाभे शिफाभिस्तु शिफाभावे शिफालवैः ॥
लवालाभे मृदा तत्र भक्तिमानर्चयेत माम् । इति ।

श्रीनारदीयपुराण ज्ञानकाण्डे श्रीयादवगिरिमाहात्म्ये शाण्डिल्य नारद संवादे नवमाध्याये :—

हरेरभ्यर्चनायान्तु तुलसीसाधनं परम् ।
अलाभे तुलसीनाञ्च तन्नामग्रहणादपि ॥
भगवानरविन्दाक्षः सन्तुष्यति सहस्रधा ।
न पद्मैर्नापि कल्हारैः न हेम कुसुमैरपि ॥
तथा तुष्यति गोविन्दो यथैव तुलसीदलैः ॥ इति ।

तुलसीमाहात्म्ये :—

शुष्कंपर्युषितं त्वार्द्रंकाष्ठं वा तुलसीदले ।
अर्चने वासुदेवस्य लक्षकोटि गुणं भवेत् ।
शुष्कैः पर्युषितैर्वापि काष्ठमूलमृदादिभिः ॥
अर्चनान्मम बिम्बस्य सदा शुद्धिर्भविष्यति । इति ॥

सङ्ग्रहे :—

उत्तमं तुलसीपुष्पं मध्यमं तुलसीदलम् ।
अधमं तुलसीपत्रं अथवा काष्ठमेव वा ॥ इति ।

तुलसी कुसुमं ग्राह्यं तदभावे तु पल्लवम् ।
साङ्कुरन्तु चतुः पत्रं षट् पत्रं वा समाहरेत् ॥

पल्लवानामभावे तु तुलसी काष्ठमुच्यते ।
काष्ठाभाव तु मूलं स्यात् मूलाभावे तु मृत्तिका ॥
मृत्तिकाया अभावे तु तुलसी शब्द उच्यते इति ।

भगवच्छास्त्रे :—

तुलसीपूजनादन्यद्विष्णोः प्रीतिकरे न च ।
सर्वेषामपि पुष्पाणां पद्मशतगुणं भवेत् ॥
पद्मात्कोटिगुणं पुण्यं तुलसीदल पूजनमिति ।

॥ श्री तुलसीग्रहण मन्त्रम् ॥

प्रसीद ममदेवेशि प्रसीदहरिवल्लभे ।
क्षीरोदमथनोद्भूते तुलसि त्वं प्रसीद मे ॥ १ ॥
तुलस्यमृतजन्यासि सदा त्वं केशवप्रिये ।
केशवार्थे लुनामित्वां वरदा भव शोभने ॥ २ ॥

मोक्षैकहेतोर्धरणि प्रसूते
विष्णोः समस्तस्य गुरोः प्रिये ते ।
आराधनार्थं पुरुषोत्तमस्य
लुनामि पत्रं तुलसि क्षमस्व मे ॥

एतन्मन्त्रत्रयमुच्चार्य तुलसी सन्निधौ साञ्जलिबन्धं संप्रार्थ्य षट्पत्रिषां चतुर्दलां सुपुष्पाङ्कुरां वा तुलसीं यथासंभवं गृह्णीयात् ।

तुलसीग्रहण निषेधकालः । भगवच्छास्त्रे :—भानु भौम भृगु विष्णु-भनन्दापात वैघृति युगादिपर्वसु । नाहरेत्तुलसीं अपराह्णे द्वादशी रजनी सूर्यसन्धिषु ॥ संक्रमद्वादशी शुक्र भौमवार द्विपर्वसु । तुलसीं ये विचिन्वन्ति ते कृन्तन्ति हरेः शिरः ॥ इति भानुवारादौ तुलसीग्रहण निषेधः । तुलसी माहात्म्ये :—

संवत्सरन्तु तुलसी षण्मासं बिल्वमेव च ।
पालाशं मासमेकन्तु कपित्थं पक्षमेव च ॥
सप्तवारन्तु पद्मं स्यात् करवीरं त्रिभिर्दिनैः ।

इत्युक्तरीत्या भगवदाराधनार्थं चिरकालं संगृह्य निक्षिप्त तुलसी परोवेदितव्यः । नित्याराधनार्थं प्रतिदिनं तुलसीग्रहणे न वारादिदोषः । भगवच्छास्त्रे :—

नियमेनार्चनार्थन्तु तुलसी नित्यमाहरेत् ।
आलयार्चा विधानस्य न दोषः परिकीर्तितः ॥
तिथिदोषो वारदोषः ऋक्षदोषो न विद्यते ।

इत्याद्युक्तेः । भगवच्छास्त्रे :—

मद्वन्दनाच्छतगुणं मम भक्तस्य वन्दनम् ।
मदर्चनाच्छतगुणं मम भक्तस्यचार्चनमिति ॥

अतः प्रपन्नैः श्राद्धात्मक तीर्थदिवसादौ द्राविडागम सेवादिपूर्वक श्रीमत्पराङ्कुश मुनिवर यतिवरपुनरवतार वरवरमुनिप्रमुख भक्तनिवेदित प्रसादादिना होम पूर्वक निमन्त्रित श्री वैष्णव भोजन तदीयाराधनादिकं कर्तव्यमेवेति सिद्धम् ॥

इति श्रीसदनुष्ठान दर्पणे भक्तनिवेदित प्रसादादेः श्राद्धात्मक
तदीयाराधनादौ विनियोग प्रकार विषयो नाम
त्रयोदश प्रतिफलनम्

॥ श्रीरस्तु ॥

॥ श्रीः ॥

श्रीमते रामानुजाय नमः ॥ श्रीमद्वरवरमुनये नमः ॥
श्रीमद्वरदगुरवे नमः ॥ श्रीशुद्धसत्त्वमहागुरवे नमः ॥

॥ सदनुष्ठानदर्पणम् ॥

वन्दे समस्तशास्त्रार्थसन्देहच्छेदिनं शुभम् ।
वरदं वावदूकानां भयदं गुरुपुङ्गवम् ॥

स्त्रीशूद्रादीनां वैदिकप्रणवराहित्येन तान्त्रिकप्रणवसहित अष्टाक्षरोपदेशविषये प्रमाणम् ॥

प्रपन्नाः, आचार्याः पञ्चसंस्कारसमये, ब्राह्मणादीनां स्त्रीशूद्राणां च स्वररहितप्रणवसहित अष्टाक्षरोपदेशं कुर्वन्ति । तद्युक्तमेव वचनात्, शिष्टाचाराच्च ॥

तथाहि– श्रीरहस्यत्रयसारव्याख्यान सारप्रकाशिकायां श्रुतौ– एकाक्षरां, द्विपदां, षट्पदां च । वाचं देवा उपजीवन्ति विश्वे । वाचं गन्धर्वाः पशवो मनुष्याः इति । अयमर्थः– एकाक्षरां वाचं 'ओमित्येकाक्षरम्' इत्युक्तं प्रणवम् । द्विपदां वाचं नम इति पश्चात्, नारायणायेत्युपरिष्टात् इत्युक्तपदद्वयात्मकं मन्त्रशेषं । षट्पदां वाचं षट्पदानि षट्पदोऽयं द्विखण्डः इत्यादि श्रुतिरहस्याद्युक्तं– मन्त्ररत्नं चकारेण श्रीमदष्टाक्षरं मन्त्रं मन्त्ररत्नं युगाद्वयं, गीतासु चरमश्लोकं यो जानाति स वैष्णवः इत्याद्युक्तं चरमश्लोकं च सर्वे देवाः, सर्वे गन्धर्वाः, सर्वे पशवः, सर्वे मनुष्याश्च उपजीवन्ति । तद्विज्ञानार्थं अभ्यस्यन्ति इत्यर्थः । अत्र पशुग्रहणं गजेन्द्रादिव-

त्संभवाभिप्रायेण। यद्वा पशुशब्दः पशुकल्पपरतया मनुष्यशब्दविशेषणं तथा च–पशवो मनुष्याः इत्यनेन 'तस्मात् शूद्रः बहुपशुः अयज्ञीयः' इत्युक्ताः पशुकल्पा मनुष्याः शूद्रादयः उच्यन्ते ॥

स्मृतौ–प्रणवाद्यं नमोमध्यं नारायणपदान्तिमं। मन्त्रमष्टाक्षरं विद्यात्, सर्वसिद्धिकरं नृणामिति। पराशरसंहितायां तृतीयाध्याये–सदा प्रणवसंयुक्तं मूलमन्त्रद्वयादिकम्। वेदस्वरादिवर्ज्यं स्यात्, शूद्राणां मन्त्रजापने। दीक्षायां प्रणवादि स्यात्सर्वदा कमलासन इति। अत्र दीक्षितशूद्राणां मूलमन्त्रादीनां प्रणवादिसाहित्येन अनुसन्धेयत्वमुक्तम्। तथोक्तं सच्चरित्रपरित्राणे– यद्यपि, वैदिकं ब्राह्मणानां स्यात्, राज्ञां वैदिकतान्त्रिकम्। तान्त्रिकं वैश्यशूद्राणां ग्रहणं इति ब्राह्मणानां वैदिकमन्त्रग्रहणं विहितम्। स्वरप्रणवादि सहितस्य वैदिकत्वं तद्रहितस्य तु तान्त्रिकत्वं चोक्तं। स्वरश्च– 'द्वावुदात्तौ प्रथमतः तृतीयः स्वरितस्ततः। प्रचयो निहतष्षष्ठः उदात्तस्वरितौ ततः' ॥ इत्यनेनोक्तः। तथापि सर्वेषां तान्त्रिकन्तु वेति ब्राह्मणादीनामपि तान्त्रिकमन्त्रो विहितः 'प्रणवेन विहीनास्तु तान्त्रिका एव कीर्तिताः'। इत्यनेन हि यादृशप्रणवयोगे मन्त्रस्य वैदिकत्वं तादृशप्रणवविरहे मन्त्रस्य तान्त्रिकत्वमुक्तम् ॥

स्वरयुक्तप्रणवसहितस्य च वैदिकत्वं तद्रहितस्य तु तान्त्रिकत्वं, तत्र स्वरयुक्तप्रणवरहितत्वं च स्वरमात्रविरहे प्रणवविरहे च भवति, अतः प्रणवसाहितत्वेऽपि स्वरविरहात् स्वरयुक्तप्रणवरहितत्वरूप तान्त्रिकत्वं सिध्यति। पराशरसंहितायां च– 'प्रणवेन समायुक्तं वेदस्वरविवर्जितम्'। इति तान्त्रिकमन्त्रस्य स्वरराहित्यं प्रणवयोगश्चोक्तः इति। अत्र पराशरसंहिता तृतीयाध्याये– 'सदा तान्त्रिकमन्त्रः स्याद्वेदस्वरविवर्जितः। मूलादिसर्वमन्त्राणां विधिरेष सदा भवेत्' ॥ इत्यादि प्रमाणमपि जागर्ति ॥

अत एव तान्त्रिकमन्त्रस्य उपदेशपरम्पराप्राप्तत्वं तस्य प्रणवसहितत्वं च रहस्यत्रयजीवातौ उक्तम् ॥

पराशरोत्तरखण्डे पञ्चदशाध्याये– अध्यापयेन्मन्त्ररत्नं सर्षिच्छन्दोधिदैवतम्। सन्यासं च समुद्रं च सार्थमध्यापयेद् द्विजम् ॥ विनापि न्यासमुद्रार्थतत्त्वर्षिच्छन्ददैवतम्। उच्चारणान्मनोरस्य सर्वसिद्धिफलं लभेत ॥ इति।

पाद्मे ब्रह्मनारायणसंवादे– नानुकूल्यं न नक्षत्रं न तीर्थादिनिषेवणम्। न पुरश्चरणं नित्यं जपं नापेक्षते ह्ययम्। द्वयेन मन्त्ररत्नेन मत्प्रियेण भजेत्सदा। ऋष्यादिकं करन्यासमङ्गन्यासं च वर्जयेत् ॥ इति।

हारीते– मन्त्ररत्नं नृपश्रेष्ठ सद्योमुक्तिफलप्रदम्। देशकालादिनियमपरिमित्रादिशोधनम्। स्वरवर्णादिदोषश्च पौरश्चारणिको न तु ॥ इति च सर्वप्रपन्नानां स्वराङ्गन्यास करन्यासादि वर्जनपूर्वकं मन्त्रोपदेश उक्तः ॥

मन्त्रोपदेशः गुरुपरम्परोपदेशपूर्वक एव। तदुक्तं सच्चरित्रपरित्राणे– शिष्टाः केवलं मन्त्ररत्नादिकमनुसन्दधते। गुरुपरम्परापूर्वकत्वं तु नियतम्। 'स्वाचार्यं हृदये ध्यात्वा मन्त्रमध्यापयेद्गुरुः। न्यासाख्यं परमं मन्त्रं संसारच्छेदनं शुभम्'॥ इति पराशरोक्तेः। अन्यत्रापि आदौ गुरूणां विज्ञानं मन्त्ररत्नार्थचिन्तनमित्युक्तेः ॥

मन्त्ररत्नवैभवप्रकरणे– गुरुरेव परं ब्रह्मेत्याद्युक्तेः। विनापि न्यासमुद्रेत्यादिवत्तदनुक्तेश्च तन्नियमावगमात आदौ गुरूनभिध्यायेदित्यादौ ऊर्ध्वपुण्ड्रधारणस्यापि हि गुरुपरम्परानुसन्धानपूर्वकत्वमुक्तम्– 'तदिदमभिप्रेत्य, गुरुपरम्पराविरहितं मन्त्ररत्नम् मन्त्रान्तरतुल्यमित्याचार्या अभिदधुरितीति ॥

श्रीनारदीयाष्टाक्षरकल्पे– न स्वरः प्रणवोऽङ्गानि नाप्यन्यविधयस्तथा। स्त्रीणान्तु शूद्रजातीनां मन्त्रमात्रोक्तिरिष्यत इत्येतदपि स्वररहितप्रणवसहितमन्त्रस्य स्त्रीशूद्राधिकारत्वं वदति ॥

श्रीनारदीयाष्टाक्षरकल्पे पूर्वत्र– स्त्रीणामष्टाक्षरजपः प्रकृत्यैव विधीयते इत्युक्तत्वात मन्त्रशेषोक्तिरिष्यत इति नोक्तम्। किन्तु मन्त्रमात्रोक्तिरिति ओमित्येकाक्षरमिति ॥

श्रीपाद्मे पुराणे उत्तरखण्डे उमामहेश्वरसंवादे वसिष्ठदिलीपसंवादे– मन्त्रार्थोपदेशनामकद्वादशाध्याये– श्रीमदष्टाक्षरं मन्त्रमभ्यसेद्द्विजसत्तमः। मन्त्रमष्टाक्षरं प्रोक्तं प्रणवस्यैव संग्रहम् ॥ नैसर्ग्यप्रणवार्थत्वान्मन्त्रमित्युच्यते बुधैः। अन्यत्र सर्वमन्त्रेषु प्रणवः स्वस्वभावतः। पूर्व्यैव सर्वमन्त्राणां योजयेत्प्रणवं शुभम् ॥ ओंकारं प्रथमं ब्रह्म सर्वमन्त्रेषु नायकम्। आदौ सर्वत्र युञ्जीत मन्त्राणां च शुभानने ॥ इति। स्वभावात्प्रणवं तस्मिन्मूलमन्त्रे प्रतिष्ठितम्। इति। वामनपुराणे– अष्टाक्षरशरीराङ्गप्रणवाद्याक्षरेण तु। इति। नान्यत्र सर्वमन्त्राणां प्रणवः स्वस्वभावतः। पूर्व्यं च सर्वमन्त्राणां योजयेत्प्रणवं शुभम् ॥ इति श्रुत्यादिभिः प्रणवसहितस्यैव अष्टाक्षरस्य मूलमन्त्रत्वप्रतिपादनात स्वररहितकृत्स्नमन्त्रोक्तिरिष्टेति लब्धं।

अन्यथा अर्थवर्णने न स्वरः इत्यनेन अच् सामान्यस्य निषेधप्रतीत्या प्रणवराहित्येन अष्टाक्षरत्वं अङ्गीकुर्वतां तेषां मते, अष्टाक्षरघटक अच् सामान्यस्य वर्जनप्रसङ्गः, उदात्तादिविशेषनिषेधपर्यवसानज्ञापकविशेषवचनाभावात ॥

न प्रणव इति निषेधोऽपि तेषामेव परिपन्थी। तस्य प्रकृतिलीनस्येति श्रुत्या अकारस्यापि लीनप्रणवाभेदस्य प्रतिपन्नत्वेन, स्मार्ताष्टाक्षरगतप्रथमाक्षरस्यापि स्त्रीशूद्रादिभिर्वर्जनप्रसङ्गात् ॥

नाङ्गानीति निषेधोऽपि तेषामेव विरोधी, अग्न इति बीज-
मन्त्रस्य नमःपदस्य आय इति शक्तिमन्त्रस्य च अङ्गत्वेन तेषां मते
तेषां स्त्रीशूद्रादिभिः त्यागप्रसङ्गात् ॥

नाप्यन्यविधयः इत्येतदपि तेषामेव अनिष्टम् । तेन मन्त्रोक्ति-
व्यतिरिक्त जपहोमतर्पणदेवताध्यानादीनां निषेधेन, स्त्रीशूद्रा-
दीनां तेषां मते वर्ज्यत्वापातात । अतः यथोक्त एवार्थः ।
एतच्छ्लोकार्थः शङ्कासमाधानपूर्वकं विस्तरेण विवृतः दुरुपदेशधिकारे,
द्वितीयहेतुभङ्गे ॥

किञ्च न स्वरः इत्यनेन अच् सामान्यस्य निषेधप्रतीत्या
तस्य उदात्तादिविशेषनिषेधपर्यवसानज्ञापक विशेषवचनाभावेन त्व-
न्मते स्त्रीशूद्रादीनां अष्टाक्षरघटकाच् सामान्यवर्जनप्रसङ्गाच्च ॥

न च प्रकरणबलाद्विशेषसिद्धिः, स्वरसामान्यस्यापि प्रकृत-
त्वात् । न च मन्त्रघटकानामचां मन्त्रशरीरानुप्रविष्टत्वात्तेषां मन्त्र-
मात्रोक्तिरिष्यत इति विहितत्वेन न स्वर इत्यत्र तन्निषेधायोगात्
उदात्तादिनिषेधमात्रे पर्यवसानसिद्धिरिति वाच्यं अचामप्युदात्तादि-
रूपेणैव मन्त्रशरीरानुप्रविष्टतया तेषामपि निषेधायोगात् । न ह्यचा-
मच्त्वेनैव मन्त्रशरीरत्वम्, नोदात्तत्वादिरूपेणेत्यत्र नियामकमस्ति ॥

न च श्रुतिवाक्यात् अग्निरस्सहैवोद्धृतस्य अष्टाक्षरस्य अनन्तरं
स्मृत्या षष्ठाद्ययोरुदात्तस्स्यात्, स्वरितोन्त्यद्वितीययोः । प्रचयस्त्रिचतु-
र्थाभ्यां पञ्चमं तु निहन्यते ॥ इत्यादिना स्वरविधानादनन्तरविहितत्व-
मेवोदात्तादीनां मन्त्रशरीरानुप्रवेशज्ञापकमिति वाच्यम् ॥

उद्धारदशायां सहोद्धृतानां स्वराणामेव स्मृतेर्विशेषतो बोध-

कत्वात् ॥

न ह्योमित्येकाक्षरमित्यादि स्वरविहीनमुद्भियते । किञ्च 'ओं नमो नारायणायेति मन्त्रोपासकः इत्यत्र सस्वरमेवाष्टाक्षरानुपूर्वीमुपादाय इतिमन्त्रेति विशिष्टस्यैव मन्त्रत्वोक्त्या दुर्वार एव उदात्तादीनां मन्त्रशरीरान्तर्भावः ॥

अपि च– न प्रणव इति निषेधोऽपि तवैव परिपन्थी तस्य प्रकृतिलीनस्येति श्रुत्या अकारस्यापि लीनप्रणवाभेदस्य प्रतिपन्नत्वेन स्मार्ताष्टाक्षरगतप्रथमाक्षरस्यापि स्त्रीशूद्रादिभिर्वर्जनप्रसङ्गात । न च प्रणवप्रकृतिभूतस्य अकारस्य प्रणवभेदे सति तस्य प्रकृतिलीनस्येत्येतदुपपद्यते । प्रकृतिलीनप्रणवाभिन्नस्याकारस्य इति हि तदर्थः । न च प्रणव इति स्थूलप्रणवमात्रनिषेधः इति वक्तुं शक्यम । तद्विशेषकप्रमाणाभावात । न च स्थूलप्रणवस्यैव सर्वेषु मन्त्रेष्वङ्गतया प्रसक्तत्वाल्लीनप्रणवस्य तादृशप्रसक्त्यभावाच्च , स्थूलप्रणवस्यैव निषेधः इति वाच्यम् । तथासति, अङ्गभूतस्थूलप्रणवस्यैव निषेधेनाङ्गिप्रणवस्यानिषेधापातात । तस्य सर्वमन्त्रेषु प्रसङ्गाभावात ॥

तथा नाङ्गानीति निषेधोऽपि, तवैव विरोधी । अं इति बीजमन्त्रस्य, नमःपदस्य आयेति शक्तिमन्त्रस्य चाङ्गत्वेन तन्मते, तेषां स्त्रीशूद्रादिभिः त्यागप्रसङ्गात् । न चेष्टापत्तिः, 'नारायण इत्येतावन्मात्रस्यानुसंधानप्रसङ्गात् । न च तथानुसंधीयते ॥

न च मन्त्रशरीरानन्तर्गतानां अङ्गानामेव नाङ्गानीति निषेधाभ्युपगमात्, तेषां च बीजानां मन्त्रशरीरान्तर्गतत्वाच्च न दोषः इति वाच्यम्। तदापि अमित्यस्य त्यागतादवस्थ्यात् ॥

न च तत्रोचरायनस्यादिः बिन्दुमान्विष्णुरन्ततः । इति वचनेन अयनपदाद्यक्षराकारस्यैव बीजत्वोक्त्या तस्यापि मन्त्रशरीरत्वमस्तीति वाच्यम् । बिन्दुमान्विष्णुरन्ततः बीजमष्टाक्षरस्य स्यादिति

बिन्दुविशिष्टवेषेणैव तस्य बीजत्वोक्तया विशिष्टबीजस्वरूपस्य मन्त्रशरीरत्वाभावेन तद्दोषतादवस्थ्यात्। यदि च 'अधिकन्तु प्रविष्टं न तद्धानय' इति न्यायेन बिन्दुविशिष्टस्याप्यकारस्य मन्त्रशरीरत्वानपायान्नाङ्गानीति न तस्य निषेधः इति उच्येत, तर्हि प्रणवस्याप्यकारघटितत्वेनैव मन्त्रशरीरानुप्रविष्टतायास्सुरपादत्वात्। तस्यापि स्त्रीशूद्रादिभिः स्वीकारापत्तेः॥

न च बीजघटक अकार एव मन्त्रशरीरभूतः न प्रणवघटकः तस्यैव अपनशब्दाद्यक्षरत्वस्य प्रमाणसिद्धत्वादिति वाच्यम्। बीजघटकाकारस्य सर्वसंग्रहतायाः श्रीवेदान्ताचार्यैः श्रीरहस्यत्रयसारे मूलमन्त्राधिकारे अनुगृहीतत्वेन तेनैव तस्य प्रणवप्रकृतित्वस्यापि सिद्धेः॥

किं च अष्टाक्षरशरीराङ्गप्रणवाद्यक्षरेण त्विति वचनेन अष्टाक्षरशरीरभूतस्यैव प्रणवस्य तन्त्रेणाङ्गत्वस्याप्युक्ततया, विशिष्टप्रणवस्यैव मन्त्रशरीरत्वेन तद्दोषतादवस्थ्याच्च॥

अपि च स्मार्ताष्टाक्षरे प्रणवप्रतिछन्दतयैव तत्स्थाने बीजं विहितमिति श्रीवेदान्ताचार्यैरनुगृहीतत्वेन प्रतिछन्दस्यैव त्वया मन्त्रशरीरत्वोक्तौ, तत्स्थानिनस्तस्य कैमुत्यसिद्धतया, तद्दोषतादवस्थ्यस्य वज्रलेपायितत्वाच्च॥

किञ्च नाङ्गानीति, कतिपयाङ्गनिषेधो वा, सर्वाङ्गनिषेधो वा नाद्यः, विकलाङ्गस्य मन्त्रस्य काम्यमानपुरुषार्थसाधनत्वायोगात्। सकलाङ्गोपसंहारे काम्यं कर्म प्रसिध्यतीति न्यायात्। नापि द्वितीयः पुरुषार्थसामान्यसाधनत्वायोगात्। न ह्यङ्गशून्यस्य करणत्वसंभवः। तदुक्तं, नहि तत्करणं लोके वेदे वा किञ्चिदीदृशं इतिकर्तव्यतासाध्ये यस्य नानुग्रहेर्थितेति॥

तथा नाप्यन्यविधयः इत्येतदपि तवैवानिष्टम् । तेन मन्त्रोक्तिव्यतिरिक्त जपहोमतर्पणदेवताध्यानादीनां निषेधेन स्त्रीशूद्रादीनां तेषां त्वन्मते, वर्ज्यत्वापातात् । न चेष्टापत्तिः । मन्त्रग्रहणस्य वैयर्थ्यापातात् । आत्महविस्समर्पणाद्यर्थं हि त्वन्मते मन्त्रग्रहणम् । तदेवं न स्वरः इत्यादिवचनस्य आपादचूडं तवैवानिष्टापादकत्वात्तदवश्यम् अन्यथा नेयमेव । तर्हि इदं वचनं किंपरमिति चेत् श्रूयतामवधानेन ॥

स्त्रीशूद्राणामपशूद्राधिकरणन्यायेन उपनयनाद्यभावेन, लौकिकसामर्थ्याभावन्यायप्राप्तादृष्टार्थस्वरप्रणवाङ्गादिनिवृत्त्यनुवादपूर्वकं रागप्राप्तदृष्टार्थमन्त्रोक्तिमात्रस्य भगवदभिमतत्वज्ञापनपरमिदं वचनम् । मन्त्रपदेन, अर्थप्रत्यायनद्वारा रक्षकत्वोक्त्या, तदुक्तेः केवलरागप्राप्तत्वलाभात् इष्यत इत्यनेन श्रुतिस्मृतिर्ममैवाज्ञेत्युक्तभगवदभिमतत्वज्ञापनाच्च। तत्र पूर्वार्धे स्वरः प्रणवः इति शब्दौ, समानाधिकरणौ, समानलिङ्गवचनत्वादिना प्रथमप्रतीतस्य सामानाधिकरण्यस्य चकारादिभञ्जकत्वाभावेन त्यागायोगात् ॥

अत एव हि 'कप्यासं पुण्डरीक' मित्यादौ वैयधिकरण्यमाचार्यैर्दूषितं तथा च स्वरात्मकप्रणवनिषेधः न स्वरप्रणवः इत्यनेनोक्तः। स्वरात्मकः प्रणवो नाम कः इति चेत् । प्रणवो द्विविधः अक्षरत्रयसंहिताकारः एकः—केवलं एकाक्षरः अपरः तत्र अक्षरत्रयसंहिताकारस्य प्रणवस्य मकाररूपहल्सहितत्वान्न केवलस्वरात्मकत्वं केवलैकाक्षरस्य तु मकारघटितत्वे प्रमाणाभावेन बिन्दुभूषित ओंकारात्मकत्वेन भवति केवलस्वरात्मकत्वम् । तत्र अक्षरत्रयसंहितानुरूपप्रणवो योऽष्टाक्षरघटकः, स ब्रह्मशेषभूत जीवस्वरूपवाचकः । अकार उकार मकारः इति । तानेकधा समभरत्तदेतदोमिति । इति तमुद्धृत्य, प्रत्यगानन्दं ब्रह्मपुरुषं प्रणवस्वरूपमिति तस्य प्रणवस्य ज्ञानानन्दलक्षणेन ब्रह्मशेषभूतपुरुषेण सह वाच्यवाचकभावनिबन्धन-

सामानाधिकरण्यनिर्देशबलेन तल्लाभात्। अनक्षरत्रयात्मकः प्रणवस्तु ओमित्यङ्गीकारे ब्रह्मणि चेत्याद्युक्तरीत्या केवलब्रह्मस्वरूपवाचक एव। योऽयं ब्रह्मस्वरूपवाचकः केवलस्वरात्मकः प्रणवः स एव यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः इत्यादौ स्वरशब्देन श्रूयते। न चास्याकारप्रकृतित्वाभावश्शङ्क्यः तदवयवस्यैव तत्प्रकृतिकत्वमिति नियमस्यात्राभावात्। अकारो वै सर्वा वाक् इति श्रुत्या, अकारस्य सर्ववर्णप्रकृतित्वाच्च। तथा चेत्थं श्रुतिप्रसिद्धस्वरप्रणव एव

'ब्रह्मणः प्रणवं कुर्यात् आदावन्ते च सर्वदा।
स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यते'॥

इत्यादि सामान्यविधिना तत्तन्मन्त्राङ्गविधायकविशेषविधिना च सर्वमन्त्रोच्चारणाङ्गतया प्रसक्तः। इत्थं प्रसक्तमिदं स्वरप्रणवोच्चारणमदृष्टार्थमेवेति दृष्टार्थग्रहणे तत्प्रापकाभावात्, स्वत एव निवृत्तं, तदिदमनूद्यते॥

'न स्वरः प्रणव' इतीति। स्वरप्रणवनिषेध एवायं अङ्गानीत्यनेन ऋषिच्छन्दो देवताशक्तिबीजवर्णविनियोगस्थानस्वरनियमादिसमस्तादृष्टार्थाङ्गनिवृत्तिरनूद्यते। न चात्र सर्वाङ्गनिवृत्तेरनूद्यत्वेन पार्थक्येन स्वरप्रणवनिवृत्त्यनुवादो व्यर्थः इति शङ्क्यम्। तस्य स्वातन्त्र्येणापि तन्निवृत्तेर्ज्ञापनार्थत्वात् संप्रतिपन्नं हि स्वरप्रणवस्य स्वातन्त्र्येणाप्यदृष्टार्थत्वं नाप्यन्यविधयः इत्यनेनाङ्गिविधिनिवृत्तिरनूद्यते तेन मन्त्राङ्गकादृष्टार्थजपहोमादीनां निवृत्तिरुक्ता भवति॥

न चैतेषामनुवादानां निष्प्रयोजनत्वम्। तेषु भगवदभिमतत्वविधानार्थत्वात्। गम्यते हि स्वतस्सिद्धानामेवार्थानां शास्त्रतः प्रतिपादने भगवदभिमतत्वम्। तथा च– इत्थमस्य वचनस्य दृष्टार्थाष्टाक्षरसर्वाधिकारज्ञापकपूर्वोक्तश्रुत्याद्यनुकूलत्वमेव॥

एतेन स्त्रीशूद्रा विनताश्चैव मन्त्रं प्रणववर्जितम् ।

इत्यादिकमपि व्याख्यातम् । सामान्यप्रणवनिषेधस्य स्वरप्रणवरूप-विशेषनिषेधपर्यवसायित्वात् । अदृष्टार्थकर्मविषयत्वाद्वा तस्मात् न स्वर इत्यादिविशेषनिषेधपरतया त्वदभिमतानां प्रमाणानामन्यथा सिद्धत्वात् । दृष्टार्थप्रणवादिग्रहणसर्वाधिकारत्वस्य पूर्वोक्तश्रुत्या सिद्धत्वाच्च नात्र कश्चिद्विरोधगन्धोऽपीत्यास्तां विस्तरः इति । अत्र—

श्रुतिरेव द्विजातीनां निःश्रेयसकरी परा ।
यतो वै श्रुतिमन्त्रेण नित्यमाराधयेद्धरिम् ॥

कैवल्यं परमं प्राप्य न भूयस्संचरेदिह ।
तदेव श्रुतिमन्त्रं स्याद्वेदस्वरविवर्जितम् ॥

तान्त्रिकं मन्त्रमित्युक्तं तदेव श्रुतिचोदितम् ।
शूद्रादीनां च सर्वेषां तान्त्रिकं मनुमुच्चरेत् ॥

विप्राणां तान्त्रिकं मन्त्रमापत्काले विधिर्भवेत् ।

इत्याद्यपि पराशरसंहिता तृतीयाध्यायादिषूक्तम्—

ओमित्येकाक्षरमिति प्रणवेन सहैव यत् ।
श्रुताष्टाक्षरतामूलमनोर्वा मुक्तकण्ठतः ॥

वैदिकत्वात्परिग्राह्या सैव स्याद्वैदिकोत्तमैः ।
ओमित्येकाक्षरश्रुत्या प्रणवः प्रथमाक्षरः ॥

नारायणायेति पदे समस्ते पदभेदतः ।
षडक्षरत्वकथनमवैदिकमयुक्तिमत् ॥

नारायणायेति पदं पञ्चाक्षरमिति श्रुतेः ।
प्रणवेन विना या सा स्मृताष्टाक्षरता क्वचित् ॥

विरोधाधिकृति न्यायान्नादर्त्तव्यैव सा बुधैः ।

इत्यादिवाक्यैः रहस्यमञ्जरी ग्रन्थादौ स्मार्त्ताष्टाक्षरस्यानादरणीयत्व-मुक्तं श्रीशेषसंहितायाम्—

‘प्रणवब्रह्मरहिताः कामगा विधिगर्हिताः ।
स्वर्गभोगप्रदास्तद्वन्नरकप्राप्तिकारकाः’ ॥

इति प्रणवरहितमन्त्राणां अनर्थकरत्वमुक्तम्—अत एव हि बालशिक्षार्था-क्षरमातृकाभ्यसनकाले स्वररहितप्रणवसहितमन्त्रवाचनम् बालानां सर्वैशिष्टैरनुष्ठीयते । पराशरसंहिता तृतीयाध्याये—

‘तारादिर्मुक्तये लक्ष्मीः बीजादिर्भुक्तये तथा’ ।

इति प्रणवादिकाष्टाक्षरमन्त्रस्य मुक्तिप्रयोजकत्वं अमिति बीजादिकाष्टा-क्षरमन्त्रस्य भुक्तिप्रयोजकत्वं च निर्णीतम्—

मन्त्रं नियतमग्र्याणां यो हीनाय प्रयच्छति ।
स वै हीनगुरुर्निन्द्यः तेन सार्धं पतत्यधः ॥

वसिष्ठसंहितायां—

स्त्रीशूद्राणां तारवर्जं मन्त्रादौ वाचयेद्गुरुः ।
प्रणवं यदि मोहेन तेषामुपदिशेत्तु यः ॥

स याति नरकं घोरं यावच्चन्द्रदिवाकरम् ।
प्रणवेन समायुक्तं स्त्रीशूद्रादिर्गृहेद्यदि ।
चण्डालयोनिमाप्नोति वर्षायुतशतानि च ॥

इत्यादिकं बिन्दुभूषितसस्वरप्रणवयुक्तमन्त्रोपदेशनिषेधकम् । व्यास-स्मृतौ उत्तरखण्डे चतुर्थाध्याये—

अत्यन्तभक्तियुक्तेषु स्त्रीशूद्रेषु स्वरोज्झितम् ।
प्रणवेनैव संयुक्तं मन्त्रं तूपदिशेद्गुरुः ॥

इति । प्रपन्नपारिजाते प्राप्त्यधिकारपद्धतौ–

शूद्राधीतिक्रमापायास्स्वरादेर्वा विलोपतः ।
द्वयस्य सर्वाधिकृतिः सर्वेषां तान्त्रिकं तु वा ॥

इति । योगयाज्ञवल्क्यस्मृतौ– व्याहर प्रणवमुन्नय बुध्या भिद्य चात्मनि । नियोजय कायमित्याद्युक्तेः । तथा च मुमुक्षुशूद्रविषय एव दृष्टार्थत्वेन स्वररहित त्र्यक्षरात्मक प्रणव सहित तान्त्रिकमन्त्राभ्यनुज्ञानं कृतमिति फलितम् । तदुक्तं सच्चरित्रपरित्राणे– इदं च तान्त्रिकमन्त्रग्रहणं मुमुक्षुशूद्रविषय एव न तु प्राकृतशूद्रविषयेऽपि– गतिरष्टाक्षरो नृणामपुनर्भवकांक्षिणां इत्युक्तेः । इति । पाद्मे–

द्वयं हि सर्वसुलभं आचारं न ह्यपेक्षते ।
उपायशून्यतां वीक्ष्य ददाति परमं पदम् ॥

इति । हारीते अष्टमाध्याये–

ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियश्शूद्रास्तथेतराः ।
तस्याधिकारिणस्सर्वे सर्वशीलगुणा यदि ॥

अनन्यसाधना ये तु अनन्यशरणास्तथा ।
अनन्यभोग्या ये राजन् त एवास्याधिकारिणः ॥

व्यापकानां च सर्वेषां ज्यायानष्टाक्षरो मनुः ।
जपेद्भोग्यतया मन्त्रं सततं वैष्णवोत्तमः ॥

न साधनतया जप्यं कर्तव्यं विष्णुतत्परैः ।

इति । सर्वप्रपन्नानां तदर्थमनुचिन्तयन्निति च दृष्टार्थं मन्त्रग्रहणं उक्तं । किं च–

सदा प्रपन्नशूद्राणां सर्वेषां मोक्षकांक्षिणाम् ।
मत्सायुज्यादिसिद्ध्यर्थं द्विजधर्मोक्तवद्भवेत् ॥

इति। पराशरसंहितायां सायुज्यमोक्षकामप्रपन्नसच्छूद्राणां स्वरयुक्त-प्रणवादिकम्, अभ्यनुज्ञातमिति प्रतीयते। तथा च पूर्वमीमांसायां– 'न हिंस्यादिति' हिंसानिषेधपरवचनस्य 'अग्नीषोमीयं पशुमालभेतेति' अग्नीषोमीयपश्वालम्भनव्यतिरिक्तहिंसानिषेधपरत्वनिर्णयवत् न स्वरः प्रणवोऽङ्गानीति प्रणवनिषेधकवचनस्य–

'सदा प्रणवसंयुक्तं मूलमन्त्रद्वयादिकम्।
वेदस्वरादिवर्ज्यं स्याच्छूद्राणां मन्त्रजापने'॥

इत्यादि प्रमाणबलेन स्वरयुक्तप्रणवनिषेधपरत्वं वक्तव्यं इति सिद्धम्। एतत्सर्वं विस्तरेण प्रपञ्चितम्– दुरुपदेशाधिकारग्रन्थे द्वितीयहेतुभङ्गे।

परं च–त्रैवर्णिकानां वेदोक्तसम्यग्भक्तिमतां हरौ।
आहुरप्युत्तमस्त्रीणामधिकारं तु वैदिके॥

इति व्योमसंहितावचनेनापि समीचीनभक्तियुक्तानां शूद्रादीनां, तादृशभक्तियुक्त उत्तमस्त्रीणां च वैदिकाधिकारस्योक्ततया न स्वर इत्यादेः मन्दाधिकारिविषयत्वसिद्धेश्च॥

१ अपरं च बृहदारण्यके पञ्चमाध्याये अष्टमे ब्राह्मणे– याज्ञवल्क्येन गार्गीं स्त्रियं प्रति ब्रह्मविद्योपदेशेन तद्बलेनापि न स्वर इत्यादेर्मन्दाधिकारिविषयत्वसिद्धेश्च। बृहदारण्यकचतुर्थाध्याय चतुर्थ-ब्राह्मणे षष्ठाध्याये चतुर्थब्राह्मणे च – मैत्रेयीं स्वभार्यां प्रति ब्रह्मविद्योपदेशात्तद्बलेनापि न स्वर इत्यादेः मन्दाधिकारिविषयत्व-सिद्धेश्च॥

२ अतश्च योगयाज्ञवल्क्यस्मृतौ, गार्गीं स्वभार्यां प्रति याज्ञवल्क्येन विस्तरेण योगोपदेशपूर्वकं प्रणवाद्युपदेशदर्शनेन तद्बले-नापि न स्वर इत्यादेर्मन्दाधिकारिविषयत्वसिद्धेश्च॥

३ एतच्च मन्त्रं सप्रणवं प्रणामसहितं प्रावर्तयध्वं मुहुः । इति सर्वाधिकारस्तोत्रप्रबन्धे तदधिकारिणस्सर्वान् प्रति कुलशेखरेण प्रणवानुसन्धानविधानात् तद्बलेनापि न स्वर इत्यादेः अमुमुक्षुविषयत्वसिद्धेश्च ॥

४ अथ च श्रीकल्पसूत्रव्याख्यातृ भट्टनाथकर्तृकद्वितीयद्राविडप्रबन्धचतुर्थशतकपञ्चमदशक चतुर्थगाथायाम्– மூலமாகிய ஒற்றை யெழுத்தை மூன்று மாத்திரை யுள்ளெழ வாங்கி, इति तदधिकारिणः स्त्रीशूद्रादीन् सर्वान्प्रति यथाक्रमं त्रिमात्रप्रणवोच्चारणविधानात्तद्बलेनापि न स्वर इत्यादेः मन्दाधिकारिविषयत्वसिद्धेश्च ॥

५ अथ किं च– கண்ணபுரமொன் றுடையானுக்கு அடியேன் ஒருவர்க்குரியேனே इति प्रणवार्थानुसन्धानपूर्वकम्– நின் திருவெட்டெழுத்தும் கற்று इति परकालसूरिभिः स्वस्य सप्रणवाष्टाक्षराभ्यासस्यानुगृहीतत्वात् । ஓமென்ன வாயு मिति तद्विषये पूर्वाचार्यैर्मङ्गळाशासनाच्च । तद्बलेनापि न स्वर इत्यादेः मन्दाधिकारिविषयत्वसिद्धेश्च ॥

६ अथापि च ध्रुवस्यानुपनीतचतुःपञ्चाब्दसम्भूतबाल्यावस्थायां सप्तर्षिभिः सप्रणवद्वादशाक्षरोपदेशस्य श्रीविष्णुपुराणलैङ्गभागवताद्युक्तत्वेन तन्न्यायेन स्त्र्यादीनामपि तत्राधिकारनिर्णयात्तेनापि न स्वर इत्यादेरन्यथासिद्धेश्च ॥

७ अथान्यच्च,

ओन्नमो वासुदेवाय तस्मै भगवते सदा ।
ओन्नमो विष्णवे तस्मै नमस्तस्मै पुनः पुनः ॥

इत्यादिष्वनुपनीतेनासुरबालेन प्रह्लादेन सप्रणवद्वादशाक्षराद्यनुसन्धानेन तद्बलेनापि तस्य अन्यथासिद्धेश्च ॥

८ अथ परं च हरिवंशे एकसप्तत्यधिकद्विशततमेऽध्याये–

इति ब्रुवन् घोरतमो जात्या हीनोऽन्यचित्तकः ।
पिशाचो भगवद्भक्तः समाधिं समपद्यत ॥ इत्यारभ्य,

'नासिकाग्रं समालोक्य पठन् ब्रह्म सनातनम् ।
निवातस्थो यथा दीपः प्रोच्चरन्प्रणवं सदा ॥

प्रणवं वाचकं मत्वा वाच्यं ब्रह्मेति निश्चितः ।

इत्यादिना घण्टाकर्णपिशाचस्य अत्यन्तनिकृष्टजातिवृत्तस्यापि भगवत्प्रेमबलेन सप्रणवयोगाभ्यासस्य प्रतिपादितत्वेन तन्न्यायानुरोधेनापि न स्वर इत्यादेरन्यथासिद्धेश्चेति ॥

९ तत्रैव तृतीयहेतुभङ्गे अथ यदुक्तं अपशूद्राधिकरणन्यायविरोधादिति तदपि दत्तोत्तरम् । अपशूद्राधिकरणे हि शूद्राणामदृष्टसाधनसामर्थ्याभावान्मोक्षं प्रति अदृष्टसाधनीभूतासु वैदिकविद्यासु अनधिकारो राद्धान्तितः । न ह्यस्माभिः शूद्राणां तदङ्गीक्रियते । येन तदधिकरणविरोधस्स्यात् । किं तु दृष्टार्थमन्त्रग्रहणस्यैव शूद्रादिसर्वाधिकारस्त्वं ब्रूमः । न च दृष्टार्थमन्त्रग्रहणादौ शूद्रादीनां सामर्थ्याभावस्तदधिकरणसिद्धः । यदाहुः असामर्थ्यं च वेदाध्ययनाभावादित्यत्र श्रुतप्रकाशिकाचार्याः उपासनोपायश्रवणधारणादि क्षमत्वलक्षणम् तस्यापि लोकसिद्धमित्यत्राह– असामर्थ्यं चेति । अलौकिकसामर्थ्याभावादित्यर्थः । इति ।

१० पूर्वतन्त्रापशूद्राधिकरणेऽपि स्वाच्छन्द्येन विद्यामार्जयतोऽपि न सिध्यत्यधिकारः । इति पार्थसारथिमिश्रेण शूद्राणामपि विद्यार्जनाभ्युपगमेन दृष्टसामग्रीसामर्थ्यसम्भवो दर्शितः । यत्तु श्मशानकल्पशूद्रसमीपाध्ययननिषेधबलेन दृष्टसामग्र्यसंभवः प्रतिपिपादयिषितः सोऽपि–

विप्राद्द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखात् श्वपचं वरिष्ठम् ।
मन्ये तदर्पितमनोवचने हितार्थप्राणः पुनाति भुवनं न तु भूरिमानः ॥

श्वपचोऽपि महीपालविष्णुभक्तो द्विजाधिकः ।
ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥

न शूद्रा भगवद्भक्ता विप्रा भागवताः स्मृताः ।
अपार्थकं प्रभाषन्ते शूद्रा भागवताः इति ॥

स विप्रेन्द्रो मुनिः श्रीमान् स यतिः स च पण्डितः ।

इत्यादीनामन्ततो गत्वा त्वयापि वैष्णवशूद्रादीनां ब्राह्मणादिवत्पूज्यत्वांशे प्रामाण्यस्य स्वीकृतत्वात् ।

शुद्रं वा भगवद्भक्तं निषादं श्वपचं तथा ।
वीक्षते जातिसामान्यात्स याति नरकं नरः ॥

इत्यादीनां जातिज्ञानप्रयुक्त तदवमति निषेधपरत्वस्य त्वयाऽपि स्वीकृतत्वात् । श्रीभक्तिसारसमीपे अध्ययनं त्यजतां ब्रह्मचारिणां तदध्ययनविस्मरणस्य पुनर्भक्तिसारानुग्रहबलात्तत्स्मरणस्य च श्रीगुरुपरंपराप्रसिद्धत्वात् । श्मशाननित्यवासिश्वपचाधमजातीयघण्टाकर्णादिभिः प्रणवानुसन्धानदर्शनात् । तस्माच्छूद्रसमीपे नाध्येतव्यमित्यादेरवैष्णवशूद्रविषयतया अकामेनापि स्वीकर्तव्यत्वादेव, न प्रभवति । तस्मान्नास्माकपपशूद्राधिकरणविरोधः, किन्तु तवैव । तथाहि त्वन्मते हि – ब्रह्मणे त्वा महस ओमित्यात्मानं युञ्जीतेति तैत्तिरीयविहिता या न्यासविद्या मोक्षोपायभूता सद्विद्यादितुल्या, सैव शरणागतिः सर्वाधिकारा नान्या व्यक्तयैक्यात्, शरणागति प्रपदनत्यागात्मनिक्षेपण न्यासाद्येषु तथैव तन्त्रनिपुणैः पर्यायता स्मर्यत इति न्यासतिलकेऽनुगृहीतत्वात् तस्याश्च विद्यायाः तान्त्रिकप्रयोगकरणमन्त्रत्वान्त्रिकाष्टाक्षरद्वयादि तस्य च अध्ययनमन्त्रसंस्कार इत्यादिकं

अभ्युपगम्यते । तदिदं सर्वमपशूद्राधिकरणविरुद्धमेव । तत्र हि शूद्राणां मोक्षोपायतया वेदविहितब्रह्मविद्यासामान्येऽनधिकारो राद्धान्तितः । तद्विरुद्धम्, तद्विशेषन्यासविद्यायास्सर्वाधिकारत्वम् । किञ्च तत्र शूद्रादीनामितिहासपुराणश्रवणं नोपायविद्यार्थमित्युक्तं तद्विरुद्धं पाञ्चरात्रादिश्रवणादिना न्यासविद्यायाः तान्त्रिकप्रयोगकल्पनम् ॥

अपि च–'संस्कारपरामर्शात्तदभावाभिलापाच्चेति' सूत्रे मोक्षोपायब्रह्मविद्योपदेशस्य, उपनयनसापेक्षत्वात्, तद्रहितानामनधिकारः उक्तः । तद्विरुद्धं च स्त्रीशूद्रादीनामधिकारकल्पनम् । अन्यच्च–'तदभावनिर्धारणे च प्रवृत्तेरिति' सूत्रेण, अनिर्धारितशूद्रत्वाभावस्य ब्रह्मविद्यानधिकारः उक्तः । तद्विरुद्धं च वैष्णवशूद्रादीनां शूद्रत्वं नापैतीत्यभ्युपगम्य तेषामेव न्यासविद्यायामधिकारकल्पनम् ॥

इतरच्च 'श्रवणाध्ययनार्थप्रतिषेधादिति' सूत्रेण 'पद्यु वा एतच्छ्मशानं यच्छूद्रः तस्माच्छूद्रसमीपे नाध्येतव्य'मित्यादिना शूद्रत्वजातिविशिष्टानां वेदाध्ययन, तदर्थश्रवण, तदनुष्ठानानां प्रतिषेधलाभात् ब्रह्मविद्यानधिकारः उक्तः । तद्विरुद्धं च वैष्णवशूद्रादीनां शूद्रत्वं नापैतीति शूद्रत्वजातिवैशिष्ट्यमभ्युपगम्य, तेषां द्वयादिवदमन्त्राध्ययन तदर्थश्रवण, तदनुष्ठानाभ्युपगमपूर्वकं न्यासविद्याधिकारवचनम् ॥

न च द्वयादीनां, वैदिकमन्त्रत्वाभावश्शङ्कनीयः । अधिगतनिगमषट्कदोऽयं द्विखण्डः इत्याचार्यसूक्त्या तात्सिद्धेः । तस्य अथातः श्रीमद्द्वयोत्पत्तिः इत्यादिना कठवल्लीखण्डद्वयोपनिषदाम्नातत्वाच्च । स्मृतीनामपि वेदमूलत्वेनैव प्रामाण्यात्, स्मृतिसिद्धानामपि मन्त्राणां वेदमन्त्रत्वानपायाच्च ॥

अन्ततो गत्वाप्यन्नमो नारायणायेत्यत्र स्वार्थाष्टाक्षरे प्रथमा-

क्षरस्य वैदिकाष्टाक्षरबीजत्वाङ्गीकारात्तस्य सर्ववेदसंग्रहत्वस्य श्रीवेदान्ताचार्यैरनुगृहीतत्वाच्च । तस्य वेदाक्षरत्वस्य त्वया दुरपह्नवत्वाच्च ॥

न च विशेषवचनबलेन शूद्रादिभिस्तदध्ययनं नानुपपन्नमिति वाच्यम् । तादृशविशेषश्रुत्यनुपलम्भात् । स्मृतिरस्तीति चेत्कि तेन श्रुतिविरुद्धस्मृतीनामप्रामाण्यात् । तथा पञ्चमवेदसारभूतगीतोपनिषत्तात्पर्यत्वेन परमगुह्यभूतस्य चरमश्लोकस्यापि कृष्णानुष्टुभमन्त्ररूपत्वेन तत्सर्वाधिकारत्वस्मृतेरपि दुर्लभत्वाच्च ॥

तस्मान्न कथञ्चिदपि शूद्रादीनां वेदान्तर्गतरहस्यत्रयाध्ययनं विशेषप्रमाणपदवीमधिरोहेदिति त्वन्मते तेषां तदध्ययनाद्यभ्युपगमः 'श्रवणाध्ययनार्थप्रतिषेधादिति सूत्रविरुद्ध एव ॥

ननु तवापि समानोऽयं दोषः इति चेत् भ्रान्तोऽसि न हि वयं वैष्णवानां शूद्रत्वजातिसद्भावमभ्युपगच्छामः । येन शूद्रसमीपे नाध्येतव्यमिति श्रुतिविरोधः स्यात् । किन्तु–'अपार्थकं प्रभाषन्ते शूद्रा भागवता इति' । इत्यादिप्रमाणानुसारात् पूर्वं शूद्रजातावुत्पन्नानां वैष्णवानां भगवत्सम्बन्धमाहात्म्यात् शूद्रत्वमपैतीत्येवं वदामः । तस्मान्नास्माकं विरोधः ॥

परं च 'स्मर्यते चेति' सूत्रे– अथ हास्य वेदमुपशृण्वतः इत्यादिना शूद्रादीनां वेदोपश्रवणादिनिषेधादनधिकारः स्थापितः । तद्विरुद्धं च शूद्रादीनामेव सतां साक्षादेव मन्त्राध्ययनादिकमिति । तस्माद्यावता वैष्णवशूद्रादीनां जात्यपगमः । न्यासापेक्षया शरणागतेर्भेदः शरणागतेरनुपायतया सद्विद्यादिकोटिबहिर्भावः मन्त्रग्रहणस्य दृष्टार्थत्वमित्यादिकमस्मत्प्रतितन्त्रं त्वया नाभ्युपगम्येत । न तावत्पर्यन्तं तत्र अपशूद्राधिकरणविरोधनिस्तारसम्भावना भविष्यतीति सिद्धमिति ॥

तत्रैव तुरीयहेतुभङ्गे—अपि च, विदुरशबरीधर्मव्याधादीनां वैदिकब्रह्मविद्यानिष्ठत्वस्य अपशूद्राधिकरणभाष्ये श्रीभाष्यकारैः शौनकवचनोपपादितत्वात्। तान्त्रिकं वैश्यशूद्राणामिति प्रायिकोक्तिरपि विद्याविहीनशूद्रविषयैव॥

न च शौनकवचनस्य प्रारब्धविद्यशूद्रविषयत्वात्प्रकृते तन्न्यायानवतारः शङ्क्यः। पराङ्कुशादिकर्तृकपूर्वसिद्धविद्यायामेवास्माभिस्सर्वेषामन्वयोक्त्या तापपुण्ड्रनामसंस्कारपूर्वकगुरुपरम्परोपदेशदशायामेव तत्सिध्या मन्त्रसंस्कारकाले सर्वेषामपि सिद्धविद्यत्वेन विरोधाभावात्॥

न च शरणागतिविद्यायाः इतरविद्यापेक्षया न्यूनताशङ्का—सत्कर्मनिरतास्सिद्धाः सांख्ययोगविदस्तथा। नार्हन्ति शरणस्थस्य कलां कोटितमीमपीत्यादिना तस्याः निरतिशयाभ्यधिकत्वात्। इति। श्रीरहस्यत्रयमीमांसाभाष्ये प्रथमाध्यायस्य द्वितीयपादे द्वितीयाधिकरणे—किञ्च

नमो नारायणेत्युक्त्वा श्वपाकः पुनरागमत्।
नमो नारायणायेति मन्त्रस्सर्वार्थसाधकः॥

इत्यादिषु सप्ताक्षरादेरपि कार्यकारित्वं सम्प्रतिपन्नम्। तथैव श्रीविष्णुचित्तसूरिभिः श्रीमत्परकालसूरिभिश्च क्रियासमभिहारेण सप्ताक्षरादेरेव अनुसन्धेयत्वमनुगृहीतम्॥

यद्यप्यर्थपञ्चकज्ञानार्थमेव मुमुक्षूणां मूलमन्त्रानुसन्धानं अनन्यप्रयोजनानां तेषां मन्त्रोच्चारणमात्रजन्यफलविशेषानपेक्षात्। न च प्रणवानुसन्धानं विना अर्थपञ्चकज्ञानं संभवतीति न सप्ताक्षरादेः कार्यकरत्वसम्भवः। न च प्रणवस्वरूपानुसन्धानमात्रेण मानसेन

अर्थपञ्चकज्ञानसंभवात् उच्चारणे सप्ताक्षरादेरेव विनियोगोऽभिप्रेतः इति वाच्यम् ॥

अत्रैवर्णिकानामष्टाक्षरजपस्य अप्रसक्तत्वेन सप्ताक्षरादेरेवोच्चारणे विनियोग इत्यभिप्रायासंभवात्। तथाप्यर्थपञ्चकज्ञानार्थमेव प्रणव-सहितोच्चारणस्य प्रसक्तस्य अत्रैवर्णिकेषु निषेधाभिप्रायः सप्ताक्षरादि-परिग्रहः। तथाहि—वेदवाक्यस्य स्वरक्रमविशेषविशिष्टस्यैव अत्रैवर्णि-केषु एकाक्षरमात्रस्यापि प्रणवस्य अध्ययननिषेधः साधनानुष्ठातृविषय एव। अध्ययनविधेरदृष्टद्वारकफलसाधनानुष्ठातृविषयतया प्रसक्त-प्रतिषेधन्यायेन विधिनिषेधयोरेकविषयत्वस्य न्याय्यत्वात् ॥

अत्रैवर्णिकमुमुक्षूणां मूलमन्त्रार्थानुसन्धानं च न साधनानुष्ठान-शेषभूतम्। मन्त्रार्थभूताकारतयानुसन्धानस्य अदृष्टद्वारकफलसाधना-नुष्ठानविरोधित्वात्। एवं स्थिते अत्रैवर्णिकमुमुक्षूणां प्रणवोच्चारणं अनिषिद्धमेव ॥

तथापि दिव्यसूरीणां सर्वाधिकारार्थं प्रवृत्तेषु दिव्यप्रबन्धेषु सप्ताक्षरादिपरिग्रहो लोकसंग्रहार्थः। अत्रैवर्णिकमुमुक्षूणां अधिकार-विशेषापरिज्ञानेन अमुमुक्षुभिः अत्रैवर्णिकैः लौकिकैः तदीयप्रणवोच्चारण-निन्दने तत्परिग्रहणे वा क्रियमाणे प्रत्यवायापत्त्या मुमुक्षूणामपि तेषां लोकनाशजनितप्रत्यवायापत्तिः। इदं च 'यद्यदाचरति श्रेष्ठः, लोक-संग्रहमेवापि' इत्यादि गीताभाष्यतात्पर्यचन्द्रिकयोः स्पष्टम् ॥

इत्थं अत्रैवर्णिकमुमुक्षुप्रणवोच्चारणस्य लोकनाशद्वारकप्रत्यवाय-करत्वं विना शूद्राणां वेदवाक्योच्चारणवत् स्वातन्त्र्येणोदाहरणे जिह्वा-च्छेदः इत्युक्तप्रत्यवायकरत्वाभ्युपगमे धारणे शरीरभेदः इति निर्दिष्टप्रत्यवायस्याप्यापत्त्या प्रणवस्वरूपानुसन्धानस्याप्यनापत्तौ मूल-मन्त्रार्थानुसन्धानमेव तेषामुच्छिद्येत इति। सदुपदेशविवेकग्रन्थे—

परमपुरुषार्थलक्षणमोक्ष-முண்டாம்போது सदुपदेशविवेक-முண்டாகவேணும்.

उपदेशत्तुक्कु सत्व-மாவது श्रीपरांकुशपरकालादिपरिगृहीत விஷயமாகை · அவ்விஷயந்தான். शेषशेषिभावापन्न-மான रहस्यत्रयमाक-க்கடவது-இவத்தில் स गुह्यो नत्रिवृद्वेदः என்கிற படியே परममन्त्रमा-ன प्रणवं शेषि-யாய் அதுக்கு मन्त्रशेषं शेष மாய் அதுக்கு द्वयं शेष-மாய் அதுக்கு चरमश्लोकं शेष-மாய் இருக்கையாலே இவத்தை शेषशेषिभावापन्न-மென்கிறது.

சிலரிவத்தில் मन्त्रशेषमात्र-மே सर्वमुमुक्षुसाधारण-மென்றார்கள். அப்போது शेषशेषिभावं குலையும் यागानधिकारि-களுக்கு प्रयाजाधिकारं போலே प्रणवानधिकारि-களுக்கு तद्वि-वरणाधिकार-மும் बाधितं शास्त्र-ங்களில் प्रणव-த்தை सर्व-ர்க்கும் शङ्खध्वनि-யோடொக்க मङ्गलावह-மென்றார்கள். बाल-ர்க்கு अक्षराभ्यास-த்தில் प्रणवाक्षर-த்தை யோதுவிக்கக் காணநின்றோம் पाठारम्भाव-ஸாநங்களிலும் हरिः ओं என்று बाल-ரும் अभ्य-ஸியாநின்றார்கள்.

ओं तपस्स्वाध्यायनिरतं என்று श्रीसंक्षेपादि-யிலும் ओं विश्वं विष्णुर्वषट्कारः என்று துடங்கி सर्वप्रहरणायुधः ओन्नमः इति என்று श्रीसहस्रनाम-த்திலும் बाल-ர்க்கு ஓதுவிக்கக் காணநின்றோம்.

प्रह्लाद ध्रुव गार्गिप्रभृ-திகளும் श्वपाक ஞன घण्टाकर्ण-னும் प्रणव-த்தைய धिक-ரித்தார்களென்னுமிடம் दूरदेशाधिकार-प्रणव-த்தைய ... षट्पदां च । वाचं த்திலே प्रपञ्चितम । 'एकाक्षरं द्विपदां. षट्पदां च । वाचं देवा उपजीवन्ति विश्वे । वाचं गन्धर्वाः पशवो मनुष्याः । वाची-मा विश्वा भुवनान्यर्पिता । என்கிற श्रुति-யிலே एकाक्षरा-மென்று प्रणव-த்தையும் द्विपदां என்று मन्त्र-சேஷத்தை யும் षट्पदां-என்று द्वय-த்தையும் चकार-த்தாலே चरम-श्लोक-த்தையும் சொல்லி देवतै-களோடு गन्धर्व-ர்களோடு पशु-க்களோடு मनुष्य-ர்களோடு வாசியற எல்லார்க்கு-முप-जीव्य-மாகச் சொல்லித்து.

ஆகவிப்படி लोकवेद ங்களில் प्रणवमुं सर्वाधिकार-மென்று सिद्धि-க்கையாலே प्रथमरहस्यं प्रणवत्तो-டே கூடியே सर्वाधि-காரமாகக் கடவது. अपशूद्राधिकरण श्रीभाष्य-த்தில் वेदानधि-कारि-களுக்கு वेदोपबृंहण-ங்களிலும் वेदार्थग्रहण-ங்கூடாது என்றருளிச் செய்கையாலே प्रणवानधि-காரிகளுக்கு मन्त्र-शेषादि-களாலே प्रणवार्थग्रहण முங் கூடாது.

वेद-த்தில் रौद्र-யாகாதிகளில் निषादादि-களுக்கு अधि-காரம் சொல்லுகையாலே तद्योग्ययुक्तवैदिकाग्निविद्यादि-களில் அவர்களுக்க-धिकार-முண்டானுப்போலே न्यासविद्यै-யை सर्वाधिकार-மாகச் சொல்லுகையாலே அவ்வித்யைக்கு मन्त्र-मात्रप्रणव-த்திலும் सर्व-ர்க்குமதிகாரம் கொள்ளவேணும்.

ब्राह्मणस्त्री-களுக்கு पूर्वापरसंस्कारा-திகளெல்லாம், स्वर-प्रणवयुक्तवैदिकमन्त्र-ங்களாலே நடந்துசெல்லாநிற்க मन्त्र-संस्कार-த்தில் वैदिकग्रहण-ங் கூடாதென்கை अश्रद्धामात्रनिबन्धनं याग-த்தில் पशु-க்களுக்குமுள்பட वैदिकोपाकरणादि கள் நடவாநிற்க, आत्मयागपशु-வாகிய शूद्रादि-களுக்கு मन्त्रसंस्कार-த்தில் கூடாதென்கையும் अनुपपन्नम् ॥

सर्वाधिकारप्रबन्ध-ங்களிலும் ओ-மென்றிழியாதே யென்றும் ओ-மென்ற வாயுமென்றும் वेदत्तुक्को-மென்றுமதுபோலென்றும் அருளிச்செய்தார்கள். रहस्य-ங்களிலும் अर्चि-रादि-யில் ओंकारं रथमारुह्य-என்றும் திருக்கோட்டியூர் நம்பி ரஹஸ்யத்திலே तिरुमन्त्र-ந்தான் ओमे-ன்றும் नमः என்றும் नारायणाय என்றும் மூன்று पदमे-ன்றும் निगमन-ப்படியிலே ओमे-ன்றும் नमः என்றும் ; नारायणाय என்றும் மூன்று பதமாய், எட்டுத் திருவக்ஷரமாயிருக்குமென்று मित्या-திகளில் प्रणव-த்தை உச்சரித்துக் காட்டி யருளினார்களிதி.

तत्रैव न्यासं सर्वा-திகாரமென்பார்க்கு. तत्करण-மான प्रणव-மும் सर्वा-திகாரமென்றே கொள்ளவேணும் द्वय-த்தாலே न्यासयोग-த்தை विधि-க்குமிடமும் ब्रह्माग्नौ जुहुयादो-मित्यनेन द्वयरूपिणा என்கிற विशेषवचन-த்தாலே प्रणवपर्यन्त-

மாம். प्रणव-த்தால் பிறக்கும் ज्ञानम्, प्रत्यनर्हतानिवर्तक-மென்றார்கள்.

अबध्नन्पुरुषं पशुमित्या-திகளில் சொல்லுகிறபடியே तदुपरि देवाः- என்கிற आचार्यन् यजमान-னாய் यज्ञो वै विष्णुः என்றும் यज्ञरूपधरं देव-மென்றும் சொல்லுகிற सर्वेश्वर-ன் देवतै-யான आत्मयाग-த்திலே, शिष्यस्वरूप-த்தை पशु-வாகச் சொல்லி आचार्यन् शिष्य-னுக்கு प्रणवादि-களால் பிறக்கும், आन्तरशुद्धिय, पुरुषपशु-வுக்கு प्रोक्षण-மென்று சொல்லித்து. पशु-வுக்கு वेदाधिकारादि-களில்லையே யாகிலும் वैदिकसंस्कारा-न्वय-மும் अबाधितं, स्त्री-களுக்கும் वैदिक-மான விவாஹத்தை उपनयन-மென்றார்கள். याग-த்திலும் याज-மான்யம் சொல்லித்து.

ब्रह्मविद्य-யான आत्मयाग-த்தில் विधुरादि-களோபாதி विधवादि-களுக்கும், स्वातन्त्र्येण कर्तृत्व-முண்டாகையாலே, स्त्री-களுக்கு प्रपत्तिये प्रणवग्रहण-த்துக்கு प्रयोजकमां, निषादस्थ-पति-க்கு विहितमान रौद्र யாகத்தை भाषामन्त्र-த்தால் செய்ய வொண்ணாதிறே.

कर्तृयोग्यतानुगुण-மாக काम्य-ங்களை நியமிக்கலாகாது. அப்போது पंगु-வுக்கும் பொய்க்காலாலே विष्णुक्रमणं संभा-वित மாகையாலே यागाधिकारं प्रसंगि-க்கும், पाञ्चरात्र-த்தில் சொன்ன न्यासविद्यामन्त्रान्तर-ங்களும் प्रणवार्थविवरणमात्र-பர மென்னுமிடம் ओमित्यनेन द्वयरूपिणा என் கையாலே ஸித்தம் அல்லாதபோது वेदविरोधम् வரும்.

எட்டிழையாய், மூன்று சரடாயிருப்பதொரு मङ्गल-सूत्रं போலே, திருமந்திரமென்கிற விடத்தில் प्रणव-த்தை प्रपन्नमङ्गलसूत्र-த்தில் முதலிழையாகவும், முதற் சரடாகவும் கொண்டு அருளிச் செய்தருளினார்.

இத்தை நாலிரண்டிழைகொண்டு, முப்பிரியான ब्रह्म-सूत्रबन्ध-த்தோடே வரிப்பிக்கவென்கிற விடத்தில் सर्वात्म-साधारणमाक आचार्यहृदय-த்தில் அருளிச்செய்தருளினார்.

திருப்பாவை மூவாயிரத்தில் ஒழிக்க வொழியாதென் கிற இடத்தில் நீ, எங்கள் கையில் தந்த मूलप्रमाण-த்தின் முதலெழுத்தைப் பார்த்துக்கொள்ளாய் என்கிறார் களென்று திருப்பாவைப் பெண்களுடைய வார்த்தையை அருளிச் செய்தருளினர் இங்கு मूलप्रमाणं मूलमन्त्र-மாதல் प्रणव-மாதல் முதலெழுத்து அகாரம் இவ்விடத்தில் ஆத் தானரும் பத வளக்கத்தில் நீ எங்கள் கையில் தந்தவென் றது आचार्यरूपना-ய்த்தந்த என்றபடி என்றருளிச் செய் தருளினர். இத்தாலிடப் பெண்களுக்கும் सप्रणवाष्टाक्षरा-धिकार-ங்காட்டப்பட்டது.

இவ்விடத்தில் ஆறுயிரத்தில், நயினரும் நீ எங்கள் கையில் தந்த मूलप्रमाण-த்தில் முதல் வரியில் முத லெழுத்தை வெட்டுதல், எங்கள் காரியம், தலைக்கட்டுதல் செய்யவேண்டாவோ என்று விசேஷித்தருளிச் செய் தருளினர். இங்கு मूलप्रमाणम्, मूलमन्त्र-மே முதல் வரி प्रथमपद மான प्रणवं முதலெழுத்து अकार-ஆக இப்படிப் பட்ட संप्रदाय-த்தின் வீறுபாடறியாமல் मूलप्रमाण-மான திருமந்திரத்தில் முதல் வரியை வெட்டினு லிடப் பெண்கள் சபிக்கும். தங்களுக்கும் மங்கள सूत्र-மடியற்று भगवत्सम्बन्ध-ங்குலைந்து स्वरूप நாசமாம்.

प्रणव-த்தோடே கூடியே தன் ஸத்தைப் பெற்றிருக் கும் திருவஷ்டாக்ஷரத்தில் प्रणव-த்தைப் பிரிக்கையாவது प्राणवियोगक-ண-மாகையால் क्रूरनिषिद्ध-மான मन्त्रपरिभव-மும் ஸித்திக்கும். श्रीलक्ष्मीतन्त्र-த்தில் ओंकारसहितानेतान्मन्त्रान्पूर्वविदो विदुः என்று व्यापकमन्त्र-ங்களெல்லாம் प्रणव-த்தோடே கூடியே मन्त्र-ங்களாகிறின வென்றும் बीजं बीजवतां जीवः शिष्टं क्षेत्रं प्रकीर्तितम्॥ என்று बीजयुक्त ங்களான मन्त्र-ங்களில் बीजांश ஜீவனென்றும் சொலலுகையாலே अष्टाक्षर-த்தில प्रणव-த்தைப் பிறிக்கை प्राणवियोजन-மாகக்கடவது.

श्रीपराशरसंहितायां सच्छूद्रர்களுக்கு सदा प्रणवसंयुक्तं मूलमन्त्रद्वयादिकम् என்றும் दीक्षायां प्रणवादि स्यात् என்றும் सप्रणवमन्त्रग्रहणं-விதிக்கப்பட்டது. श्रीशेषसंहितैயிலே अकारं बिन्दुसंयुक्तं नमो नारायणाय च । लक्ष्मीनारायणं मन्त्रं भवेदष्टाक्षरं शुभम् ॥ என்று தானான தன்மையாலே सप्रणवाष्टाक्षर-மாய் शोभन-மான मूलमन्त्र-மானது अन्नमोनारायणाय என்கிற सात्ताष्टाक्षरமாகவும் लक्ष्मीनारायण-மென்று பெயரை யுடைய द्वय-மாகவும் தானான தன்மையுமாகிற मूलमन्त्र-த்தினுடைய आकारत्रयं சொல்லி

अध्याप्य विधिवच्छूद्रान् संकरेष्वनुलोमजे ।
चण्डालेषु तुलुष्केषु मनुमिष्टार्थदायकम् ॥
सर्वसिद्धिप्रदं शीघ्रं सद्यो मोक्षप्रदायकम् ।
अष्टाक्षरं तु त्रिविधं तथा मत्प्राप्तयेऽब्जज ॥ என்று

चण्डालादि-களிலும் अर्थार्थि-களுக்கு सात्ताष्टाक्षर-மும் शीघ्रसिद्धि-காமற்கு लक्ष्मीनारायणத்தில் पूर्वखण्ड-மும் शीघ्र-मोक्षகாமற்கு उत्तरखण्डமும் भगवत्प्राप्तिसामान्यகாமற்கு தானான தன்மையான वैदिकाष्टाक्षर-மும் उपदेश्य-மென்று சொல்லிற்று. ஆக இப்படி वैदिकाष्टाक्षरத்தின் सर्वाधिकारत्वं बहुप्रमाण, उपात्तसंप्रदायसिद्ध-மாகையாலே இதின் முதல் வழியான प्रणवத்தை, வெட்டினல் ஒழிக்க வொழியாத संबन्ध-மும் நசித்து,

प्रणवब्रह्मरहिताः कामगा विधिगर्हिताः ।
स्वर्गभागप्रदास्तद्वन्नरकप्राप्तिकारकाः ॥

என்கிறபடியே अनर्थहेतु-வாம்.

विश्वपतिलोकभर्ता-வினுடைய आत्मविवाहमङ्गलसूत्र-மும், முதலிழையும் முதல் சரடுமற்று वैवर्ण्यமும் प्रसंग-க்கும் श्रीरहस्यत्रयार्थपञ्चकத்தில், பிள்ளையுறங்கா வில்லிதாஸர். प्रणव-த்தில் पाणिग्रहण-மும் नमः पद-த்தில் மணநீராட்டமும்

यक्त चतुर्थि-யில், கலவியுமாக வநுஸந்தித்தாரென்கை யாலே प्रणव-த்தை யொழிய मन्त्रशेषानुसन्धानं கூடாது.

प्रणवेन विहीनास्तु तान्त्रिका एव कीर्तिताः ।

என்று प्रणव-த்தை யொழிந்த மந்திரங்களெல்லாம் केवल-तान्त्रिक-ங்களென்கையாலே அவற்றிற்கு सकलवेदमूलं கூடாமையாலே केवलमन्त्रशेष-த்தால் सर्ववेदसारार्थनिर्णय-மும் கூடாது. तत्प्रतिपादितार्थ-ங்களில் प्रबलप्रमाणभूतप्रणवादिविरोध-शङ्के-யாலே विश्वास-மும் குலையுமாகையாலே அவ்வளவாலே प्रपत्त्यधिकार-மும் सिद्धியாது.

प्रणवத்திலுள்ளபடி स्वरूप-த்தை யறியாதாற்கு मन्त्र-शेषार्थ-மான उपायोपेय-ங்களிலபேக்ஷயு முண்டாகாது इति तत्रैव तान्त्रिकं वैश्यशूद्राणा-மென்கிற வசனத்தில் आपात-प्रतीतिमात्र-த்தாலே सत्संप्रदाय-த்தை இகழநினைக்கில் वैश्यர்களுக்கு वेदाध्ययनादि-களின்றிக்கே ஒழியும்.

श्रीगीतैயில் 17-ஞாமத்யாயத்தில்

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।

என்று துடங்கி वैश्यपर्यन्त-மான வர்ணத்ரயத்துக்கும் प्रणव-த்தோடே கூடின वेदाधिகாரம் சொல்லுமிடமும் निरर्थक-மாம் न स्वरः प्रणवोऽङ्गानि नाप्यन्यविधयस्तथा । स्त्रीणां च शूद्रजातीना-மென்கிற வசனத்தில் தனனெஞ்சல் மேலெழத்தோற்றுமதுவே ஹேதுவாக स्त्रीशूद्रादि-களுக்கு मन्त्रसंस्कार-ததில் प्रणवोपदेश-ங்கூடாதென்னில் तुल्यन्याय-த்தையாலே द्विजस्त्री-களுடைய पूर्वापरसंस्कारங்களிலும் केवलतान्त्रिकमन्त्र-ங்களாலே अनुष्ठानं प्रसंகிக்கும். இது सर्वशास्त्रसंप्रदायविरुद्धம்.

ஆகையால் तान्त्रिकं वैश्यशूद्राणां என்கிறவிடம் पाञ्च-रात्रदीक्षा-யுக்தர்களான वैश्यशूद्र-ர்களுக்கநுஷ்டேயமாய்

भगवच्छास्त्रैकवेद्य-மான நித்யநைமித்திக-கர்ம விசேஷங்களில் மந்த்ரவிசேஷநியமம் சொல்லுகிறது. न स्वरः प्रणवोऽङ्गानि என்கிற விடம் शब्दशक्ति-யிலிழிந்து जपहोमादि-களாலே கார்யங் கொள்ள நினைக்கும் स्त्रीशूद्रादि-களுக்கு स्वरादिகளாகா தென்கிறது. न स्वरः प्रणवोऽङ्गानीत्यादिवचन-த்தில் उत्तरार्ध-த்தில் मन्त्रमात्रोऽभिधीयते என்கையாலே मन्त्र-த்திலுள்புகாத स्वरप्रणवादि-களையே पूर्वार्ध-த்தில் निषेधि-க்கிறதென்னுமிடம் न्यायसिद्ध-மாகையாலே मूलमन्त्रप्रथमाक्षर-மான प्रणव-த்துக்கு सर्वाधिकारत्वं சொல்லக் குறையில்லை. श्रीतत्वदीप-த்தில் अथवास्य प्रणववर्जनं स्त्रीशूद्राद्यधिकारार्थमित्यवगन्तव्य மென்று துடங்கி तान्त्रिकत्वेन स्त्रीशूद्राधिकारत्वमुच्यते । என்னுமளவாக அருளிச் செய்ததெல்லாம் जपहोमादप्रवृत्तस्त्रीशूद्रादिविषय-மென்னுமிடம त्रिविधं कर्म संप्रोक्त-மென்கையாலே सुव्यक्तं அல்லாதபோது வைச்யர்களுக்கும் द्विजस्त्री-களுக்கும் वैदिक-संस्कार-மெல்லாம் தவிர வேணும் என்னுமிடம் முன்பே சொன்னோம்.

இப்படியே नमो नारायणेत्युक्त्वा श्वपाकः पुनरागमदिति कैशिकद्वादशीमाहात्म्यवचनात् प्रणववर्जितस्य मन्त्रस्य सर्वाधिकारत्वमवगम्यते ।

என்றருளிச் செய்ததுவும். शब्दशक्तिविषयं शब्दशक्ति-யாலே கார்யங்கொள்ளத் தேடும், स्त्रीशूद्रादि-களுக்கு प्रणवத்திலதிகாரமில்லையிறே. மனமுடையீரென்று अर्थ-த்திலிழிவார்க்கிறே वर्णनैरपेक्ष्येण प्रणवाधिकार-முள்ளது.

ஆகையிறே परन्द-படியில் प्रणवार्थ-த்துக்கெல்லாரு மதிகாரிகள். எடறினவன் அம்மேயென்னுமாப்போலே இது சொல்லுகைக் கெல்லாரும் योग्य-ரென்று. वाच्य-த்திலே யூன்றும்படியான श्रद्धावा-ன்களுக்கே प्रणवाधिकार-மும் आर्ता विषण्णा इत्यादि-களில் சொல்லுகிறபடியே दुःख-निवृत्त्याद्यर्थ-மாக केवलशब्दशक्तिमात्र-த்திலே இழிவாரெல் லார்க்கும் திருநாமாதிகாரமும் அருளிச் செய்த திதி.

तत्रैव ब्राह्मण-விஷயத்தில் अष्टाक्षरं फलान्तरहेतु-வாகா தொழிகிறது शक्ति-யில்லாமையன்று.

"नित्यकर्मप्रकारेण प्रयोगाद्यादिकं विना ।
अष्टाक्षरं च गायत्रीं मुमुक्षुर्न प्रयोजयेत्" ॥

என்று उत्तमाधिकारि-களுக்கு फलान्तरार्थमहामन्त्रप्रयोग-த்தை निषेधिக்கையால் வந்ததித்தனை.

ஆகையாலே तान्त्रिकं वैश्यशूद्राणां என்றது स्त्रीशूद्रादि-களுக்கு कर्तव्यतया पाञ्चरात्र-த்தில் விதிக்கப்பட்ட कर्मविशेष-मात्र-த்திலாகக் கடவது. ஆகையிறே அவர்களுக்கு मन्त्र-संस्कारानन्तर-த்திலே आचमनाराधनाद्युपयुक्त मन्त्रविशेष-ங்களைச் சொல்லும்போது

केवलं वैष्णवन्नाम नमः प्रणववर्जितम् ।
हुंफडादिवषट्स्वाहावर्जितं केशवादिकम् ।
अध्याप्यं स्त्रीषु शूद्रेषु तद्वदेवानुलोमजे ॥

என்று नमःप्रणवादि-களொன்றுமின்றிக்கே वैष्णवं नाम-मात्र-மே स्त्रीशूद्रादि-களுக்கு उपदेष्टव्य-மென்கிறது. இப்படி விஷயவிபாகங் கொள்ளாதபோது स्त्रीशूद्रादि-களுக்கு मन्त्रसंस्कार-த்தில் नमःपदादि-களையும், தவிரவேண்டிவரு மிறேயிதி.

तत्रैव ஆகவிப்படி திருவஷ்டாக்ஷரத்தில் प्रणव-மாகிற महामन्त्र-மே சேஷியாய் மற்றவை அம்மந்திரத்துக்கு சேஷமாகையாலே प्रणव-த்தைப் பிரிக்கையும் मन्त्रशेष-मात्र-த்தை प्रधान-மாக்குகையும் சேராது. இத்தையெல்லாம் திருவுள்ளம் பத்தியிறே. திரு मन्त्रार्थ த்தினரும்பத விளக்கத்தில் प्रणव-த்துக்கு मन्त्रशेषं விவரணமாயென்கிற இடத்தில் मन्त्रशेष-த்தை प्रणव-த்துக்கே சேஷமாகக் கொண்டு सांप्रदायिक-யோஜனையை எம்பாவய்யங்கா ரருளிச்செய்தது.

இங்ஙனே யிருக்கச்செய்தேயும் पूर्वाचार्यादि-வசனங்
களின் तात्पर्यத்திலிழியாதே, மேலே தோற்றுமது
கொண்டு सदाचारங்களை நியமித்தால்

न च संस्कारमर्हति । न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ।

इत्यादिகளையுள்கொண்ட अपशूद्राधिकरणभाष्यादिसूक्ति-
களாலும் तान्त्रिकं वैश्यशूद्राणां न स्वरः प्रणवोङ्गानि नाप्यन्य-
विधयस्तथा । स्त्रीणां च शूद्रजातीनां । जपस्तपस्तीर्थयात्रा प्रव्रज्या
मन्त्रसाधनम् । देवताराधनं चैव स्त्रीशूद्रपतनानि षट् ॥

इत्यादि मन्वादिवचनங்களாலும் शूद्रர்களுக்கு पञ्चसंस्कारादि-
களும் प्रपत्तिधर्मोपदेशाதிகளும் एकादशी व्रताद्युपदेशादिகளும்
वैश्यர்களுக்கும் वेदाध्ययनादिகளும் ब्राह्मणस्त्रीகளுக்கு
पूर्वापरसंस्कारादिகளில் वैदिकमन्त्रग्रहणादिகளும் தாங்கள்
சொல்லுகிற प्रणवादिरहितमन्त्रजपादिகளும் देवताराधनादि-
களுமெல்லாம் सवासनமாகத் தவிர வேண்டிவரும்.

तात्पर्यपरामर्शத்தாலே இவை எல்லாமன்यपरமென்னில்

स्त्रीणां च शूद्रजातीनां मन्त्रमात्रोक्तिरिष्यते ।

என்று स्त्रीशूद्राதிகளுக்கு मन्त्रशरीरमात्रं சொல்லலாமென்
கையாலே न स्वरः प्रणवोङ्गानि என்னுமித்யாதிகள் मन्त्र-
शरीरத்திலுள் புகாத स्वरप्रणवाதிகளையே निषेதிக்கிற
தென்று तात्प-ர்யங்கொள்ள வேண்டுகையாலே திருचष्टा-
क्षरத்தில் प्रणवத்தைப் பிரித்தமை சேராது.

स्वमातृसंस्काराதிகளில் प्रेत-த்தினருகே श्मशानத்தின்
நடுவிலே போய் वैदिकमन्त्र-ங்களைச் சொல்லி स्त्रीदेहத்தை
ஸம்ஸ்கரிக்கிற தாங்களே सत्वोत्तरशास्त्रविहित முமாய் केवल-
भगवत्कैङ्कर्यरूपமுமாய் सर्वाधिकारமுமாயிருந்துள்ள पञ्च-
संस्कारத்தில் स्त्रीशूद्रप्रभृतिகளுக்கு वैदिकाष्टाक्षरं சொல்லலா
காதென்பது केवलं विश्वासराहित्यத்தால் வந்ததித்தனை

श्रद्धैव कारणं पुंसामष्टाक्षरपरिग्रहे ।

என்கிற வசனத்திலே திருவஷ்டாக்ஷரத்தில் ஓரக்ஷரமாதல், அர்த்தமாதல் பிரிகதிர்படாதபடி அதிகரிக்கையாகிற तत्परिग्रहத்தில் अर्द्धக்குமேல்பட்ட ஓரதிகாரம் வேண்டுவதில்லை என்னுமிடம் कण्ठोक्तமாய்த்து. இதில் अर्द्ध என்கிற एवकारத்தாலே, ஜாத்யாசாராதிகளை व्यावர்திக்கிறது அல்லாதபோது वैयर्थ्य வருமிறே. தோல்புரையேபோமதுக்கு பழுதிலா योग्यதை வேணும். மனமுடையீரென்கிற अद्धயே அமைந்த मर्मस्पर्शिக்கு நானும் நமருமென்கிறபடியே सर्वரு மதிகாரிகளென்கிற விடத்தில் தோல்புரையே போமதுவே जात्याचारादि सापेक्षமென்னும் श्रीनरनारायण ரூபியாய் வெளியிட்டருளின वैदिकाष्टाक्षरमर्म-स्पर्शियाகையாலே अर्द्धக்கு மேற்பட்ட जात्यादिகளையபேக்ஷியாமையாலே सर्वाधिकारமாயிருக்குமென்றும் मुक्तकण्ठமாயருளிச் செய்தருளினர்.

நரன் விஷயத்தில் நாராயணன் வெளியிட்டருளினது सप्रणवाष्टाक्षरமே என்னுமதில் सन्देहமில்லையிறே परंरहस्यத்திலே वेदங்களும் ऋषिகளும். ஆழ்வார்களும் आचार्यர்களும் விரும்பிப்போரும் திருमन्त्र प्रणवத்தோடு கூடியே அष्टाक्षरமாயிருக்குமென்று ஸ்தாபிக்கைபாலே நின் திருவெட்டெழுத்துங் கற்று நானென்கிற விடத்தில் பண்ணுகிற विश्वामित्रसृष्टियும், சேராது எங்ஙனே யென்னில் परंरहस्यத்தில் ஆழ்வார்களோடு ஆசார்யர்களோடு वेदान्तங்களோடு வாசியற எல்லாராலும் एककण्ठமாக ஆதரிக்கப்படுகிற விம்மந்திரந்தான் ओमित्येकाक्षरं नम इति द्वे अक्षरे नारायणायेति पञ्चाक्षराणि इत्यष्टाक्षरं छन्दसा गायत्री चेति என்று எட்டுத் திருவக்ஷரமுமாய் மூன்றுபதமுமாய் गायत्री என்கிற छन्दஸ்ஸையு முடைத்தாயிருக்கும். ओ-मित्येकाक्षरமென்று प्रणवத்தை मन्त्रशरीरத்துக்கவயவமாக்குகையாலே யிம் मन्त्रशरीरं सकलमन्त्रसाधारणமாயிருக்கிற प्रणवத்தை யொழியவே अष्टाक्षरமாயிருக்கு மென்கிறவர்களை व्यावर्த்திக்கிறது.

नारायणायेति पञ्चाक्षराणि என்று அஞ்சக்ஷரமாகச் சொல்லுகையாலே नारा என்கிற இடத்தில் अकारத்தை ஒரக்ஷரமாக்கி இத்தை ஆரக்ஷரமாகச் சொல்லுமவர்களை ब्यावर्त्तिக்கிறது என்று प्रणवத்தை யொழிய अष्टाक्षरत्वं சொல்லுவாரை நிராகரித்து पराङ्कुशपरकालादिகளாதரித் தருளின मूलमन्त्रस्वरूपं प्रणवத்தோடே கூடியே अष्टाक्षरமாக இருக்குமென்றருளிச் செய்தருளினர். இங்ஙனமல்லாத போது, பெண்ணுக்கும், பேதைக்கும் मूलमन्त्रार्थமறிவிக் கைக்காகவே அருளிச்செய்த मुमुक्षुப்படியில் प्रणवத்துக்கு व्याख्यानं பண்ணக்கூடாதிறே. இது, தானெட்டுத் திரு வக்ஷரமாய் மூன்று पदமாயிருக்குமென்கிற விடத்திலே ஏழு திருவக்ஷரமாய் இரண்டு पदமாயிருக்குமென்னுதல் இதில் முதல் पदं प्रणवமென்னுமிடத்தில் இதில் முதல் पदं बीजं இது अकारமும் विन्दुவுமாயிருக்குமென்னுதலிறே. அப்போது அருளிச்செய்ய வேண்டுவது பெண்ணுக்கும் பேதைக்குமாக வருளிச்செய்த प्रबन्धத்தில் பெண்ணுக் கும், பேதைக்குமதிகரிக்கலான मंत्राक्षरங்களுக்கு व्याख्यानं செய்தருளாமல் அவர்களுக்கதிகரிக்கவொண்ணாத प्रणवा-क्षरங்களுக்கு व्याख्यानं பண்ணுகை अत्यन्तमसंगतமாய் விடும். ஆகையால் सप्रणवाष्टाक्षरं सर्वाधिकारமென்றே संप्रदायम्.

ஆகையிறே நானும் சொன்னேன். நமருமுரைமி னென்று திருமங்கையாழ்வார், தாமு மனுஸந்தித்து பிறர்க்கு முபதேசித்தருளின விடம் மிகவுமுபபந்நமா யிருக்கிறது. தாம் கற்றதொன்றும், பிறர்க்குமுபதேசித்த தொன்றுமாகில் विप्रलम्भकोटिயிலே யாவரிறே. நின்திரு வெட்டெழுத்துங் கற்றென்று இவர் தாம் கற்றது सप्रणवा-ष्टाक्षरமிறே. அல்லாதபோது திருமந்த்ர प्रणवादिயாக எட்டுத் திருவக்ஷரமா யிருக்குமென்கைக்கு இவ்வாழ்வார்கள் பாசுரங்கள் प्रमाणமாகக்கொண்ட விடம் சேராதிறே.

எங்ஙனே யென்னில் परंदபடியில் திருமந்திரந்தான் ओमित्येकाक्षरं, नम इति द्वे अक्षरे, नारायणायेति पञ्चाक्षराणि,

ओमित्यग्रे व्याहरेत्, नम इति पश्चात्, नारायणायेत्युपरिष्टात् ॥ என்றும் நின் திருவெட்டெழுத்துங் கற்றென்றும் எட்டெழுத்துமோதுவார்கள் வல்லர் வானமாளவே என்றும் इत्यादिகளில் சொல்லுகிறபடியே, எட்டுத் திருவக்ஷரமாய் மூன்று पदமாயிருக்குமென்று वैदिकाष्टाक्षरस्वरूपத்தில் இவ்வாழ்வார்கள் பாசுரங்களை प्रमाणமாக உதாஹரித்தருளினர்.

இவ்வாழ்வார்கள் பாசுரமெல்லாம் नमो नारायणமென்கிற षडक्षरमात्रவிஷயமாகில் वैदिकाष्टाक्षरத்துக்கிவை प्रमाणமாகக் கூடாது. प्रणवத்தை யொழிய अष्टाक्षरत्वं சொல்லும் பக்ஷமும் अत्यन्तानुपपन्नமென்று முன்பே சொல்லப்பட்டதிறே. இன்னமும் सप्रणवाष्टाक्षरத்துக்கு ஆழ்வார்களுடைய வநுஸந்தானமு முபதேசமுமில்லாதபோது शिष्टपरिग्रहங்கூடாமையாலே नाथयामुनादिகளும் नमोनारायणமென்கிற இவ்வளவே ஆகரிக்கவேண்டுகையாலே இப்போதுள்ள आचार्य புருஷர்களுமித்தை प्रणवத்தை யொழியவே अनुसन्धिक्क प्रसंगिக்கும் அல்லாதபோது ஆழ்வார் विप्रलम्भकोटिயிலே யாவரிறே. விஷ்ணுசித்தன் விரும்பிய சொல்லென்கையாலேயிறே திருப்பல்லாண்டை நன்மளிச்சராதரிக்கிறதென்றிவ்வர்த்தத்தையும் பரந்தபடியிலருளிச் செய்தருளினர்.

ஆகையால் प्रपन्नजनकूटस्थரான परांकुशपरकालादिகள் தாங்களும் अनुसन्धिத்துத் தங்களைப்பற்றின மதுரகவிகள் முதலானர்க்கு முபதேசிக்கையாலே संप्रदायपरम्पराप्राप्तமான मूलमन्त्रं प्रणवத்தோடே अष्टाक्षरமாய் अर्थानुष्ठानश्रद्धैயுள்ள सर्व-वर्णங்களுக்கும் अधिकरणीयமாயிருக்குமென்றே प्रामाणिकர்கள் கொள்ளவேணுமிதி.

तत्रैवஇன்னமும் श्रीलक्ष्मीतन्त्रத்தில் क्रियाकारकसंयोगस्तुति-संबोधलक्षणः नानासंज्ञासमायुक्तः पदात्मा मन्त्र उच्यते என்று जितन्ते என்பது नमः என்பது முதலான स्तावक शब्दங்களை पद मन्त्र लक्षணையாகச் சொல்லுகையாலே तारकापदमन्त्रமாய் नमः

पदघटितமாய் अकार, नारायणादि नानासंज्ञाघटितமான सप्रणवाष्टाक्षरமும் स्तोत्र ரூபமாயிருக்கையாலும் भक्तिस्तांत्रिकतांत्रिकமென்று श्रीशेषसंहितैயில் प्रेमपूर्वकभजनोपयोகியான स्तोत्ररूपपदमन्त्रங்களையெல்லாம் सर्वाधिकार तांत्रिक तांत्रिकத்திலே சேர்க்கையாலும். मन्मन्त्रान्विष्णुमन्त्रान्वा वासुदेवं च गारुडं। सुदर्शनं नृसिंहं वा रामं कृष्णं वराहकं। प्रणवादि जपेद्भक्त्या प्रपन्नस्सततं द्विजः। मोक्षार्थं विधिवद्ब्रह्मन् सर्वबन्धविमुक्तये। मन्मन्त्रस्तोत्रपाठादि पत्न्याद्यैश्च चतुर्मुख॥ என்று मोक्षार्थियான प्रपन्नன் स्वपत्न्यादिகளோடேகூட सप्रणवभगवन्मन्त्र स्तोत्र पाठादिகளை पठिக்கக் கடவனென்கையாலும் प्रेमं வழிந்த சொல்லான सप्रणवाष्टाक्षरத்தில் सर्वர்க்கு மதிகரிக்கக் குறையில்லையிறே.

இன்னமும் सर्वाधिकारप्रबन्धங்களில் மூன்றெழுத்துடைய பேரால் என்றும் மூன்றெழுத்ததனை மூன்றெழுத்ததனை லென்றும் மூலமாகிய வொற்றை யெழுத்தை மூன்று मात्रैயுள்ளெழ வாங்கியென்றும் अत्यन्तपापभूयिष्ठர்க்கும் सप्रणव-गोविन्दादिमन्त्रமுத்தாரகமென்று காட்டுகையாலும் 'கண்ணபுரமொன்றுடையானுக்கடியே னொருவர்க்குரியேனோ' என்கிறபடியே जीवपरसम्बन्धप्रतिपादकமான प्रणवத்தையே अनयोरेष संबन्धः स्वाभाविकोऽस्य संबन्धः इत्यादिகளில் शाण्डिल्य-भरद्वाजादिகளாலே விவரிக்கப்பட்ட न्यासयोगத்துக்கு जुहुयात्प्रणवेनाग्नौ என்று प्रणवத்தையே मन्त्रமாகச் சொல்லுகையாலும்

गृहीयान्मन्त्रराजानं मां गच्छेच्छरणं नरः।

इत्यादिகளிலே मन्त्रान्तरங்களைச் சொல்லித்தே யாகிலும் प्रणवविवरणभूतमान मन्त्ररत्नத்துக்கே द्वयशब्दमुख्यार्थत्वமும் अर्थ-पौष्कल्यமுமுண்டாயிருக்கையாலே ब्रह्माग्नौ जुहुयादोमित्यनेन द्वयरूपिणा என்று द्वयानुप्रविष्टप्रणवத்துக்கே मन्त्रत्वं சொல்லுகையாலும் शेषसंहितादिகளிலும் प्रणवத்தோடே கூடவே मन्त्ररत्नमुद्धृतமாயிருக்கையாலும் मन्त्ररत्नघटकवाक्यद्वयத்திலும் कर्तृवाचकமின்றிக்கே शाब्दबोधं दुर्लभமாகையாலே स्व-

रूपपरप्रणवानुसन्धानமாவச்யகமாகையாலும் श्रुत மான प्रणवத்தை விட்டு पदान्तराध्याहारं பண்ணில் श्रुतहान अश्रुताभ्यागमदोषங்கள் வருகையாலும் द्वयத்துக்கு सर्वाधिकारत्वं சொல்லுகிற विशेषवचनங்களாலே तदन्तर्गतप्रणवத்துக்கும் सर्वाधिकारत्वं ஸித்திக்கையாலும் न स्वरः प्रणवोङ्गानीत्यादि निषेधं मन्त्रशरीरानन्तर्गतவிஷயமாகையாலும் श्रीशेषसंहितैயிலே अंगादिप्रणवं विना என்று अङ्गोपाङ्गप्रणवங்களையே நிஷேதிக்கையாலே मन्त्ररत्नव्याख्येयतया द्वयानुप्रविष्टமாய் प्रधानமான प्रणवத்துக்கு निषेधமில்லையாகையாலும் प्रपत्तियிலிழிவார்க்கெல்லாம் प्रणवाधिकारமுண்டென்னுமிடம் अवर्जनीयமாகக் கடவது.

இன்னமும் मधुरकविகளுக்கு வந்த संप्रदायமே नाथयामुनादिகளுக்கும் வந்ததென்னுமிடம் श्रीवासुदेवसंहिता भविष्यद्वचनसिद्धமாகையாலும் श्रीवाक्यगुरुपरम्पराव्याख्यानத்தில் பெரிய ஜீயர் இவ்வர்த்தத்தை யருளிச்செய்கையாலும் मधुरकवि முதலானார் அதிகரித்தருளின वैदिकाष्टाक्षरத்துக்கடி ஆழ்வாரே யாகையாலே ஆழ்வார்க்கு वैदिकानधिकारं दुरपह्नवமாகையாலும் गीताचार्यனைப் போலே இவரும் நெறியெல்லா மெடுத்துரைக்கையாலும் अन्नमो नारायणाय என்றுதல் नमो नारायणाय என்றுதல் अन्नमो नार अयन என்றுதல் ஓரிடத்திலும் ஆழ்வார்களாதல் आचार्यர்களாதல் அருளிச்செய்யாமையாலே நின்திருவெட்டெழுத்தும், எட்டெழுத்து மோதுவார்களித்யாதிகளிலே वैदिकाष्टाक्षरத்தையே கொள்ளவேண்டுகையாலும், ஆழ்வார்கள் அதிகரித்தது वैदिकाष्टाक्षरமே யென்று ஸித்திக்கையாலே प्रणवाष्टाक्षरं सर्ववर्णाधिकारं என்னக் குறையில்லை इति.

तत्रैव दिव्यप्रबन्धங்களில் ஆழ்வார்கள் प्रणवத்தை யுச்சரித்துக் காட்டாதொழிந்தது प्रणवத்தினுடைய गुह्यतमत्वத்தைப் பற்றவத்தனை அல்லாதபோதும் द्वयத்துக்கும் सर्वाधिकारत्वமின்றிக்கே யொழியும். अर्थानुसन्धानं பண்ணினீர்களீயென்னில் ‘ கண்ணபுரமொன்றுடையானுக்கித்

யாதியில் प्रणवத்துக்குமது துல்யம். இத்தால் முமுக்ஷுப் படியில் இதில் முதல பதம ओं என்றருளிச் செய்யாதே प्रणवமென்றருளிச் செய்ததுவும் व्याख्यातम्, श्रीगद्यத்தில் अत्र द्वयं என்று द्वयத்தினுடைய गुह्यतमत्वத்தைப்பற்ற வெளியிடாதொழிந்தவோபாதி இதுவுमुपपन्नமிறே. ஆகவிப்படி ஆழ்வார்களெல்லாரும பேணிக்கொண்டதிகரித்த सप्रण-वाष्टाक्षरादिகளை असच्छूद्रவிஷயத்தில் निषेधத்தமை கொண்டு सर्वाधिकारமென்றென்னில்.

शूद्रैः पापरतैः क्रूरैर्मद्यमांसरतैरयम् ।
शरणागतिमन्त्राख्यो न जप्तव्यस्त्वसाधुभिः ॥

मद्यमांसरताश्शूद्राः परदाररतास्सदा ।
जपन्ति यदि मोहेन ते यान्ति नरकान् बहून् ॥

என்று वासिष्ठसंहितैயிலே द्वयத்தையும் அधिकृताधिகாரமாகச் சொல்லுகையாலே शूद्रादिகளுக்கு पञ्चसंस्कारகாலத்தில் द्वयத்தையுமுपदेशியா தொழியவேணும். परीक्षियாமலுபதேசிக்கில் நரகஹேதுவாமிறே. ஆகையாலே द्वयமுमधिकृताधिकारமாக प्रसंगிக்கும 'दुराचारोऽपि सर्वाशीः, अपि चे-त्सुदुराचारः, तं मातापितृहन्तारं, अपि वध्यं प्रपन्नम्, वधार्ह-मपि काकुत्स्थः, दोषो यद्यपि तस्य स्यात् प्रत्यवायो न विद्यते । आकाशं तौ वितनुते' इत्यादिप्रमाणसंप्रदायங்களோடும विरोधिக்கும். वासिष्ठसंहिते–कर्म तद्ब्रूहि என்று கர்மயோக விஷயமாகையாலும். पुण्ड्रविஷயத்தில் मध्येच्छिद्रமென்றும் एकाङ्गुलं पाद-तलस्य मूलமென்றும வேதத்திலும

वक्रं विरूपं बद्धाग्रं छिन्नमूलं पदच्युतम् ।

என்று துடங்கி पुण्ड्रमाहुरनर्थकமென்றும்

आरभ्य नासिकामूलं ललाटान्तं लिखेन्मृदम् ।
समारभ्य भ्रुवोर्मध्यमन्तरालं प्रकल्पयेत् ॥

என்று पाद्मपुराणத்திலுமாக पुण्ड्रத்தினடியில் மூன்றி

லொரு பங்கான मूलभागத்தில் अच्छिद्रत्वமும் मध्यभागं துடங்கி छिद्रமும் விஹிதமாயிருக்க वासिष्ठसंहितैயில்

एकांगुलं नासिकादौ धृत्वा सच्छिद्रमृत्तिकाम् ।

என்று सोपबृंहणश्रुतिविरुद्धமான छिन्नमूलपुण्ड्रத்தை विधिக்கையாலும் पञ्चसूनाप्रायश्चित्तமுமாய் काम्यமுமான वैश्वदेवத்தை तमंशं नैव कुर्वीतेत्यादिशास्त्रनिषिद्धமுமாய் स्वरूपविरुद्धமுமாயிருக்க அத்தை वासिष्ठसंहितैயில் பலவிடங்களிலும் श्लाघित்துக் கொண்டு விதிக்கையாலும், वेदाश्रावा हृदयं यूपः என்கிற श्रुतिயில் चौळसंस्कृतप्रपन्नகேசத்தை प्रवृत्तयोगोपयोगदर्भमुष्टि யாகச் சொல்லாநிற்க तद्विरुद्धமாக वासिष्ठसंहितैயில் प्रपन्न விதவைகளுக்கு मुण्डनத்தை விதிக்கையாலும்

विष्णुनात्तमश्नन्ति । विष्णुना पीतं पिबन्ति । "तदस्य प्रियमभिपाथो अश्याम् । नरो यत्र देवयवो मदन्ति ।" इत्यादि களில் भगवद्भुक्तोज्झितத்தை परमपावनतया भोज्यமாக वेदத்தில் சொல்லாநிற்க. அதுக்கு விருத்தமாய் वासिष्ठसंहितैயில் भगवत्प्रसादத்துக்கு पुनस्संस्कारத்தால் शुद्धि விதிக்கையாலும் இப்படி, பலவகைப்பட்ட वेदविरोधகளாலே अन्यपरமென்றுதல் अप्रमाणமென்றுதல் त्रैगुण्यविषया वेदाः என்னுமாப்போலே तामसाद्यधिकार விஷயமென்றுதல் विषय विवेकं பண்ணி द्वयத்துக்கு सर्वाधिकारत्वं स्थापिக்கப் பார்த்தாலும்

केवलं वैष्णवं नाम नमःप्रणववर्जितम् ।
हुंफडादिवषट्स्वाहावर्जितं केशवादिकम् ॥

अध्यात्मं स्त्रीषु शूद्रेषु तद्वदेवानुलोमजे । என்றும்
इतरेषां सङ्कराणां तथा तान्त्रिकतान्त्रिकम् ।
मानुषं भाषया युक्तं तद्वत्तान्त्रिकतान्त्रिकम् ॥ என்றும்

श्रीशेषसंहितैயில் स्त्रीशूद्रादिகளுக்கு नमःपदादिகளும் கூடாதென்றும் ऋषिகளாலும் मनुष्यர்களாலும் கல்பிக்கப்பட்ட भाषामन्त्रங்களே அவர்களுக்கு योग्यமென்றுஞ் சொல்லுகை

யாலே कठवल्ली वाक्यद्वयரூபமாய் परमवैदिकமான द्वयத்துக்கு अधिकृताधिकारं तदवस्थமாம் இன்னமும்

वक्ष्ये तन्मूलमन्त्रस्य त्वङ्गमात्राणि शास्त्रतः ।
मूलमन्त्रार्थसिद्ध्यर्थं तत्वज्ञानात्मशुद्धये ॥
मन्त्ररत्नं चक्रराजं वाराहं नारसिंहकम् ।
रामं कृष्णं हयग्रीवं जपेद्ब्रह्मविदब्जज ॥

என்று शेषसंहितैயில் द्वयத்தை மூலமந்த்ரத்துக்கு अङ्गமாகச் சொல்லுகையாலும் न स्वरः प्रणवोङ्गानि என்று स्वरादिகளோடொக்க अंगங்களையும் निषेधिக்கையாலும், स्त्रीशूद्रादिகளுக்கு द्वयानधिகாரம் दुरपह्नवமாம். ஆகையால் கீழ்ச் சொன்னபடியே शास्त्रங்களையெல்லாம் व्यवस्थितविஷயங்களாகக்கொண்டு यथासंप्रदायं न स्वरः प्रणवोङ्गानीत्यादिகளை मन्त्रशरीरத்திலுள் புகாத प्रणवादिनिषेधபரமாகவும், அது தானும். सामान्यस्त्रीशूद्रादिவிஷயமாகவும் கொண்டு सप्रणवाष्टाक्षरादिகளுக்கு श्रद्धावत्सर्ववर्णाधिकारत्वं சொல்லுகையே निरपायமான शास्त्रार्थமென்று.

सदुपदेश விவேகமுண்டானலல்லது परमपुरुषार्थलक्षण मोक्षलाभं दुर्लभமாகையாலே पराङ्कुशपरकालादिपरिगृहीतமான शेषशेषिभावापन्न सप्रणवाष्टाक्षरादिவிஷயக सदाचार्योपदेசமே परमपुरुषार्थलक्षणमोक्षகாமற்கு उपादेयமென்று सर्वं समञ्जसं इति ॥

विस्तरस्तु पूर्वाचार्यग्रन्थतात्पर्यदीपिका, सच्चरित्रपरित्राण-पूर्वोक्तग्रन्थादिषु सम्यग्द्रष्टव्यः । अतः प्रपन्नाचार्यैः पञ्चसंस्कारகாலே सर्ववर्णशिष्याणां स्वररहितप्रणवसहिताष्टाक्षरोपदेश एव कर्तव्यः इति सिद्धम् ॥

इति सदनुष्ठानदर्पणे स्त्रीशूद्रादीनां वैदिकप्रणवराहित्येन तान्त्रिकप्रणव-सहिताष्टाक्षरोपदेशविषयो नाम त्रयोदशप्रतिफलनम् ॥

श्रीरस्तु

॥ चतुर्दशप्रतिफलनम् ॥

प्रपन्नानां तापादि संस्कार कर्त्राऽऽचार्येण तत्समय एव प्रपत्तिः कारयितव्या वचनात् शिष्टाचाराच्च। तथाहि नारायणसंहितायां–

यथाहि पाणिग्रहणं रक्षाबन्धादिपूर्वकम् ।
एकस्मिन्नेव युगपत् मूहूर्ते क्रियते रमे ॥

शरणागतिरप्येवं हेतितापादिपूर्वकम् ।
एकस्मिन्नेव काले वै कार्या शिष्यस्य देशिकैः ॥ इति ।

ननु तस्मात् ब्राह्मणः त्रिभिः ऋणवा जायते ब्रह्मचर्येणर्षिभ्यः, यज्ञेन देवेभ्यः प्रजया पितृभ्यः इति ऋणत्रयं श्रुतं । त्रितदपाकरणाय यज्ञादिकं कर्तव्यं, अन्यथा प्रत्यवायात् । तदनन्तरं अन्त्यकाले, आनुकूल्याद्यङ्गपञ्चकसहितसाधनप्रपत्तिः कर्तव्या तत्पूर्वं तदनुष्ठाने महान् प्रत्यवायः स्यात् ॥

'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानः पतत्यधः' ॥

इति मनुस्मृतेः इति चेन्न शरणागतिनिष्ठस्य ऋणाभावात्, तदर्थं यज्ञादिकं न कर्तव्यं । तथा च श्रुतिः–ऋषयः कावषेया ऊचुः यूयं वर्णधर्मिणः तस्मिन्दृष्टे परावरे, किमर्थं वयमध्येष्यामहे किमर्थं वयं यक्ष्यामहे किं प्रजया करिष्यामः येषां नोऽयमात्मेति । श्रीभागवते एकादशस्कन्धे, पञ्चमाध्याये वसुदेवं प्रति नारदः–

देवर्षिभूतात्मनृणां पितॄणां न किङ्करो नायमृणी च राजन् ।
सर्वात्मना यश्शरणं शरण्यं (नारायणं लोकगुरुं प्रपन्नः)
गतो मुकुन्दं परिहृत्य कृत्यम् ॥

इति पाठान्तरम् । अस्य श्लोकस्य पूर्वाचार्यव्याख्या—स पुरुषः कृत्यं पञ्चयज्ञादिकं परिहृत्य त्यक्त्वा सर्वलोकशरण्यं मोक्षदायिनं सर्वभावेन शरणं गतवान् । स सर्वेषां अनृणी अकिङ्करः इत्यर्थः । लोके पुरुषः उत्पत्तिकाले देवऋषिभूतनृपितृ ऋणैः सह जायते । जननानन्तरं तेषां ऋणं पञ्चयज्ञाद्यैः जपतर्पणाद्यैश्च परिहरति— किंच यज्ञैश्च देवऋणं अध्ययनेन ऋषिऋणं, बलिप्रदानेन भूतऋणं, अतिथिपूजया मनुष्य ऋणं पुत्रोत्पादनेन पितृऋणं च परिहरति— एभिः साधनैः ऋण-विमोचनं कुर्वन्ति ॥

न चेत, तेषां देवादीनां किङ्करो भवेत् । सः पुरुषः एतदृणपरिहारसाधनानि च सर्वकर्माणि च निरस्य मनसा भगवन्तं शरणं गतश्चेत तेषां अनृणिकः अकिङ्करो भूत्वा परमपदं गच्छतीति भावः । तत्कथमिति शङ्कायां एभिः साधनैः निवारणीय ऋणं शरणागतिमात्रेण भगवान् स्वयं धारयित्वा देवानां राक्षसेभ्यो, भयप्राप्तिकाले, तद्भयनिवारणं कृत्वा, तदुपकारेण देवऋणं निवारयति, यज्ञविघ्नकरान् राक्षसान हत्वा ऋषिऋणं निवारयति। भूतानां स्वकीयांशभूतैः राजभिः बलिप्रदानं कारयित्वा भूतऋणं निवारयति । अतिथीनां, मनुष्याणां प्रपन्नमुखदर्शनेनैव तेषां पापनाशनं कृत्वा अतिथिऋणं परिहरति— धनऋणमस्ति चेत, वस्तुवासिनां प्रपन्नस्य सुकृतं दत्वा तदृणमपि परिहरति— पितृणां परमं पदं दत्वा पितृऋणं परिहरति— प्रपन्नस्य, गृहागताः पितरः त्रिःसप्तसंख्याकाः परमपदं गच्छन्ति । तथा प्रह्लादं प्रति भगवानाह—

पिता त्रिःसप्तभिः पूतः पितृभिस्सहितोऽनघ ।
सत्साधोऽस्य गृहे जातः भवान्वै कुलपावनः ॥
यत्र यत्र च मद्भक्ताः प्रशान्ताश्शुभदर्शनाः ।
साधवस्समयाचाराः ते पृथक्ते त्रिकीटकाः ॥ इति ।

शरणागतानां पञ्चयज्ञादयश्च देवऋषिपितृतर्पणाद्याः यजन, अध्ययन, बलिप्रदान अतिथिपूजादयश्च कर्तव्या न भवन्ति। मन्दाधिकारिणामेव लोकसंग्रहार्थं आज्ञाकैङ्कर्यरूपेण यथाशक्ति कर्तव्या भवन्तीति उचितकाल एव शरणागतिः कर्तव्या। श्रीविष्णुपुराणे–

तस्माद्बाल्ये विवेकात्मा यतेत श्रेयसे सदा।
बाल्ययौवनवृद्धाद्यैः देहिभावैरसंयुतः ॥

इति। द्राविडश्रुतौ–

கிளரொளி யிளமை கெடுவதன் முன்னமிதி.

तत्वसारे–

दुर्लभं सद्गुरूणान्तु सत्सङ्गाद्यदुपस्थितम्।
तदनुज्ञा यदा लब्धा स दीक्षावासरो महान् ॥

ग्रामे वा यदि वारण्ये क्षेत्रे वा दिवसे निशि।
आगच्छति गुरुर्दैवात्तदा दीक्षां प्रकाशयेत् ॥

अवश्यं वैष्णवीं दीक्षां प्रविशेत्सर्वयत्नतः।
दीक्षिताय विशेषेण संसिद्धिर्नात्र संशयः ॥

इति। भारद्वाजे च–

प्रसादनानामीशस्य श्रेयसी शरणागतिः।
न जातिभेदं न कुलं न लिङ्गं न गुणक्रियाः।
न देशकालौ नावस्थां योगो ह्ययमपेक्षते ॥ इत्याद्युक्तेः,

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।

इत्यत्र प्रपत्तेः नियोगविषयत्वं न सम्भवति तस्याः अनुपायत्वात्। आकिञ्चन्यविश्वासादीनां नियोज्य विशेषणत्वम्, न सम्भवति। अव-

घातस्वेदवत्सम्भावितस्वभावत्वात् । इत्थमेवानुगृहीतं सिद्धतात्पर्यटिप्पण्यामाचार्यपादैः ॥

तदेवं केवलभगवदाराधनभूतानां धर्माणां फलकारणत्वायोगात्, तदन्तर्गतायाः प्रपत्तेः स्वद्विवक्षितोपायत्वविशेषस्य असंभावितत्वात्, अनुपायस्य च नियोगविषयत्वायोगाच्च मामेकं शरणं व्रजेत्यत्र प्रपत्तेर्नियोगविषयत्वमनुपपन्नमेव । ननु भगवतः तत्तत्फलदानस्य, महोदारत्वप्रयुक्ततया तदंशे—चेतनव्यापाराणां साधनत्वासंभवेऽपि, भगवद्गुणविषयताप्रतिबन्धकप्राचीनपापनिवृत्तिं प्रति साधनत्वे विरोधाभावात, प्रायश्चित्तानामिव प्रपत्तेरपि नियोगविषयत्वं युज्यत एव, तथा चानुगृहीतमाचार्यैः—

‘ जितकौस्तुभ-चौर्यस्य संराजस्सर्वपाप्मनाम् ।
शिष्टं ह्यात्मापहारस्य निष्कृतिः स्वभरार्पणम्’ ॥

इतीति चेन्मैवं । प्रायश्चित्तानां नैयोगिकत्वासंभवात । अविज्ञाता सहस्रांशुरित्यादिप्रसिद्धादज्ञातृत्व (१) रूपभगवत्स्वभावात्, दोषभोग्यत्वरूप (२) वात्सल्यबलात् (३) पुरुषकारबलाच्च प्राचीनपापनिवृत्तिसम्भवेन तदर्थं चेतनव्यापारानपेक्षणात् । तथा चानुगृहीतं भाष्ये—स्वशासनातिवृत्तिव्यवसायनिवृत्तिमात्रेण अनाद्यनन्तकल्पोपचितदुर्विषहानन्तापराधानङ्गीकारेण निरतिशयसुखसंवृद्धये स्वयमेव प्रयतते इति । तत्वसारे च—

दुष्कर्मव्यवसायतस्तु विरतो यस्तस्य पुंसः पुरा
भूयोजन्मसमार्जितान्यगणितान्यागांस्यनादृत्य यत् ।
तस्यानन्तसुखाप्तये च यतते लक्ष्मीसहायः स्वयं
तत्कारुण्यपुरस्सरो गुणगणस्तस्यायमुज्जृम्भते ॥

इति । एवं 'क्षाम्यस्वहो तदभिसन्धिविराममात्रात्' । इत्यादिकमप्यनुसन्धेयम् । तस्माद्भगवत्कल्याणगुणाः स्वविषयस्य प्रातिकूल्याभिसन्धिविराममात्रमेवापेक्षन्ते । न प्रातिकूल्यविराममपि, तथा सति वात्सल्यादीनां अनवकाशप्रसङ्गादिति ॥

तत्रैव प्रपत्तेः आत्मापहारप्रायश्चित्तत्वमप्यनुपपन्नम् । परद्रव्यापहारिणः सानुतापस्य समर्पितापहृतद्रव्यस्यैव शास्त्रेषु प्रायश्चित्ताधिकारोक्त्या समर्पणरूपायाः प्रपत्तेरेव प्रायश्चित्तत्वाभ्युपगमे अधिकारिविशेषणविधेययोः ऐक्यापत्त्या आत्माश्रयप्रसङ्गात् । न च समर्पणव्यक्तिभेदाश्रयणेन तदुपपत्तिः अनुतापप्राप्त समर्पणे सिद्धे सति पुनरप्यात्मापहारं विना समर्पणान्तरस्य अनुष्ठातुमशक्यत्वात् । न च विधिबलात् समर्पणीयद्रव्यस्य लाभार्थं परब्रह्मणः सकाशात् प्रतिग्रहमुखेन स्वात्मरूपं समर्पणीयद्रव्यं सम्पाद्यम् पश्चात्समर्पयितुं शक्यते इति वाच्यम् । आत्मापहारमन्तरेण प्रतिग्रहीतृस्वरूपस्यापि असिद्धतया तदयोगात् । आत्मापहारेणैव प्रतिग्रहीतृस्वरूपस्यापि सम्पादने बुद्धिपूर्वकमेवात्मापहारस्य अभ्यासप्रसङ्गेन तस्याप्रतीकारतया, तत्प्रायश्चित्तस्यैव असंभवप्रसङ्गाच्च ननु कथं तर्हि 'शिष्टं ह्यात्मापहारस्येति' आचार्यसूक्तिः उपपद्यते इति चेत् प्रपत्तेः भगवद्गुणविषयीकारार्हाधिकारि विशेषणीभूतप्रातिकूल्याभिसन्धि विराममात्रात्मकज्ञापनार्थं तया तदुपपत्तिरिति पश्यतु भवान् । तथात्वे हि "स्वशासनातिवृत्तिव्यवसायनिवृत्तिमात्रेणानाद्यनन्त कल्पोपचितदुर्विषहानन्तापराधानङ्गीकारेणेति" भाष्यैकार्थ्यादाचार्यसूक्तिस्सुसंगता स्यात् । अत एव हि श्रीराममिश्रादिभिः भगवत्प्रवृत्तिविरोधि स्वप्रवृत्तिनिवृत्तिः प्रपत्तिरित्यनुगृहीतमुपपद्यते तस्मात्प्रायश्चित्ततयापि प्रपत्तेर्नियोगविषयत्वमनुपपन्नमेवेति प्रपत्तेर्विषयत्वम् दुरुपपादमेवेत्यन्यत्र विस्तरः ॥

अथ किन्नाम साधनप्रवृत्ति नियोज्य विशेषणम्, आकिञ्चन्यमेवेति चेत् किमिदम्, सर्वोपायशून्यत्वरूपम्, उत कतिपयोपायशून्यत्वं वा? नाद्यः उपायप्रपत्तियोग्यस्य सर्वोपायशून्यत्वायोगात्। नापि द्वितीयः, तस्य भक्त्यादिसाधारणत्वेन तदयोगात्। अथ गुरूपायभूतभक्त्यशक्तिः लघूपायभूतप्रपत्तेर्नियोज्य विशेषणमिति चेत्, न तस्या अपि कर्मज्ञानाद्यधिकारिसाधारणत्वात् प्रपत्तेरपि भक्त्यङ्गत्वाद्बाधः। प्रपत्तिभिन्नभक्ति, अङ्गभक्त्येतदुभयाशक्तेरेव विवक्षणे तु, अङ्गप्रपत्तिशास्त्रस्य अनवकाशप्रसङ्गः। अथ महाविश्वास एव स्वतन्त्र प्रपत्ति नियोज्य विशेषणमित्युक्तौ, अङ्गान्तर्गतस्य विश्वासस्याधिकारत्वं अनुपपन्नम्, सिद्धत्वसाध्यत्वयोर्विरोधात्॥

"इयं केवललक्ष्मीशोपायत्वप्रत्ययात्मिका।
साधनं भगवत्प्राप्तौ स एवेति स्थितिर्दृढा।
साध्यभक्तिः स्मृता सैव प्रपत्तिरिति गीयते"॥

"नारायणं सलक्ष्मीकं प्राप्तुं तच्चरणद्वयम्।
उपास इति विश्वासो द्वयार्थः शरणागतिः"॥

इत्यादिषु प्रपत्तेरपि विश्वासात्मकत्वोक्त्या विधेयाधिकारिविशेषणयोः ऐक्यप्रसङ्गः। किंच भगवदेकोपायत्वाध्यवसायात्मकमहाविश्वासस्य, भगवद्व्यतिरिक्तोपायान्तरपरिग्रहप्रतिबन्धकतया तदेकोपायप्रपत्त्यधिकारोक्तिः, वैराग्यातिशयस्य काम्यकर्माधिकारत्वोक्तिवत् बाधितार्थैव। अपि च महाविश्वासस्यापि भक्त्यादिसाधारणतया तत्तथात्वानुपपत्तिश्चेति। तत्रैव स्थलान्तरे–अथ काश्चात्रेतिकर्तव्यताः आनुकूल्यस्य सङ्कल्पादय एवेति चेन्न, प्रपत्तेः क्वचिदप्येवं परापेक्षा न विद्यते इत्युक्तनैरपेक्ष्यविरोधात् सर्वधर्मान्परित्यज्येति प्रपत्त्यङ्गतया सर्वधर्मोपादाननिषेधविरोधाच्च। न च सर्वधर्मान्परित्यज्येत्यादि-

निषेधस्य प्रसक्तिसापेक्षत्वेन दुर्बलत्वाच्चोदनालिङ्गकातिदेशप्राप्तानां भक्त्यङ्गानां न तौ पशू करोतीति प्रतिषिद्धयोः आज्यभागयोरिव पाक्षिकानुष्ठानसत्त्वान्नैरपेक्ष्यादिवचनानां पाक्षिकाननुष्ठानमात्रपरत्वान्न विरोधः इति वाच्यम् । तथा सति गुरुलघुविकल्पानुपपत्तेः षोडशिग्रहणाग्रहणयोरिवात्रापि फलभेदाद्विकल्पः इति चेत्, कथमत्र फलभेदः? विलम्बाविलम्बाभ्यामेवेति चेत्, तथा सति अविलम्बितफलायाः प्रपत्तेः कर्मज्ञानादिसर्वभक्त्यङ्गसापेक्षतया सर्वाधिकारत्वं न स्यात् । किंच सिंहव्याघ्रविषधरादिष्वानुकूल्यसङ्कल्पस्यात्यन्तमशक्यतया तस्य इतिकर्तव्यतात्वानुपपत्तेश्च ॥

चराचराणि सर्वाणि भूतानि भगवद्वपुरिति सर्वेषां भगवद्वपुष्ट्वानुसन्धानेनानुकूल्यं सम्भवतीति नाशक्यतेति चेन्न, अग्निज्वालादिषु सहस्रवारं भगवद्वपुष्ट्वानुसंधानेऽपि दाहकतया प्रातिकूल्यस्यैव दर्शनात् । प्रह्लादादिविषये तथा आनुकूल्यं श्रूयते इति चेत् तर्हि तादृशानुकूल्यस्य भगवत्साक्षात्कारमन्तरानुपपन्नतया, आनुकूल्यसंकल्पविधेर्भगवत्साक्षात्कारविधौ पर्यवसानप्रसङ्गात् । न च आहार्यात्मकानुकूल्यसंकल्पस्यैव अत्र विवक्षितत्वान्न दोषः इति वाच्यम् ॥

'आनुकूल्येतराभ्यां तु विनिवृत्तिरपायतः' इति विनियोगवचनविरोधात् । आहार्यात्मकानुकूल्यसंकल्पादेः परहिंसाद्यपायनिवर्तकत्वायोगात् । एवं प्रातिकूल्यवर्जनमप्यशक्यमेव । रज्जुसर्पभ्रान्तिदशायामपि प्रातिकूल्याभिसंधाननिबन्धनभयादीनां सार्वजनीनत्वेन तादृशप्रातिकूल्यस्य साधनान्तरानुष्ठानमन्तरा साक्षात् त्यक्तुमशक्यत्वात् तत्रापि आहार्यसंकल्पमात्रमङ्गं इत्युक्तौ, श्रुतहानं अश्रुतकल्पनं च स्यात् । प्रातिकूल्यवर्जनस्यैव अङ्गत्वं श्रुतं तत्परित्यक्तं । संकल्पस्य अङ्गत्वं अश्रुतं तच्च परिकल्पितमिति । एवं विश्वासस्या-

ध्यङ्गत्वमनुपपन्नम् । प्राचीनसुकृतफलस्य तस्य विधेयत्वायोगात् । तथा चानुगृहीतम्, श्रीमन्निक्षेपरक्षायाम्— निर्णीतशास्त्रप्रामाण्यकस्य प्रज्ञाततरसमस्ततदर्थस्यापि क्वचिदर्थे वस्तुवैचित्र्यादघटितवदवभासमाने शास्त्रार्थान्यथाथाभावभावसंभावनायामोहप्रवाहे मुहुः परिप्लवमानायाः सम्भवात् । केषांचिदेवातिशयितपुण्यानां तदुच्छेदो न तु सर्वेषां इति ॥

ननु, यद्यपि विश्वासमहत्वं स्वरूपतः उपादातुं न शक्यते । तथापि यथावस्थितप्रपत्तिशास्त्रात् अर्थनिश्चयसंस्कारद्राढिमसंपादनद्वारा तत्कार्यविश्वासमहत्वस्य विधिविषयतया युज्यत इति चेत् प्रपत्तेः क्षणमात्रसाध्यत्वभङ्गप्रसङ्गः । प्रपत्तिशास्त्रार्थनिश्चयसंकारद्राढिम्नः चिरकालमननसाध्यत्वात् । अस्यैव महाविश्वासस्य अधिकारत्वाभ्युपगमेन पुनस्तस्याङ्गतया विधेयत्वानुपपत्तेश्च तथा चानुगृहीतं श्रीमन्निक्षेपरक्षायाम्—येषां यावज्जीवं बृहस्पतिप्रभृतिभिरपि प्रतिवादिभिः संक्षोभ्यमाणानां प्रपत्तिशास्त्रार्थे शङ्काशङ्कुर्नाङ्कुरति । तेषां तदधिकारः इति ॥

न च क्रियाविशेषान्तर्गतसमन्त्रकदेवतास्मरणादिवत् विश्वासस्मरणनियमे विधिव्यापारः इति वाच्यम् । ज्ञानावस्थाविशेषस्य विश्वासस्य सतः स्वतो भासमानत्वेन तज्ज्ञानस्य पाक्षिकाप्राप्तेरभावेन नियमविध्ययोगात् । तदनुसन्धानेमन्त्रकरणत्वनियमो विधीयते इति चेत् तर्हि सन विश्वासरूपाङ्गविधिः किन्तु मन्त्रविशेषनियमविधिरेव— सच अनेनैव तु मन्त्रेण स्वात्मानमपि निक्षेपेदिति वाक्यान्तरादेव प्राप्तः इति । विश्वासविधिरनर्थक एव ॥

किंच विधिवाक्यात् विश्वासस्यानुष्ठेयतासिद्धौ तस्य मन्त्रेणानुस्मरणं सिध्येत्— तदसिद्धौ अनुष्ठानमप्यसिद्धमेवेति । विश्वासविधेः मन्त्रार्थानुस्मरणविधौ पर्यवसानं अनुपपन्नमेव ॥

किंच विश्वासविधेः तदनुस्मरणविधानपरत्वोक्तौ श्रुतहानं अश्रुतकल्पनं च स्यात् ॥

रक्षिष्यतीति निश्चित्य निक्षिप्तस्वस्वगोचरः ।
अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम् ।
रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा ॥

इत्यादौ विश्वासस्यैव साक्षादङ्गत्वं श्रूयते । तत्परित्यक्तम् । विश्वासानुस्मरणस्य कुत्राप्यङ्गत्वं न श्रुतम् । तच्च परिकल्पितं इति ॥

एवं गोप्तृत्ववरणमपि रागप्राप्तत्वान्न विधेयं तस्य सर्वोपायसाधारणत्वेन प्रपत्त्यसाधारणेतिकर्तव्यतात्वानुपपत्तिश्च भगवतः सर्वाधिकारिगोप्तृत्वस्य स्वतस्सिद्धत्वेन तस्य प्रार्थनीयत्वानुपपत्तिश्च गोप्तृत्ववरणस्य उपायनैरपेक्ष्यप्रार्थनायां पर्यवसानमिति चेत् । तर्हि तादृशप्रार्थनायाः उपायान्तरप्रवृत्तिविरुद्धत्वेन उपायप्रपत्यङ्गत्वासंभवः । गुरूपायनैरपेक्ष्यप्रार्थनायामेव पर्यवसानमित्युक्तौ अनुकल्पभूतलघूपायाधिकारिणः गुरूपायाशक्ते गुरूपायनैरपेक्ष्यस्यापि भगवतः स्वतस्सिद्धत्वेन तत्प्रार्थनाया अप्ययोगात् ॥

किञ्च गोप्तृत्ववरणविधेः नैरपेक्ष्यप्रार्थनाविधानपरत्वोक्तावपि श्रुतहानं अश्रुतकल्पनं च स्पष्टमेव गोपायिता भवेत्येवं गोप्तृत्ववरणं स्मृतं इति श्रूयते– तत्परित्यक्तं त्वं गुरूपायनिरपेक्षो भवेति वरणं कुत्रापि न श्रूयते । तच्च परिकल्पनीयमिति ॥

एवं कार्पण्यस्याप्यङ्गतया विधेयत्वं अनुपपन्नम् ।

'त्यागो गर्वस्य कार्पण्यं श्रुतशीलादिजन्मनः ।'

इत्युक्तस्वरूपस्य तस्य शास्त्रीयसर्वोपायदरिद्रतया गर्वप्रसक्तिरहितमाकिञ्चनं प्रतिविधातुमशक्यत्वात् ॥

न चोपायानन्तर्गतधर्मानुष्ठानजनितगर्वत्याग एवात्र विधीयते इति नानुपपत्तिरिति वाच्यम् । कार्पण्येनाप्युपायानां विनिवृत्तिरिहोदितेति । विनियोगप्रकारप्रतिपादकवचनविरोधात् ।

उपाया नैव सिध्यन्ति ह्यपायबहुलास्तथा ।
इति या गर्वहानिस्तद्दैन्यं कार्पण्यमुच्यते ॥

इति कार्पण्यस्वरूपप्रदर्शकवचनविरोधाच्च ।

अशक्तस्यातिकृच्छ्रेषु दुराशादार्ढ्यशालिनः ।

इत्युक्तरीत्या स्वाधिकाराज्ञानेन दुश्शकसाधनान्तरप्रवृत्तानां प्रपत्त्यधिकारिणां उपायान्तरश्रुतशीलादिप्रयुक्तगर्वप्रसक्तसत्वात्, तद्विषये कार्पण्यविधिवचनम्, तद्विनियोगप्रकारवचनं च उपपद्यत इति वाच्यम् ॥

तथा सति तादृशदुराशारहितविषये प्रपत्तेः षडङ्गत्वभङ्गप्रसङ्गात्, तेषां त्यक्तव्यगर्वाभावेन तत्यागलक्षणकार्पण्यानुष्ठानायोगात् न च उपायान्तराशक्तत्वादिलक्षणस्वाधिकारानुसन्धानमेव कार्पण्यशब्दार्थ इति नानुपपत्तिरिति वाच्यम् ॥

तथा सति श्रुतहान अश्रुतकल्पनयोः प्रसङ्गात् । उपायान्तरानुष्ठानप्रयुक्तगर्वत्यागो विधीयते तत्परित्यक्तं, सर्वोपायसाधारणस्य तत्तदधिकारानुसन्धानस्य कुत्राप्यङ्गत्वं न श्रुतं तस्य च कार्पण्यरूपप्रपत्त्यसाधारणाङ्गतया, विधानं कल्पनीयमिमिति ॥

किञ्च अधिकारिविशेषं प्रति विहितस्योपायस्य अधिकारानुसन्धानमन्तरेणानुष्ठातुमशक्यतया प्रधानविधिबलादेवाधिकारानुसन्धानस्यापि प्राप्तत्वात् पुनस्तस्य विधानमप्यनुपपन्नम् ॥

तस्मादानुकूल्यादीनां विधेयत्वपक्षे सर्वत्र, श्रुतार्थपरित्याग-पूर्वकं विश्वामित्रसृष्टिरेव करणीयेति शास्त्रोक्तानां आनुकूल्यादीनां इतिकर्तव्यतात्वमनुपपन्नमेव ॥

ननु आनुकूल्यसंकल्पादीनां संभावितस्वभावत्वं वदतामपीयं विश्वामित्रसृष्टिः आवश्यकवेति चेन्न, यथाश्रुतानां आनुकूल्यसंकल्पादीनामेव सिद्धोपायफलतया प्रपन्नेषु सम्भावितत्वात् ॥

अथ कोऽत्र कर्ता जीव एवेति चेत्, सः किञ्चिन्मिश्रवेषेण कर्ता निष्कृष्टवेषेण वा नाद्यः आत्मा, यजमानः, शरीरमिध्मं इति श्रुतिविरोधात् — योऽहमस्मि स सन् यजे । वपुरादिषु योऽपि कोऽपि वा इत्यादि विरोधाच्च । तत्र सर्वत्र यथावस्थितात्मस्वरूपस्यैव-कर्तृत्वावगमात् ॥

नापि द्वितीयः, निष्कृष्टवेषस्य नियोगविषयकर्तृत्वासंभवात् । नियोगकर्तृत्वं हि — "स्वतन्त्रः कर्ता" इत्युक्तस्वातन्त्र्यसापेक्षं तच्च स्वातन्त्र्यं औपाधिकत्वात् चेतनस्य अचिद्विशिष्टवेषनिष्ठं न तु स्वरूप-निष्ठं भगवच्छरीरभूतचेतनस्य पारतन्त्र्यैकस्वरूपत्वात् । न च ज्ञानक्रिया-कर्तृत्वरूपज्ञातृत्वस्यप्रत्यगात्मनः स्वाभाविकत्वात् प्रपत्तेः ज्ञानरूपत्वाच्च न दोषः इति वाच्यं स्वाभाविकासंकुचितज्ञानाश्रयतारूपज्ञातृत्वस्य स्वाभाविकत्वेऽपि करणसापेक्षविधेयज्ञानक्रियाविशेषकर्तृत्वस्य, स्वाभा विकत्वायोगात् । तत्त्वसारे च—

" आदावीश्वरदत्तयैव पुरुषः स्वातन्त्र्यशक्त्या स्वयं
तत्तज्ज्ञानचिकीर्षणप्रयतनान्युत्पादयन्वर्तते " ।

इत्यनुगृहीतम्, किञ्च यदि चेतनस्य स्वातन्त्र्यं स्वरूपान्तर्गतं तदा अहङ्कारममकारयोः स्वरूपान्तर्गतत्वात् तत्कार्यविषयान्तरप्रावण्यादीनां

उपादेयत्वमेव स्यात् । तथा च सः स्वराड्भवति स्वातन्त्र्यमतुलं लब्ध्वा, सयदि पितृलोककामो भवतीत्यादिष्वापातप्रतीत्यर्थ एव साधीयानित्यविद्या निर्बर्हणार्थशास्त्राणां दत्तजलाञ्जलिता स्यात् । तस्माच्चेतनानां प्रथमप्रवृत्तौ स्वातन्त्र्यलक्षणं कर्तृत्वं केवललीलार्थमेव भगवता विशिष्टवेषे स्वेच्छया कल्पितमिति । निष्कृष्टवेषे तदभावात् निष्कृष्टस्वरूपस्य उपायप्रपत्तिकर्तव्यत्वमनुपपन्नमेव ॥

ननु मोक्षदशायां कैङ्कर्यकर्तृत्वस्येव उपायप्रपत्तिकर्तृत्वस्यापि स्वाभाविकत्वमुपपद्यत इति चेन्न, कैङ्कर्यकर्तृत्वस्य 'क्रियतामिति मां वदे' त्युक्तरीत्या प्रयोज्यकर्तृतामात्ररूपत्वेन स्वातन्त्र्यप्रयुक्तत्वाभावात्, अत एव चेतनस्य फलित्वावहत्वाभावाच्च पारतन्त्र्यानुरूपतया स्वाभाविकत्वसंभवेऽपि ईश्वरप्रेरणां विनैव, तदनुमतिमात्रेण चेतनानां स्वफलेच्छया तत्तत्साधनप्रवृत्तेः स्वातन्त्र्यप्रयुक्तत्वात्फलित्वावहत्वाच्च । पारतन्त्र्यविरुद्धत्वेन तादृशोपायप्रपत्तिकर्तृतायाः स्वाभाविकत्वायोगात् ॥

एतेन, चेतनस्य कर्तृतायाः स्वाभाविकत्वे प्रमाणतया कर्ता शास्त्रार्थवत्वात्' इत्यधिकरणोदाहरणं प्रत्युक्तं तत्र कर्तृत्वसामान्यसद्भावसमर्थनेऽपि प्राप्ताप्राप्तविवेकेन स्वातन्त्र्यप्रयुक्तस्वरूपविरुद्धकर्तृतायाः स्वाभाविकत्वासमर्थनात् । सांसारिके प्रवृत्तिकर्तृताया इव साधनप्रपत्तिकर्तृताया अपि स्वातन्त्र्यसापेक्षत्वात् फलित्वावहत्वाच्च स्वरूपविरुद्धत्वाविशेषेण प्रकृतिसंबन्धोपाधिकत्वसिद्धेः निष्प्रत्यूहत्वात् ॥

तथा च भाष्ये– यच्च प्रकृतेः क्रियमाणानीत्यादिना गुणानामेव कर्तृत्वं स्मर्यत इति तत्सांसारिकप्रवृत्तिषु अस्य कर्तृता सत्त्वरजस्तमोगुणसंसर्गकृता । न स्वरूपप्रयुक्तेति प्राप्ताप्राप्तविवेकेन गुणानामेव

कर्तृतेत्युच्यत इति, अत्र सांसारिकप्रवृत्तिकर्तृतायाः स्वरूपप्राप्ततयैव गुणसङ्गकृतत्वनिर्णयात् ॥

उपायप्रपत्तिकर्तृतायामप्ययं निश्चयः समान एवेति। निष्कृष्ट-स्वरूपस्यात्मनः उपायकर्तृत्वमनुपपन्नमेवेति। तत्रैव तस्माच्छ्रवण-वरणादीनां न प्राकृतविशिष्टकरणकलेबरविशिष्टस्वरूपनिष्ठत्वम्। उपायप्रपत्तेस्तु स्वातन्त्र्यसापेक्षत्वात् अधिकारबोधावच्छेदकदेवादि-विशेषभ्रमसापेक्षत्वाच्च प्राकृतत्वविशिष्टकरणादिविशिष्टस्वरूपनिष्ठत्व-मावश्यकमेवेति तत्रैवायं दोषः असाधारणः शास्त्रवश्यानामेव हि उपायान्तराधिकारः। शास्त्रवश्यता च विशिष्टवेषस्यैव ॥

द्वयश्रवणादिकन्तु नैवं नित्यसूरिष्वपि ' கேட்டாரார் வானவர்கள் ' इति तत्सद्भावादिति। तत्रैव स्वप्रवृत्त्युद्देश्यभोग-स्यैव नमश्शब्देन निषेधात् तस्माज्जीवानां, स्वभोगोद्देश्यकप्रवृत्तेः निष्कृष्टस्वरूपविरुद्धत्वात्तादृगव्यापारान्तर्गत उपायप्रपत्तिकर्तृत्वं नि-ष्कृष्टजीवस्वरूपस्य दुरुपपादमेव ॥

अथास्य किं फलं सर्वपापविनिर्मोचनमेवेति चेन्न तस्याहं मोक्षयिष्यामीति सिद्धोपायकार्यत्वेन श्रूयमाणतया तस्य प्रपत्तिफल-त्वायोगात्। न च अहं मोक्षयिष्यामीति। ईश्वरस्य फलप्रदान-कर्तृत्वोक्तावपि तत्र तस्य करणत्वानुक्तया प्रपत्तेः करणत्वमबाधित-मिति सर्वपापविमोचनस्य प्रपत्तिफलत्वमुपपद्यत इति वाच्यम्। शरणपदेन तत्रभगवतएवकरणत्वोक्तया तदयोगात् ॥

समानप्रकरणे लक्ष्मीतन्त्रे– प्रपद्याम्यात्मनात्मानं निर्धूता-खिलकल्मषमिति मोक्षप्रदानकर्तृत्वकरणत्वयोः भगवत एव प्रतिपाद-नाच्च, किञ्च लक्ष्मीतन्त्रे–

एवं मां शरणं प्राप्य वीतशोकभयक्लमः ।

निरारम्भो निराशीश्च निर्ममो निरहंकृति ।
मामेव शरणं प्राप्य तरेत्संसारसागरम् ॥

इत्यत्र एवं मां शरणं प्राप्येति शरणागतिमुक्त्वा वीतशोकभयक्लमः इत्यारभ्य मामेव शरणं प्राप्येति, अन्तेन, शोकनिवृत्त्यादिसिद्धोपायसिद्धिपर्यन्तं शरणागतिफलमभिधाय तदनन्तरं सिद्धोपायफलतया संसारसागरंतरणोक्त्या अत्रापि तदनुसारेण "मोक्षयिष्यामीति संकल्पात्मकसिद्धोपायकर्तृकवरणविशेषात्मकसंबन्धविशेषेण सिद्धोपायलाभस्यैव फलतयोक्तेः वक्तव्यत्वेन, तद्विरोधाच्च ॥

न च सिद्धोपायलाभस्यैव प्रपत्तिफलत्वमस्तु को दोषः इति वाच्यम् । तथा सति प्रपत्तेः अधिकारिविशेषणात्मकत्वसिद्धया अस्मन्मतप्रवेशापत्तेः न च सिद्धोपायसिद्धि प्रत्यदृष्टविधया शरणागतेः साधनात्वाभ्युपगमान्न दोषः इति वाच्यम् । "दृष्टे सम्भवत्यदृष्टकल्पनायाः अन्याय्यत्वात्" नित्यसिद्धस्य सिद्धोपायस्य, प्रतिबन्धकनिवृत्तिमात्रसापेक्षत्वेन, भगवत्प्रवृत्तिविरोधिस्वप्रवृत्तिनिवृत्तिरूपतया श्रीराममिश्राद्युक्तायाः प्रपत्तेः प्रतिबन्धकाभावात्मकदृष्टविधयैवोपकारत्वोपपत्तेरिति ॥

अतः तापादिसंस्कारकर्त्राचार्येणैव तापादिसंस्कारसमय एव, तादृशी प्रपत्तिः कारयितव्या तापादिसंस्कारकर्त्राचार्यं विहाय अन्याचार्येण कालान्तरे प्रपत्तिकरणे आचार्यापचारप्रसक्तेः । तापादिसंस्कारचतुष्टयविशिष्टस्य चेतनस्य तत्कर्त्राचार्येण वा अन्याचार्येण वा कालान्तरेण प्रपत्तिकरणे तापः पुण्ड्रस्तथा नाम, मन्त्रो यागश्च पञ्चमः अमी परमसंस्काराः पारमैकान्त्यहेतवः इति भरद्वाजोक्तत्वेन

तावत्पर्यन्तं परमैकान्त्यासिद्धेः एकाचार्येण एककाल एव प्रपत्तिकारयितृत्वप्रतिपादकवचनविरोधाच्च ॥

तथैवोक्तं नारायणसंहितायाम्–

अथ तापादिसंस्कारविधानक्रम उच्यते ।
वैदिकं तान्त्रिकं वाग्निं प्रतिष्ठाप्य यथाविधि ॥

आचार्योऽग्निमुखं कृत्वा प्रथमं नियतश्शुचिः ।
तस्मिन्नग्नौ प्रतप्याथ शङ्खं चक्रं च देशिकः ॥

शिष्यस्य दक्षिणे वामे शुभे च प्रयतो गुरुः ।
अङ्कयेत्कृपया ताभ्यां रक्षाबन्धनपूर्वकम् ॥

आर्येणैव स्वशिष्यस्य बाह्वोर्मूले यथाविधि ।
तप्ताभ्यां शङ्खचक्राभ्यामङ्कनं ताप उच्यते ॥

तद्धस्तेनैव स्वशिष्यस्य फालदेशादिषु क्रमात् ।
मृदा शुभ्रोर्ध्वपुण्ड्राणां धारणं पुण्ड्र उच्यते ॥

तत्तन्नामानुगुण्येन दत्तानां तेन सादरम् ।
भगवद्दास्यनाम्नां हि धारणं नाम उच्यते ॥

शिष्यस्य दक्षिणे श्रोत्रे मूले तेन यथाविधि ।
मन्त्रविध्यनुसन्धानरहस्यानां यथाक्रमम् ॥

कृपयैवोपदिष्टानां धारणं मन्त्र उच्यते ।
पश्चादव्यवधानेन, तेनैव गुरुणा तदा ॥

मन्त्ररत्नानुसन्धानपूर्वकं तस्य सादरम् ।
भगवत्पादयोरात्मनिक्षेपो याग उच्यते ॥ इति ।

अत्र प्रपन्नानां तापादिसंस्कारकर्त्राचार्येणैव प्रपत्तिः कारयितव्या । सा च तापादिदिन एव करणीयेति प्रतिपादितम् ॥

यत्तु सच्चरित्ररक्षायां ब्रह्मरात्रे—

नाचरेद्वामहस्तेन न नखैरपि कारयेत् ।
आत्मनैवात्मनोऽङ्गेषु नेतरेण तु कारयेत् ॥ इति ।

अन्यहस्तेन ऊर्ध्वपुण्ड्रधारणनिषेधकं वचनं तत्पञ्चसंस्कारकालव्यतिरिक्तविषयं मन्तव्यम् । अतः प्रपन्नानां तापादिसंस्कारकर्तृकाचार्येणैव तापादिसंस्कारदिन एव प्रपत्तिः कारयितव्येति सिद्धम् ॥

इति सदनुष्ठानदर्पणे पञ्चसंस्कारकरणदिन एव मन्त्रोपदेशानन्तरं तदाचार्येण प्रपत्तिकारयितव्यत्वविषयो नाम पञ्चदशप्रतिफलनम् ॥

श्रीरस्तु ॥ शुभमस्तु ॥ आयुष्यमस्तु ॥

॥ श्रीरस्तु ॥

गोष्ठ्यां सर्वश्रीवैष्णवानां श्रीपादतीर्थस्वीकारविषये प्रमाणम् ॥

प्रपन्नाः आचार्यजन्यर्क्षदिवसादौ गोष्ठ्यां श्रीपादतीर्थं स्वीकुर्वन्ति । तदुपपन्नम्—

तीर्थं सुपावनं भोग्यं आद्यन्तनतिपूर्वकम् ।
त्रिवारं स्वीकृतं गोष्ठीनिष्ठैरार्यैर्महात्मभिः ॥

इत्यादिवचनात्, शिष्टाचाराच्च ॥

ननु नारदीये दशमाध्याये—

स्वपादार्द्रजलं यत्तु यः पिबेत् मतिमोहतः ।
आयुः क्षीणश्च विद्येत रौरवं नरकं व्रजेत् ॥

इत्युक्तत्वेन, स्वपादसंस्पर्शात्तीर्थं दुष्टमिति मैवं वादीः ॥

स्वपादस्पृष्टिमन्तरा लोके शुद्धतीर्थस्य अश्रुतदृष्टचरत्वात् तथा सति, पुण्यतीर्थावगाहनादीनां त्वयापि नित्यमनुष्ठीयमानानां स्वपाद-पायूपस्थजलस्नानपानरूपत्वापत्त्या परिहरणीयत्वापातात् ॥ नहित्वं स्वपादपायूपस्थादिकं, दूरतः संस्थाप्य पुण्यतीर्थावगाहनादिकं कर्तुं शक्नुयाः। येन स्वमतेऽप्ययं दोषः न प्रसजेत् ॥

यदि च स्नावगाढेऽपि पुण्यतीर्थे स्वलिङ्ग संबन्धाद्यननुसंधानेन भगवत्संबन्धमात्रानुसन्धानात्। स्नानपानादिकं न दूष्यत इत्युच्येत। तर्हि दिव्यगोष्ठी तीर्थग्रहणेऽपि दीयतां दृष्टिः। तत्रापि–स्वसंबन्धा-ननुसन्धानेन भागवत श्रीपादतीर्थत्वबुद्ध्या तत्स्वीकरणस्य, परम-पावनत्वोपपत्तेः ॥

अत्र प्रमाणानि संग्रहे–

शेषत्वं प्रणवे ज्ञात्वा पारतन्त्र्यं नमः पदे।
भजन्त्यन्योन्यदासत्वं स्वतन्त्र स्वामिशासनात् ॥ इति।

स्मृत्यन्तरे–

गङ्गासेतुसरस्वत्याः प्रयागान्नैमिशादपि।
पावनं विष्णुभक्तानां पादप्रक्षालनोदकम् ॥ इति हारीते–

महाभागवतानां च पिबेत्पादोदकन्तु यः।
स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ॥

चक्राङ्कितस्य विप्रस्य पादप्रक्षाळितं जलम्।
पुनाति सकलं लोकं यथा त्रिपथगा नदी ॥ इति।

पराशरस्मृतौ उत्तरखण्डे भागवतसमाराधनविधिनामक-द्वाविंशाध्याये—शापात्तु रघुनाथस्य विमुक्ता गौतमी नदी ।
वैष्णव्या स्नानतीर्थेन संगता शुभवारिणा ॥

रक्षसापहृता सीता तेन पृष्टा महात्मना ।
न शशंस तदा तस्यै गौतमी तमसावृता ।
तेन शप्ता तदा गङ्गा राघवेण महात्मना ॥

न त्वं शंससि दुर्बुद्धे ज्ञात्वाऽपि मम जानकीम् ।
अद्यप्रभृति सर्वैस्तु न स्नातव्या भविष्यसि ॥

एवं शप्ता भयाद्गङ्गा रामेण परमात्मना ।
पुरस्कृत्य मुनीन् सर्वान् राघवं शरणं गता ॥

कृताञ्जलिपुटादीना तुष्टाव रघुसत्तमम् ।
कृपया प्राह देवेशो गौतमीं शरणागताम् ॥

शबर्या स्नानपुण्येन सङ्गता शुभवारिणा ।
मुक्ता गोदावरी त्वं हि महाशापाद्भविष्यसि ॥

इत्युक्त्वा धनुषाऽकृष्य शबर्या सेवितं जलम् ।
गौतम्या सेवितं चक्रे लोकानां हितकाम्यया ॥

ततःप्रभृति लोकेऽस्मिन्गौतमी लोकपावनी ।
तीर्थानामग्र्यतां लेभे वैष्णव्यास्तीर्थसङ्गमात् ॥

तस्मात्तु वैष्णवाः पूज्याः पावयन्ति जगत्त्रयम् ।
तेषां पादोदकात् श्रेष्ठं नास्ति तीर्थं न संशयः ॥ इति ।

तथा पाद्मे—

त्वत्पादकमलोद्भूतां गङ्गां त्रैलोक्यपावनीम् ।

त्वमेव हि जगन्नाथ त्वच्छापान्मोक्तुमर्हसि ।

ततः प्रोवाच धर्मात्मा शरणागतवत्सलः ।
शबर्याः स्नानपुण्येन सङ्गता शुभवारिणा ॥

विमुक्ता भव मच्छापात् गङ्गे पापविनाशिनि ।
एवमुक्त्वा तु काकुत्स्थः शबरी तीर्थमुत्तमम् ॥

गङ्गया सङ्गतं चक्रे शार्ङ्गकोट्या महाबलः ।
महाभागवतानां तु तीर्थं यस्योदरे विशेत् ॥
तच्छरीरं जगद्वन्द्यं भविष्यति न संशयः ।
एवमुक्त्वा तु काकुत्स्थः ऋश्यमूकगिरिं ययौ ॥ इति ।

ब्रह्माण्डे–

अतिपापप्रवृत्तोऽपि विष्णुचक्राङ्कितस्य तु ।
पादोदकं पिबेत्सद्यः सर्वपापैः प्रमुच्यते ॥

उपवास सहस्राणि ब्रह्महत्यायुतानि च ।
पादोदकेन विप्रस्य विलयं याति शैघ्रयतः ॥ इति ।

संग्रहे–

अन्त्यकालेऽपि यस्यास्यै दीयते पादयोर्जलम् ।
सोऽपि सद्गतिमाप्नोति यश्चाचार बहिष्कृतः ॥
अपेयं पिबते यश्च भुङ्क्ते यश्चाऽप्यभोजनम् ।
अगम्यगमनो यो वै पापाचाराश्च ये नराः ॥
तेपि पूता भवन्त्याशु तेषां पादाम्बुधारणात् ।
तप्तकृच्छ्रान्महाकृच्छ्रात्पञ्चगव्याद्विशिष्यते ।
चान्द्रायणात्सर्वकृच्छ्रात् वराकादपि सुव्रतः ॥ इति ।

पराशरस्मृतौ–

प्रायश्चित्तमिदं गुह्यं महापातकिनामपि ।
वैष्णवांघ्रिजलं शुद्धं भक्त्या संप्राश्यते यदि ॥

एतत्समस्तपापानां प्रायश्चित्तं मनीषिभिः ।
निर्णीतं भगवद्भक्तपादोदकनिषेवणम् ॥ इति ।

विजयसंहितायाम्–

पितुर्मृताहात्पूर्वेद्यू रात्रावध्ययनं द्विजैः ।
कार्यं द्रमिडवेदस्य पितृतृप्तिर्न चान्यथा ॥

तदा तदनुसन्धानं कुर्वतामादरात्सताम् ।
तेषां पादांगुळिस्पर्शत्रिकपूर्वकमादरात् ॥

बाहुभ्यां स्वाहृतं पात्रे किञ्चित्कारपुरस्सरम् ।
तीर्थं सुपावनं भोज्यं आद्यन्तनतिपूर्वकम् ॥

त्रिवारं स्वीकृतं गोष्ठीनिष्ठैरार्यैर्महात्मभिः ।
पश्चात्त्रिवारं स्वीकृत्य स्वयं चाचार्यहस्ततः ॥

परेद्युस्तान्समाहूय श्राद्धकर्ताऽथ वैष्णवः ।
शिष्टप्रबन्धाध्ययनं कारयित्वाऽऽर्यकैर्मुदा ॥

तत्पादतीर्थमाहृत्य पात्रे निक्षिप्य भक्तितः ।
निमन्त्रितानां विप्राणां भोजनानन्तरं द्विज ॥

तेषां पादोदकं पात्रे स्वयमाहृत्य तद्द्वयम् ।
मिलित्वा विधिवत्पीत्वा कृतकृत्यो भविष्यति ॥ इति ।

वैखानसागमे भगवद्वचनम्—

वैष्णवानां विशेषेण धर्मविद्धर्मसंयुजाम् ।
अन्योन्यपादजं तीर्थमन्योऽन्यशुभदं भवेत् ॥

अकृत्यमिति ये मूढाः पादतीर्थं विशेषतः ।
निन्दन्ति ते श्वविष्ठायां जायन्ते क्रिमिरूपगाः ॥

सुरामांसभुजां नृणां ब्रह्मद्रोहसमायुजाम् ।

यत्पापं तद्भवेदस्य पादतीर्थस्य निन्दनात् ।
मधुमांसभुजां वासः नरकेषु विजायते ॥

पादोदकद्विषां ते च नालं पापविनुत्तये ।

मयैतन्मतमेवं यो ज्ञात्वा साधु सुवर्तते ।
स एव मम भक्तस्यात् अन्यो भ्रष्टो भवेद्ध्रुवम् ॥ इत्यादि ।

श्रीमन्त्रार्थकठिनपददीपिकायां नमश्शब्दार्थविचारप्रकरणे पूर्वाचार्यनिर्वाहः—

'शेषत्वं प्रणवे ज्ञात्वा पारतन्त्र्यं नमः पदे ।
भजन्त्यन्योन्यदासत्वं स्वतन्त्रस्वामिशासनात्' ॥

तदीयशेषत्वं प्रमाणसिद्धமேயாகிலும் तदीयருடைய परस्परशेषत्वानुसन्धान முண்டாகில் ஒருவனைக் குறித்தொருவனுக்கு ஒருக்காலே शेषत्वமும் शेषित्वமுமுண்டாகை விருத்தம். ஆகையாலே அது கூடாதே யென்னில் அப்படியன்று. भगवच्छेषत्वத்தினுடைய पर्यवसानवृत्तியாலே शेषत्वமே தனக்கு असाधारणரூபமாக வனுसन्धेयं शेषित्वந்தன்னை யொழிந்த भागवதர் பக்கலிலேயாயிருக்கும். இப்படியே எல்லா சேதனர்க்கும் தனித்தனியே अनुसन्धान முண்டா

மளவில் शेषत्व-शेषित्वங்கள் व्यवस्थितங்களாகையாலே விரோதமில்லையாகையால் तदीयशेषत्वமும் மிகவுமுபபந்நம् इति ।

यथा वाराहे–

पिबेत्पादोदकं यस्तु वैष्णवानां ममापि वा ।
न तत्राचमनं कुर्यात् यथा सोमे द्विजोत्तमः ॥ इति ।

श्रीपाञ्चरात्रे–

विष्णोर्नैवेद्यशेषस्य तीर्थपादोदकस्य च ।
पुरोडाशस्य सोमस्य शेषदोषो न विद्यते ॥

विष्णुतद्भक्ततीर्थं वा पीत्वा धृत्वोर्ध्वपुण्ड्रकम् ।

न क्षालयेत्करं विद्वान् नैवेद्यप्राशनेऽपि च ।
क्षालयेद्यदि मोहेन पञ्चपातकमाप्नुयात् ॥ इति ।

पराशरस्मृतौ–

तिस्रः कोट्योऽर्धकोटी च तीर्थानि भुवनत्रये ।
वैष्णवांघ्रिजलात्पुण्यात्कोटिभागेन नो समम् ॥ इति ।

श्रीवैष्णवसमयाचारनिष्कर्षे उशनस्मृतौ–

यत्र भागवतानां तु पादोदकनिषेवणम् ।
पावनं सर्वभूतानां सोमपानसमं स्मृतम् ॥

इत्यादि वचनैः सोमविक्रयिणः–अन्योच्छिष्टभोजनकर्तुश्च प्रायश्चित्त-विधानेऽपि सोमपाने उच्छिष्टदोषाभावः भगवद्भागवत श्रीपादतीर्थे आद्यन्ताचमनाभावः । शेषदोषाभावश्चाङ्गीकृतः । तद्वत् भागवत-

गोष्ठ्यां श्रीपादतीर्थविनियोगकाले पूर्वोक्तप्रमाणोपपत्तिसंप्रदायप्रदर्शन-रीत्या अनेक श्रीवैष्णव श्रीपादतीर्थबाहुल्येन स्वपादसंसर्गदोषा-भावोऽपि शिष्टैरङ्गीकृतः ॥

तथैवोक्तं सच्चरित्रपरित्राणे भरद्वाजः –

नित्यमच्युतभक्तानां कुर्यात्पादावनेजनम् ।
तत्तीर्थमुपयुञ्जीत महापातकनाशनम् ॥ इति ।

अत्र विशेषः –

गुरूणामन्तिमतिथौ जन्मभे श्रवणेऽपि वा ।
हरिमभ्यर्चयेद्भक्त्या तद्भक्तांश्च विशेषतः ॥

इत्युक्तपराङ्कुशादि जन्मर्क्षदिवसेषु नानादेशीयमहाभागवत-सम्मेळने सति तत्र स्वेतरसमस्तभागवत श्रीपादतीर्थोपयोजनस्य प्रत्येकमावश्यकतया तदर्थं प्रत्येकं स्वेतरसर्वतीर्थग्रहणे कालातिपातेन तीर्थस्यैवासिद्ध्यापत्त्या तन्त्रेण सर्वतीर्थग्रहणं न दुष्यति । तत्र यथासंकल्पं तीर्थानां तादर्थ्यस्य व्यवस्थिततया स्वार्थेषु स्वेतरसर्व-तीर्थेषु स्वार्थमसंकल्पितस्वकीयतीर्थसंसर्गस्यादूषकतया भूयसां तीर्थानां माहात्म्येन पुण्यतीर्थावगाहनन्यायेन नान्तरीयकस्वपादसंसर्गस्य अकिं-चित्करत्वात् ॥

प्रत्येकं स्वयं सर्वेषां तत्स्वीकरणमुपपन्नम् । न हि स्वार्थस्व-पादावनेजनं स्वयं संकल्पयति किन्तु परैः परार्थं क्रियमाणमनु-मन्यते अतः संकल्पविशेषात् तादर्थ्ये व्यवस्थिते सति असंकल्पित-संसर्गः अकिञ्चित्करः । यथाहि– संसृष्टयोरपि ऐन्द्रशेषमैत्रावरुणा-भ्युन्नीतयोः सोमरसयोः संकल्पवशात्तादर्थ्यं व्यवस्थितं तद्वत्प्रकृतेऽपि व्यवस्था सिध्यति ॥

अत्रेदमवधेयम् । संसृष्टयोः एकपात्रस्थसोमरसयोः ग्रहणे इन्द्रपीतस्येति मन्त्रेण इन्द्रोद्देशेन एकस्य सोमरसस्य भक्षणम् क्रियते । मैत्रावरुणपीतस्येति मन्त्रेण मित्रावरुणोद्देशेन एकस्य सोमरसस्य भक्षणं यागादौ क्रियते तत्र मानसिकसंकल्पभेदेन भेदः अङ्गीकृतः । नतु पात्रभेदेन भेदः । तद्वदत्रापीति भावः ।। इति ।

वरश्च धर्मिलोपात्सर्वेषां तन्त्रेण ग्रहणम् । संसर्गस्तु संकल्पभेदात् । महातीर्थभूयस्त्वाच्च पुण्यतीर्थपादप्रक्षाळनाचमनादिवन्न दूषयति । पादस्पर्शो नाचमनादिषु दोषावहः ।।

तथा च स्कान्दे गङ्गामाहात्म्याध्याये–

नराणां पादसंस्पर्शात्पुण्यतीर्थं न दोषभाक् ।
स्नानादियोग्यं सर्वेषामीदृक्तीर्थस्य वैभवम् ।
रथ्या संस्पृष्टगाङ्गेयतीर्थं प्रार्थ्यं मुनीश्वरैः ।।

सर्वपाप अपनोदार्थं सर्वाभीष्टसमृद्धये इति । पादसंस्पर्शात् स्वस्वेतरपादसंसर्गात् तथा च तद्वदेव महाभागवत श्रीपादतीर्थेषु, स्वार्थासंकल्पितस्वपादतीर्थस्यार्थवशसंपन्नसंसर्गो न स्वोपयोजनविरोधी भवति ।।

प्रधानविरोधाद्धि अश्वप्रतिग्रहेष्ट्यां शते सहस्रे वा पुरोडाशेषु श्रप्यमाणेषु प्रथमस्य पुरोडाशस्य दाहपरिहाराय वाचनिकमपि पदार्थानुसमयं हित्वा काण्डानुसमयः समाश्रितः ।।

अत्रेदमवधेयम् । अश्वप्रतिग्रहे तत्प्रायश्चित्तार्थमिष्ट्यां, प्रजापतिर्वरुणायाश्वमनयत् । सस्वान्देवतामार्छत् । सपर्यदीर्यत इति वाक्ये–वरुणस्य ब्रह्मणः सकाशात् अश्वादानेन जलरोगः अजायत ।

तन्निवृत्यर्थं वरुणेनेष्टिः कृता इत्युक्तं अश्वप्रतिग्रहे कृते दोषशमनार्थं इष्टिः कर्तव्येति निर्णीतम् ॥

काण्डानुसमयः काण्डस्य समूहस्य अनुपश्चात् समयः समयाचारः काण्डानुसमयो नाम शतेषु पुरोडाशेषु श्रप्यमाणेषु सत्सु एकस्य पुरोडाशस्य यद्यद्विहितं तत्सर्वं कृत्वा अनन्तरं इतरस्य पुरोडाशस्य सर्वाङ्गानुष्ठानं एवमुत्तरत्रापि ॥

पदार्थानुसमयः पदार्थस्य एकस्य पदार्थस्य अनुपश्चात् समयः समयाचारः पदार्थानुसमयो नाम एकस्य पुरोडाशस्य एकमङ्गमनुष्ठाय अपरस्य पुरोडाशस्य एकाङ्गानुष्ठानम् । इत्थं सर्वेषामेव तत्तदङ्गानुष्ठानं पुनश्च प्राथमिकस्य पुरोडाशस्य एकमङ्गमनुष्ठाय इत्थमेव इतरेषां एकैकाङ्गानुष्ठानम् । पदार्थानुसमये शतपुरोडाशस्य सर्वाङ्गानुष्ठाने प्राप्ते एकैकस्य पुरोडाशस्य एकैकाङ्गानुष्ठानेन सर्वाङ्गपूर्तिसिद्धौ कालविलम्बेन प्रथमपुरोडाशस्य दाहप्रसङ्गात्पदार्थानुसमयं हित्वा काण्डानुसमय एव समाश्रितः इति ॥

तक्षणादियोग्ये कदरे तदयोग्ये खदिरे च लब्धे प्रधानविरोधपरिहाराय हि तक्षणादिधर्मलोपाभ्युपगमेन खदिरोपादानमाश्रितं, तद्वत् स्वेतरसर्वभागवत श्रीपाद तीर्थलाभरूपप्रधानस्य हानिपरिहाराय स्वपादसंसर्गविरहरूपधर्मस्य लोपाभ्युपगमेन तन्त्रेण सर्वतीर्थग्रहणं न्याय्यम् । स्वपादतीर्थसङ्कल्पोऽपि सङ्कल्पभेदात् । सुपुण्यतीर्थन्यायाच्च न दुष्यति– तद्विरहो नापेक्ष्यः ॥

अतः प्रमाण उपपत्तिदृष्टान्तैः ईदृशविषये युगपत्तन्त्रेण सर्वतीर्थग्रहणं प्रत्येकं स्वयमपि तदुपयोजनं च सांप्रदायिकं शिष्टैः क्रियमाणं सुष्ठ्वेव ॥

एतत्सर्वमभिप्रेत्यैव महाचार्यैः माह्वयति प्रश्नवचनव्याजेन प्रमाण उपपत्तिदृष्टान्तोपन्यासेन निष्कर्षः कृत इति पूर्वग्रन्थेषु स्थितमिति ॥

सद्दर्शनसुदर्शने दक्षिणः क्षणं विचिन्त्य श्रीविष्णुतत्त्वादिकं स्मरन्नात्मगतम्–

"गङ्गादितीर्थेषु वसन्ति मत्स्याः देवालये पक्षिसङ्घाश्च नित्यम् ।
भावोज्झितास्ते न फलं लभन्ते तीर्थानि पुण्यायतनाश्च मुख्याः ॥

भावशुद्धिर्मनुष्याणां प्रमाणं सर्ववस्तुषु ।
अन्यथाऽऽलिङ्गते कान्ता स्नेहेन दुहिताऽन्यथा ॥

भवद्विधा भागवतास्तीर्थभूता महामुने ।
तीर्थीकुर्वन्ति तीर्थानि स्वान्तस्थेन गदाभृता ॥

इत्यादिकं विचार्य–

प्रकाशं भक्तान्तरात्मा स्वयमेव चक्री भक्तात्मना तीर्थवरं ददाति ।
तद्भक्तगोष्ठीवरपादतीर्थं सर्वेऽपि भक्ता निभृताः पिबन्ति ॥

वृद्धास्सिद्धा यामुनार्यान्त्यपक्तौ शिष्टश्रेष्ठाः संप्रदायेपटिष्ठाः ।
दत्वा तीर्थं स्वार्यपादात्मनैते स्वीकुर्वन्ति स्वेन रूपेण शुद्धाः ॥

इति गुरुपरम्पराप्रभावे यामुनाचार्यवैभवे श्रीपादतीर्थं ஸாதிக்கும்-சேர்க்கும் க்ரம் ஆளவந்தாருமிவர்களைக் குறித்து भगव-द्भागवतவிஷயமென்றால் தரமிடாதே भागवतவிஷயத்திலே பகவந்நோக்கானவனாய் भगवाனைகுருபரம்பராதியாக திருவடி விளக்குமாப்போலே பாகவத விஷயத்திலும் தன்ஸத்தைமாண்டு आचार्यविग्रहத்தை அநுஸந்தித்து, தீர்த்தங்கொண்டுபோகுகையும் அவர்களுக்கும் தீர்த்தம் கொடுக்

குமிடத்தில் அர்த்தகாம பரவசரன்னிக்கே தாம் நேரே. ஆசார்யனை அநுஸந்தித்து गुरुपरंपरापूर्वकமாய் द्वयத்தை யநுஸந்தித்து தீர்த்தங் கொடுக்கையும் இருவர்க்குமுபா தேயம் ज्ञानाधिकविषयமுமாய் சமூகமாய் சென்றவளவிலே.

இருவரும் அர்த்தகாமபரவசராய் प्राकृत சரீரத்திலே நோக்காய் முதலிகளிகழ்ந்து திருவுள்ளம் கன்றுமாகில் ஆசார்யனேயாகிலும் அவாகளுக்கு அந்த தீர்த்தமுபா தேயமன்று என்றருளிச்செய்தாரிதி.

अतः प्रपन्नैः आचार्यजन्मर्क्षदिवसादौ गोष्ठ्यां श्रीपादतीर्थस्वीकरणंकर्तव्यमेवेति सिद्धम् ॥

इति सदनुष्ठानदर्पणे गोष्ठ्यां सर्वश्रीवैष्णवानां श्रीपादतीर्थस्वीकारविषयो नाम षोडशप्रतिफलनम् ॥

श्रीरस्तु ॥

॥ श्रीः ॥

श्रीमत्परमहंसेत्यादि एम्बार्जीयर् स्वामिनः ।
इति सुप्रसिद्ध पण्डितश्रेष्ठैः अनुगृहीत सद्दर्शन
सुदर्शनग्रन्थस्थ श्लोकाः ॥

एते तत्वार्थबोधात् निजसुकृतलवस्पर्शतोऽत्यन्तभीताः
सिद्धोपायैकनिष्ठाः मनसिचचलिते वेद्यमेवस्मरन्तः ।
तत्तस्येत्यादिसीता नियतिमनुगताः भूवराहस्य सूक्तौ
विस्रम्भाधिक्ययोगात् असकृदपिहरेर्वन्दनं वारयन्ति ॥

श्रीः

॥ श्रियै नमः ॥

॥ श्रीमते रामनुजाय नमः ॥

॥ श्रीमद्वरवरमुनये नमः ॥

॥ श्रीशुद्धसत्वमहागुरवे नमः ॥

सदनुष्ठान दर्पणे सप्तदश प्रतिफलनं

प्रपन्नानां वैश्वदेवाकरणे-प्रमाणम्

प्रपन्नैः वैश्वदेवादिकं न कर्त्तव्यं - वचनात् शिष्टाचाराच्च— तथाहि - वासुदेवसंहितायां—

"न कुर्याद्वैश्वदेवन्तु विष्ण्वाराधान लोलुपः ।
यदि कुर्याद्विमोहेन ब्रह्महत्यासमंभवेत् ॥" इति श्रूयते ।

ऋषयः कावषेयाः ऊचुः—किमर्थावयं अध्येष्यामहे, किमर्थावयं यक्ष्यामहे, किं प्रजया करिष्यामो, येषां नोयमात्मेति । स्मर्यते च श्रीभागवते एकादशस्कन्धे - पञ्चमाध्याये । वासुदेवं प्रति नारदः—"देवर्षिभूताप्तनृणां पितृणां नकिंकरो - नायमृणी च राजन् ।
सर्वात्मनायश्शरणं शरण्यं गतोमुकुन्दं परिहृत्य कर्त्तम् ॥"

अस्य श्लोकस्य श्रीधरार्यविरचित भावार्थदीपिकाव्याख्या भक्तस्य विधिनिषेधनिवृत्तेः कृतकृत्यतामाह देवर्षि इति, आप्ताः, पोष्याः कुटुम्बिनः इतरे देवतादयः पञ्चयज्ञदेवताः—एतेषां नित्यं,

यः अभक्तः ऋणी, अत एव तेषां किंकरः तदर्थं पञ्चयज्ञादिकर्त्ता। तथा च स्मृतिः—"हीन जातिं परिक्षीणं ऋणार्थं कर्म कारयेत्" इति। अयन्तु न तथा, कोसौ सर्वभावेन मुकुन्दं शरणंगतः कर्त्त—कृत्यं परिहृत्य - यद्वा कर्त्तृ भेदं परिहृत्य, कृतीछेदने इत्यस्माद्धातो। वासुदेवः सर्वमिति बुध्वा इत्यर्थः - (4)

"स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः।
विकर्म यच्चोत्पतितं कथंचिद्धुनोति सर्वंहृदि सन्निविष्टः॥"

अस्य भावार्थदीपिका व्याख्या—विहितकर्मनिवृत्तिमुक्त्वा निषेधनिमित्त प्रायश्चित्तनिवृत्तिमाह—स्वपाद मूलमिति। त्यक्तः—अन्यस्मिन्देहादौ देवतान्तरेवा भावः येन—अतएव तस्य विकर्मणि प्रवृत्तिः न संभवति। यच्च कथंचित् प्रमादादिना उत्पतितं भवेत् तदपि हरिः धुनोति। ननु यमः तं नात्रमन्येत – तत्राह परेशः परेषां यमादीनां ईशः नियन्ता ननु श्रुतिस्मृतिर्ममैवाज्ञेति भगवद्वचनात् स्वाज्ञाभंगंकथं सहेत! तत्राह प्रियस्य ननु - नायं पापक्षयार्थं भजेत, तत्राह - हृदि सन्निविष्टः - न हि वस्तुशक्तिः अर्थितामपेक्षते इति भावः (43) इति तस्मात् आश्रमांग कर्मत्यागः इष्टः इति सिद्धम्।

एतेन तस्मात् ब्राह्मणः त्रिभिः ऋणवा जायते। ब्रह्मचर्येण ऋषिभ्यः, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः इति ऋणत्रयं श्रुतं। तदपाकरणाय यज्ञादिकं कर्त्तव्यं; अन्यथा प्रत्यवायात्। तथाह मनुः—

"ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवशयेत्।
अनपाकृत्य मोक्षन्तु सेवमानः पतत्यधः॥" इति

अतः ब्राह्मणस्य ऋणत्रयेण सह जातत्वात् - तदनपाकरणे महान्प्रत्यवायः स्यादित्यादिकं निरस्तम्।

किंच—"नवधा भिद्यमानेषु नित्यनैमित्तिकादिषु ।
नित्यत्रयं तु भक्तस्य नित्यनैमित्तिकत्रये ॥
ज्ञानिनः कर्मिणस्तुस्यात्सर्वमेतत्त्रिकं त्रिकम् ।
नित्यनित्यं प्रपन्नस्य शिष्टेष्वष्टसुनग्रहः ॥" इति
संध्यावन्दनादीनामेवग्राह्यत्वमुक्तं ।

अत्र नित्यनित्यं संध्यावन्दनादि—अत्र नित्यनित्यங்களாவன-प्रातस्नानமும் देवर्षिपितृतर्पணமும் संध्यात्रयமும் - नित्यौपासनமும् ब्रह्मयज्ञமும் - दर्शोपरागங்களும் विष्वयनங்களும் मातृपितृ-श्राद्धமும் - गर्भाधानादि, श्मशानान्तமும் अकरणे प्रत्यवायवचनंகளும் - अनधिकारिविषयத்தில் வாராதிறே इति पूर्वाचार्य श्रीसूक्तिरनुसन्धेया ।

न च सन्ध्यावन्दनादावपि काम्यत्वं साधनीयमितिवाच्यं-फलादर्शनात् - ननु यदह्नापापमकार्षमित्यादिना फलश्रवणमस्तीति-चेन्न मंत्रस्य अनुष्ठेयार्थ प्रकाशकत्वेन फलप्रतिपादने तात्पर्याभावात् - अन्यथा मंत्राधिकरण विरोधात् - न च ब्रह्मलोके महीयते इत्यादिना, फलश्रवणमस्तीति वाच्यं - अर्थवादत्वेनाप्युपपत्तेः ।

प्रपन्नानामौपासनमावश्यकं - श्रीपांचरात्रे पराशरसंहितायां विशिष्टपरमधर्मशास्त्रे चतुर्थाध्याये— "उपस्थानंततः कृत्वा स्वसूत्रेणोक्त-मार्गतः । ततश्चौपासनं कुर्यात् द्विजस्सूर्योदयात्परं ॥" "औपासनम-कुर्वाणः स्त्रियं वा योधिगच्छति । स्वमातृगमनं प्रोक्तमिति वेदविदो-विदुः ॥" इति श्रीवैखानसे अर्चनानवनीते—"औपासन विहीनस्तु द्विजः शूद्रसमोभवेत् । औपासनविहीनश्चेद्विधुरः परिकीर्त्तितः" इति । "द्वादशाहमनग्निस्तु संध्याहीनोदिनत्रयं । चतुर्वेदधरो विप्रः शूद्र एव न संशयः ॥" इति तदकरणे प्रत्यवायश्रवणात् ।

चिकीर्षुर्लोकसंग्रहमिति गीतत्वेन ब्रह्मयज्ञमप्यनुतिष्ठन्ति। माधवीये ब्रह्मयज्ञस्य स्वरूपं तैत्तिरीय ब्राह्मणेदर्शितं। "यत्स्वाध्याय-मधीयीतैकामप्यृचं - यजुस्सामत्रातद् ब्रह्मयज्ञः संतिष्ठते" इति—ब्रह्मयज्ञे जप्या - अश्वमेधेदर्शिता— वेदमादौसमारभ्य तथोपर्युपरिक्रमात्। यदधीतेन्वहं शक्त्या तत्स्वाध्यायं प्रचक्षते "ऋचं वाऽथयजुर्वापि सामगाथामथापिवा इतिहासपुराणानि यथाशक्ति न हापयेत्॥" इति याज्ञवल्कयोपि - वेदाधर्मपुराणानि सेतिहासानि शक्तितः - जपयज्ञ-प्रसिध्यर्थं विद्यां चाध्यात्मिकीं जपेदिति—आत्मदेशयोः अशुचित्वे ब्रह्मयज्ञः वर्जनीयः तथा च श्रुतिः—"तस्यवा एतस्य यज्ञस्य द्वावनध्यायौ यदात्माशुचिर्यद्देशः" इतीति स्मृति रत्नाकरे। अतः—

वेदाधर्मपुराणानि सेतिहासानि शक्तितः।
ब्रह्मयज्ञ प्रसिध्यर्थं विद्यांचाध्यात्मिकीं जपेत्॥

इत्यादि वेदव्यतिरिक्तजपः काम्यविषयः इति॥

पराशरसंहितायां चतुर्थाध्याये - ब्रह्मयज्ञं ततः कृत्वा देव ऋष्यादितर्पणं - पित्रादि तर्पणं कुर्याच्चतुरम्यकचतुर्मुख - सर्वदेवान् सर्वगणान् पतिपत्न्यादिभिस्सह इति च एकैकं काण्ड ऋष्यादीन् वेदादि ऋषयस्तथा निवीतमिति श्रुत्यर्थं तत्तत् ज्ञात्वा च तर्पयेत् – ब्रह्मयज्ञेप्युप-स्थाने पुंसूक्तैर्जपेद्द्विजः इति श्रीवैखानसे अर्चना नवनीते जपं द्वादश-सूक्तानां, चतुर्वेदादिकैस्तुवा इषेत्वादित्रयान्वाकैः स्वाध्यायो ब्रह्मयज्ञकः इति आश्चर्यपर्वणि - शेषधर्मे - षोडशाध्याये ब्रह्मयज्ञन्तु यः कुर्याद्ब्रह्मणो-रूपमव्ययम् मम लोकमवाप्नोति सत्यंसत्यं मयोदितम् इत्युक्तत्वात्।

किं च परमकारुणिकाः श्री भाष्यकाराः—अथ परमैकान्तिनो भगवदाराधनक्रमं व्याख्यास्यामः इत्यारभ्य—आराधनोपयुक्त शुद्धिहेतु संध्यावन्दनादिकं भगवत्परं प्रतिपाद्य प्रपन्नस्य यावदनुष्ठेयं तावन्मात्रमेवावोचन्।

श्रीमन्निगमान्त गुरवस्तु भगवता भाष्यकृता - नित्ये भगवन्निवेदिताद्धविषः विष्वक्सेनाय किंचिदुद्धृत्य निधाय अन्यत्सर्वं आचार्यप्रमुखेभ्यो वैष्णवेभ्यः प्रदाय भगवद्यागावशिष्ट जलादिभिर्द्रव्यैः विष्वक्सेनमभ्यर्च्य पूर्वोद्धृतंहविश्च दत्वा तदर्चने परिसमाप्य अर्घ्यं दत्वा भगवन्तमष्टांगप्रणामेन प्रणम्य शरणमुपगच्छेदित्यत्र, भगवन्निवेदितान्न विनियोग प्रतिपादनपरग्रन्थे विष्वक्सेन निवेदनार्थ हविरुद्धरणवत् - वैश्वदेवार्थं हविरुद्धरणाकथनेन - विष्वक्सेनार्थ हविर्व्यतिरिक्तस्य सर्वस्यहविषो - वैष्णवार्थत्वकथनेन च वैश्वदेवस्य नित्य बहिर्भावेन - काम्यत्वं भगवद्भाष्यकाराभिप्रेतमिति मनसि निधाय नित्यव्याख्याने वैश्वदेवादिकं कर्त्तव्यमितिनाब्रुवन् ।

भगवन्निवेदिते कस्यचिदंशस्य विष्वक्सेनार्थमुद्धरणोक्त्या तन्निवेदितव्यतिरिक्तं गुर्वादिनिवेदितं भोज्यमिति गम्यते - तत्र् विष्णोरमात्यंसेनेशं परिवारैस्समर्चयेत् —इति प्रपन्नपारिजातोक्तरीत्या सपरिवार सेनाधिपनिवेदन प्रयुक्तमिति मंतव्यम् ।

चण्डादीनां तु, नैवेद्यमभोज्यं - विष्णु तत्परैः ।

विना विधानं नित्येषु, नोपास्यंते - मुमुक्षुभिः ॥ ब्रह्मरुद्रार्जुन व्यास सहस्रकर भार्गवाः । ककुत्स्थात्रेय कपिल बुद्धाद्याये सहस्रशः— शक्तयावेशावतारास्तु विष्णोस्तत्काल विग्रहाः । अनुपास्या मुमुक्षूणां यथेन्द्राग्न्यादि देवताः ॥—इति ।

पांचरात्रादिभिः चण्डादि निवेदितस्य प्रतिषिद्धतया गुर्वादि निवेदनानर्हत्वात् ।

कपिंजलसंहितायां अष्टादशाध्याये—"पात्रमेकं समादाय विष्वक्सेनाय दापयेत् । विष्वक्सेन निवेद्यन्तु जलमध्ये विनिक्षिपेत् ॥

इत्यादिकमनुसृत्य नित्यग्रन्थे तथानुगृहीतमिति शिष्टैः प्रतिपाद्यते। अतः विष्वक्सेनस्य गुरुपरम्परानुप्रविष्टतया तस्मिन्गुरुत्वप्रतिपत्त्या, तन्निवेदितं प्रपन्नैर्भोज्यमेव श्रीवत्सचिन्हमिश्रानुसंहितवाक्य गुरुपरम्परायां, श्रीमते विष्वक्सेनाय नमः इति श्लोकगुरुपरम्परायां सेनेशं, श्रियं इन्दिरासहचरमिति च श्रीविष्वक्सेनस्य गुरुपरम्परान्वयः वर्तते इति सुप्रसिद्धम्।

हारीते द्वितीयेऽध्याये भगवन्वैष्णवाः पंचसंस्कारास्सर्वकर्मणां - प्रधानमिति यच्चोक्तं सर्वदेवमहर्षिभिः इत्यारभ्य, एकैकामाहुतिं हुत्वा होमशेषं समापयेत् - ततः प्रदक्षिणं कृत्वा नमस्कृत्वा जनार्दनं आचार्यः स्वगुरुं नत्वाजपेद्गुरुपरम्परां-एवं प्रपद्य लक्ष्मीं तां श्रियं घटकभावतः- शरण्यं सर्वलोकानां प्रपद्येत, सनातनं - इत्याचार्येण सन्दिष्टः प्रपद्येत जनार्दनं - प्रपद्येत ततः शिष्यो गुरुरेव दयानिधिमित्याद्युक्त प्रकारेण- परम्परामुपदिशेद्गुरूणां प्रथमं गुरुः - आत्मविद्या विशुद्ध्यर्थं स्वाचार्याद्यं द्विजोत्तमः - प्रीत्या पृथक् पृथक् शिष्यैः प्रणमेदीश्वरावधि - तद्यथा विधिना, नित्यं, प्रवक्तव्यं, गुरोः कुलं। इति सहस्र पूरुषं वापि, शतपूरुषमेववा आदावुपदिशेद्वेदे, खिलऋग्वाक्यसंमुदा - अस्मद्गुरुभ्य इत्यादिवाक्यत्रय मरिन्दम इति संहिताद्युक्तप्रकारेण "श्रीविष्णुलोके भगवान्विष्णुर्नारायणः स्वयं" प्रोक्तवान्मन्त्र राजादीन् लक्ष्म्यै तापादिपूर्वकं। "श्रवणे दिव्यनक्षत्रे कृतावतरणं भुवि - विष्णुमादिगुरुं लक्ष्म्या मन्त्ररत्नप्रदं भजे" इति - श्रियःपत्या श्रियःताप संस्कारादिपूर्वकं— अस्मद्गुरुभ्यो नमः, अस्मत्परम गुरुभ्यो नमः अस्मत्सर्व गुरुभ्यो नमः इति वाक्यत्रयोपदेशपूर्वक रहस्य त्रयोपदेशः प्रतिपादितः।

वासुदेवसंहितायां - सोपदिष्टवती प्रीत्या, ताप, पुण्ड्रादिपूर्वकं - विष्णुलोकेवतीर्णाय, प्रियाय सततंहरेः। सेनेशाय प्रिया विष्णोर्मूल-

मन्त्रद्वया दिकं- इति लक्ष्म्या, विष्वक्सेनाय, तथोपदेशः प्रतिपादितः तत्रैव "सेनेशः स्वयमागत्यप्रीत्या श्रीनगरीं शुभां शठकोपाय-मुनये तिन्त्रिणीमूलवासिने तापादिपूर्वकं, मन्त्रद्वय श्लोकवरान् क्रमात् विष्णुपत्न्या महालक्ष्म्या नियोगादुपदिष्टवान्।"—इति श्रीमता-विष्वक्सेनेन श्रीमते शठकोपाय तथोपदेशः प्रकटितः।

तत्रैव, पुनश्चनाथमुनये पञ्च संस्कारपूर्वकं, भट्टनाथप्रभृतिभिः निर्मितैर्दिव्ययोगिभिः, दिव्यैर्विंशति संख्याकैः प्रबन्धैस्सहदेशिकः। स्वोक्तद्राविडवेदानां चतुर्णामुपदेशकृत्-इत्यादौ श्रीमच्छठकोप सूरिभ्यः - श्रीमन्नाथमुनेः - पञ्चसंस्कारपूर्वकगुरुपरम्परा रहस्यत्रय - दिव्यप्रबन्धोपदेशस्सम्यगभिहितः।

अहोबिलीय-श्रीरङ्गनाथयतीन्द्र महादेशिक कृताह्निक ग्रन्थे "श्रियैनिवेदितंभागं - विष्वक्सेनादि - शठकोप स्वाचार्यपर्यन्तं निवेदन योग्यत्वमुक्तं" पराशरसंहितायां द्वाविंशाध्याये—जातस्तु सुन्दरस्तद्व-द्विष्वंशाश्शत्रुजित्क्रमात् भक्तावताराश्चैतेवै विष्वंशाश्शुद्धसात्विकाः इति—विष्णुरहस्ये भक्तस्वरूपकथन प्रकरणे शेषात्मानं, वरवरं विजानीयान्मुनिं गुरुम् विष्वक्सेनात्मनाजातं शठकोपमुनीश्वरमिति।

ब्रह्माण्डपुराणे बदरिकाश्रममाहात्म्ये नरनारायणसंवादे पुनश्चा-विर्भवेत् श्रीमान्मन्नियोगान्महीतले जनिष्यति श्रीनगर्यां यतीन्द्र-प्रवणात्मना - यत्पद्यं द्राविडाम्नायस्यारम्भान्ते भविष्यति - स एव सौम्य, जामाता, यतिश्रेष्ठो भविष्यति इति—भूत्वा भूयो वरवरमुनिः भोगिनां सार्वभौमः श्रीमद्रंगे वसति विजयी विश्वसंरक्षणार्थं - तत्वं गन्तुं व्रजशरणमित्यादिशद्राघवोयं स्वप्ने सोयं सुरवरगुरुः संश्रयो मादृशानो - शेषश्रीमानजनिसपुनः सौम्यजामातृयोगी- भोगी भूत्वा तदनुभगवान् राघवस्यानुजन्मा भूत्वा भूयोवरवरमुनिः भूयसाभा-

समानो रक्षत्यस्मान्रघुकुलपतेराश्रितो भद्रपीठं इत्यादि प्रमाणरीत्या श्रीमहाविष्णवनन्त, भाष्यकारापरावतार श्रीमद्वरवरमुनिरपि - स्वप्रणीत द्राविड भगवदाराधन प्रबन्धे, भगवन्निवेदितस्य श्रीभूमिनीळानां क्रमेण निवेदनमभिधाय - तस्य चतुर्धा विभागं, तेष्वेकैकस्य - विष्वक्सेन नागराज, गरुत्मत्सुदर्शनपांच जन्यानां निवेदनमभिधाय तस्य च कृत्स्नस्य, संमेळितस्य, श्रीमच्छठकोप परकाल— यतिवरादि निवेदनमुक्त्वा - परमगुरु निवेदन पूर्वकं, स्वगुरुनिवेदन- मुक्त्वा समापितं। भविष्यत्पुराणे मय्येव निरतारिसद्धामदर्थेत्यक्त- जीविताः—तेषां ब्रह्मन् सदा भोज्यं, सेनेशान्नं विशेषतः इति अतः विष्वक्सेन निवेदितं – प्रपन्नैर्भोज्यमेव।

तथैवोक्तं सन्मार्गदर्पणे सत्संप्रदायप्रतिफलननामके - तृतीय परिच्छेदे - किंच - स्वयंव्यक्तहरेः शेषं ग्रामदेवायचार्पयेत् – ग्रामदेवहरेः शेषं गृहदेवायचार्पयेत् – गृहदेवहरेः शेषमर्पयेदन्तरात्मनः इति एकस्यैव भगवतः स्वयंव्यक्तादिभेदं भिन्नप्रदेशावस्थान भिन्नस्य अभ्यर्हित पूर्वावस्थस्य निवेदितमन्नाद्यं – उत्तरावस्थाय तस्मा एव निवेदन- मर्हतीत्यनुज्ञानात "ज्ञानीत्वात्मैवमेमत" मित्यादिभिर्भगवतोप्यत्यर्थ प्रियत्वेनधारकतयाभिमत, भक्तरसनाग्रवर्त्ति भगवच्छिष्टेन पित्राद्यन्त- रात्मतयावस्थितस्स एवाराधनीयः इति गम्यते।

अत एव हि - अखिलवेदान्त तात्पर्यनिर्णायक श्रीभगवद्रामानुज- मुनि कृपालब्ध, परावरतत्व याथात्म्यविज्ञानैः वैदिकसार्वभौमैः श्रीमद्भिः पराशरभट्टार्यैः स्वप्रणीत क्रियादीपे भक्त निवेदितमेव प्राणाग्निहोत्रादि शेषतयाभिधीयते, नागराज गरुत्मभ्यां हविरन्यन्निवेदयेत् "एवं सपरिवाराय देवाय परमात्मने - निवेद्यात्मानमात्मीयं प्रणम्याचां समापयेत् - "चण्डादि द्वारपालांश्च कुमुदादींस्तथैवच। अर्घ्यादिभिस्तथा

अभ्यर्च्यः हविःशेषैर्बलिंक्षिपेत् " विष्णोर्निवेदितं, सर्वं गुरुभ्यश्च निवेदयेदितिवचनव्यक्तया विष्णोर्निवेदितं सर्वंपश्चाद्भुञ्जीत च स्वयम् इति ॥

नचात्र - विष्णुनिवेदितस्यैव - स्वयं भोज्यत्वावगमात्तस्यैव प्राणाग्निहोत्रशेषतावगम्यत इतिवाच्यं, विष्णोर्निवेदितं सर्वं गुरुभ्यश्च-निवेदयेदिति वचन व्यक्तया-विष्णुनिवेदितस्य कात्स्न्र्येन गुरुनिवेद्यत्वावगमात्तदतिरिक्तस्य विष्णुनिवेदितस्याभावात् । तथा च गुरुनिवेदितमेव प्राणाग्निहोत्र निर्वर्तकतयाऽभ्युपेयं ।

तथाचायमर्थस्सम्पन्नः - विष्णुनिवेदितं सर्वमपि - नागराज, गरुत्मदादिभ्यः यथाभागं निवेद्य - तत्कृत्स्नमपि मिळितं गुरुभ्यो निवेद्य, तेनैव प्राणाग्निहोत्रादिकं निर्वर्तयेदिति । ननु विष्णु निवेदितं सर्वमपि नित्यसूरिनिवेदनपूर्वकं गुरुभ्यो निवेदितमेव यदि प्राणाग्निहोत्रादि निष्पादकं तर्हि चण्डादि निवेदितस्यापिगुरुभ्यो निवेदनपूर्वके प्राणाग्निहोत्रादिशेषतापत्तिः मैवं, चण्डादीनां तु नैवेद्यमभोज्यं विष्णुतत्परैः इति चण्डादि निवेदितस्य प्रतिषिद्धतया गुर्वादिनिवेदनानर्हत्वात्—न चैवंसति गुरुनिवेदितमेव भोक्तव्यमित्यनुक्त्वा विष्णोर्निवेदितं सर्वं पश्चाद्भुंजीत च स्वयं इति किमर्थमुक्तमितिवाच्यं । गुरुनिवेदनानन्तरमेव भगवन्निवेदनपूर्त्तिरिति ज्ञापनार्थं पुनर्विष्णोर्निवेदितं सर्वमिति निर्देशः । न तु गुरुनिवेदितस्य भोक्तव्यत्व निवृत्त्यर्थः तथा च भगवता भाष्यकृतापि स्वप्रणीत नित्ययाग प्रबन्धे, भगवन्निवेदनानन्तरं निवेदिते विष्वक्सेनार्थं किंचिदुद्धृत्येति कस्यचिदंशस्योद्धरणं अन्यस्य स्वाचार्य प्रमुखेभ्यः वैष्णवेभ्यः प्रदायेति गुर्वादि निवेदनम् अभिधाय उद्धृतांशस्य विष्वक्सेन निवेदनमुक्तम् । अत्रत्यवैष्णवशब्दः सूरीणामपि संग्राहकः । विष्वक्सेननिवेदनात्पूर्वमेव—तन्निवेदनाभिधानात्—नागराज गरुत्मद्भ्यामित्य नेनैकार्थ्यात् च अत्र भगवन्निवेदिते

कस्यचिदंशस्य विष्वक्सेनार्थमुद्धरणीयत्या तन्निवेदितव्यतिरिक्तं गुर्वादिनिवेदितं भोज्यमिति गम्यते। यदि विष्वक्सेनस्य गुरुपरम्परानुप्रविष्टतया तस्मिन्गुरुत्वप्रतिपत्तिः स्वस्मिन् तद्गणानुचरत्व प्रतिपत्तिर्वा भवति तदा तन्निवेदितमपि भोज्यमेव ॥ तदुक्तं। षष्टिप्रबन्धनिर्मातृभिः श्रीमन्नारायण मुनिभिः, अथवा तद्गणानुचरो भूत्वाभुञ्जीत अथवा विष्वक्सेनस्याचार्यपरम्पराभूमित्वात् आचार्यप्रसादेन स्वीकार्यः इति। तथा वंगिवंशेश्वरैर्वरदगुरुभिरपि भगवन्निवेदनानन्तरं सूर्याराधनं, तदनन्तरं गुर्वाराधनम् विष्वक्सेनाराधनं चाभिधाय विष्णुनिवेदितस्य चतुर्धावा षोडावा विभागमुक्त्वातत्राग्रभागस्य विष्वक्सेनार्थन्यासं अवशिष्टानां सूरिनिवेदन पूर्वकं गुर्वादिनिवेदनं स्वार्थतया शिरसास्वीकारं अपात्रेभ्य। प्रदाने प्रत्यवायमुद्धृतस्य अग्रभागस्य सपरिवाराय विष्वक्सेनाय निवेदनं तन्निवेदितस्य विशुद्धेम्भसिक्षेपं—तद्गणानुचरत्वेनवा स्वस्योपयोगं, भगवदनुज्ञापूर्वकं श्रीमदष्टाक्षरमन्त्रजपं प्रणामस्तोत्रादिकं चण्डादिद्वारपालानां, कुमुदादिगणानां, चक्राद्यायुधानां, गरुत्मत, शेष, शेषासनानां विशिष्य प्रणामं तेषु भगवतः सपत्नीकस्य जीवितस्यैव न्यासं, पुनरपि भगवतः, स्तोत्र प्रणाम, प्रदक्षिणादिकं चाभिधाय होमानुयागौकर्त्तव्यतयोक्त्वा भगवदाराधनं समापितं—"विनिवेद्य सताम्बूलं स्तुत्वा स्तोत्रैः प्रणम्य च। गरुत्मत् शेषशेषाश प्रमुखेभ्योपिसादरं॥ सर्वेभ्यः परिवारेभ्यः कृत्वैतत्सर्वमंजसा-स्वगुरूँस्तद्गुरूँश्चापि गन्धाद्यैरभिपूज्य च॥" इत्यारभ्य होमाद्यनुयागान्तं वैधंकर्मसमाचरेदित्यन्तेन "गरुत्मत् शेष, शेषाशप्रमुखेभ्यः" इति प्रमुखशब्देन, सुदर्शनादि दिव्यायुधानि, चण्डादि द्वारपालाः कुमुदादयोगणेशाश्च विवक्षिताः—उत्तरत्र तेषामेव सपत्नीके भगवद्रक्षकतयोदाहरिष्यमाणत्वात्।

भगवन्निवेदितस्य षोढा विभागस्य वक्ष्यमाणत्वाच्च । न च चतुर्धा त्रिभागपक्षे कथं षण्णां संग्रहः इति वाच्यं । चण्डादीनां, कुमुदादीनां च शिष्टस्य भोक्तव्यत्व निषेधात् । तेषांगन्धपुष्पादिभिः अभ्यर्चनं विवक्षितं । तदभिप्रायेणहि हविर्भागानन्तरं कस्यचिदुद्धरणमभिधाय अवशिष्टानां पात्रभूतेभ्यः वैष्णवेभ्यः प्रदानमुक्त्वा, तदेव स्वात्मार्थं शिरसा स्वीकुर्यादित्युक्तं । "विष्वक्सेनार्चनायाथन्यस्यैकं भागमग्रतः प्राङ्निवेदनमन्यत्तु नैवेद्यमवशेषितं ॥ प्रायच्छत्पात्र भूतेभ्यः वैष्णवेभ्यो विभज्य तत् । आत्मार्थं शिरसास्वेन स्वीकुर्याच्च स्वयं च तत् ॥" इति । अत्र वैष्णव शब्देन, गरुत्मच्छेष शेषाशन हेतिराज दिव्यायुधानि च गुर्वादयश्च विवक्षिताः । गरुत्मच्छेष शेषाश प्रमुखेभ्योपिसादरम् स्वगुरुँस्तद्गुरुँश्चापि इत्युपक्रमानुगुण्यात् ।

अत्र तु प्रमुखशब्दस्य भगवद्रक्षकतया वक्ष्यमाण, दिव्यायुधपरत्वौचित्यात् । न च चण्डादीनां कुमुदादीनां च तत्वेन वक्ष्यमाणत्वाविशेषात् तत्संग्रहः किं नस्यादिति वाच्यं—अत्र वैष्णवेभ्योनिवेदितस्य स्वात्मार्थं स्वीकरणीयत्वावगमात् चण्डादि निवेदितस्य स्वात्मन्यनुपयोगात् षोढा विभागे तु—चण्डादि निवेदितव्यतिरिक्तमेव स्वात्मन्युपयुज्यते इति गम्यते तन्निवेदितस्य प्रतिषिद्धत्वात् ।

होमाद्यमनुयागान्तं वैधंकर्मसमाचरेदित्युपसंहारस्थ होमशब्दो वैश्वदेवादिहोमवचनं तस्यैव भगवदाराधनानन्तरभावित्वात् प्राणाग्निहोत्रस्य अनुयागशब्देन पृथगुपादानात्—न च केवलभोजने अनुयागशब्दः प्रयोगमर्हति । द्रव्यदेवतासम्बन्धिन एव यागत्वात्—एवं च वैश्वदेवादिकमपि गरुडादिनिवेदितेनैवनिर्वर्त्यमिति निश्चीयते—पूर्वपूर्व निवेदितेनैवोत्तरोत्तरनिष्पत्तिप्रकरणात्—अनुयागसमभिव्याहारबलाच्च अनुयागोहि हरिगुर्वादि निवेदितेनैवेत्यविवादम् ।

तथा सर्वतन्त्रस्वतन्त्र श्रीमद्वेदान्ताचार्यपुत्रैः वरदाचार्यैरपि स्वप्रणीत भगवदाराधन प्रबन्धे भगवन्निवेदितस्य कृत्स्नस्य विष्वक्सेनादिसूरिनिवेदन पूर्वकं गुर्वादिनिवेदनमुक्तं। "विष्वक्सेनायदातव्यमनन्तायगरुत्मते। गुरुभ्यश्च विशेषेण चतुर्भ्यश्च निवेदयेत्" इति। अत्र गुरुभ्यश्चेति चकारात् सुदर्शनादयो विवक्षिताः। वंगिवंशेश्वर वरदाचार्यसूक्त्यैकार्थ्यात् — चतुर्भ्यश्चेत्येतद्गुरुविशेषणं। एवं च श्रीमच्छटकोपयतिवरपरमगुरुस्वगुरूणां विशेषेण निवेदनं विवक्षितं चतुर्भ्यश्चेति च कारात् गुरुनिवेदितेनैव होमानुयागौविवक्षितौ— तत्सूक्त्यैकार्थ्यात्—इति।

श्रीमन्निगमान्तगुरुभिः सच्चरित्ररक्षायां त्याज्यात्याज्यविषयेवचनमेवप्रवर्तकमिति, श्रीपांचरात्ररक्षायां धर्मानुष्ठान निर्णयावसरे "एकं यदिभवेत् शास्त्रं--ज्ञानं निःसंशयंभवेत्। बहुत्वादिहशास्त्राणां ज्ञानतत्वंसुदर्लभमिति" चानुगृहीतं। किं च श्रीमन्निगमान्तगुरुभिः सच्चरित्ररक्षायां ननु वैश्वदेवावशिष्टमेव भोक्तव्यं; तच्चदेवतान्तर विषयं—ततः कथं भगवन्निवेदितेन देवतान्तरयजनं। तथासत्यति प्रसंगात्। इत्यारभ्य वैश्वदेवव्रतामपि भगवन्निवेदितस्य भोज्यत्वमनपोदितमित्यादिवाक्येन वैश्वदेवमभ्युपगच्छतामधिकार्यन्तराणां तत् भगवन्निवेदितेनकार्यमित्युक्त्वा बहुविधवैष्णवलक्षणे "विना तेनात्मसिद्ध्ययर्थं विश्वात्मानं यजन्तिये। मोक्षार्थमपि विप्रेन्द्रस्मृतास्तेंजलिकारिणः" इत्यादिवाक्येन वैष्णवानांवैविध्यमुक्त्वा कल्पसूत्रप्रतिनियतधर्मान्तरवत् तदुपपत्तेरित्यादिवाक्येन तत्तदधिकारि विशेषाणां-तत्तद्धर्मानुष्ठानविशेषस्योपपत्तिप्रतिपाद्यवैष्णव्यां स्मृतौ - वैश्वदेवकरणे, वासुदेवाय, संकर्षणाय, प्रद्युम्नाय इत्यादिवाक्येन प्रयोगप्रदर्शनेन अधिकारिविशेषे, वैष्णववैश्वदेवकरणाभ्यनुज्ञानेपि, अस्मिन् ग्रन्थे स्मार्त्तवैश्वदेवकरणस्यानुक्तत्वात्।

तथैव श्रीवैष्णवसमयाचार निष्कर्षे षष्ठविवेके ब्राह्मणोत्तमரான, ஸ்ரீவைஷ்ணவர்களில் ஒரொரு அதிகாரி பண்ணுகிற वैश्वदेवं इतर व्यावृत्तமாயிருக்கும் என்கிற வசனம் सच्चरित्ररक्षै-யிலே ஸுஸ்பஷ்டம் । तत्र वैष्णवस्मृतौ - वासुदेवाय, संकर्षणाय, प्रद्युम्नाय, अनिरुद्धाय, पुरुषाय, सत्याय, अच्युताय, वासुदेवायेति भगवदसाधारणमन्त्रैर्वैश्वदेवकरणं - वैष्णवस्यकर्त्तव्यमिति, இதுவு மொரு அதிகாரி விசேஷமாயிருக்கும்படியை அதிலே கண்டு கொள்வது इत्यादिभिः उक्तत्वात् । सिद्धोपाय निष्ठानां श्रीवैष्णवा-नामवश्यं वैश्वदेवं कर्त्तव्यं — अकरणे प्रत्यवायः इति कण्ठरवेणानुक्त-त्वात् ।

वैश्वदेवकारिकायाः एकाधिकारि विषयत्वेन एककर्तृकत्वे तत्र श्वबल्यादेरुक्तत्वेन आपस्तम्बेन सर्वान्वैश्वदेवभागिनः कुर्वीत । श्वचण्डालेभ्यः नानर्हद्भ्यः दद्यादिति श्वादिबलिनिषेधेन मुमुक्षुदर्पण तद्व्याख्यानादौ - तदनादरणेन च कैश्चित् शिष्टैः श्वबल्याद्यकरणेन तस्याः कारिकायाः अधिकार्यन्तर विषयत्वेन निर्णेतव्यत्वात् । अन्यथा तदेतद्ग्रन्थयोः परस्परविरोधस्य दुष्परिहारत्वात् तत्समा-धानंक्रियते इति चेत् स्वकुशलताप्रकटनापत्तेः । स्वायत्तेशब्दे अवाचकं पदं न प्रयुंजीत इति न्यायेन सन्दिग्धार्थकत्वेन ग्रन्थकरणवैफल्य-प्रसंगाच्च—

प्रपन्नैः वैश्वदेवादिकं नानुष्ठेयमेव । वैश्वदेवस्य काम्यत्वेन प्रपन्नाननुष्ठेयत्वमुक्तं । रहस्य सर्वस्वे परमैकान्तिभिः नाथयामुन प्रभृतिभिः शिष्टाग्रगण्यैर्वैश्वदेवस्याकरणादिदानींतनैरप्यकर्त्तव्यमेव । अन्यथा आचाराधिकरणविरोधात् । तत्र शिष्टाचार सिद्धानां धर्मत्वेन कर्त्तव्यत्वस्थापनेन तदनाचरितानामधर्मत्वेनाकर्त्तव्यत्वप्राप्तेः ।

अपिच आश्रमधर्माणां काम्यत्वेन तदंगानामपि काम्यत्वात् गृहस्थाश्रमांगभूत वैश्वदेवाख्यंकर्म परमैकान्तिनां न कर्त्तव्यमेव। भगवता भाष्यकृता आश्रमधर्माणां काम्यत्वं ह्यनुष्ठेयं बादरायणः साम्यश्रुतेरित्यत्रोक्तं। ब्रह्मसंस्थोऽमृतत्वमेतीति परत्रश्रूयमाणो ब्रह्मसंस्थशब्दोयं यौगिकः सर्वाश्रमिसाधारणः—सर्वेषामाश्रमिणां — ब्रह्मसंस्था संभवात्। ब्रह्मणि संस्था अस्य ब्रह्मसंस्थः इति, ब्रह्मसंस्थत्वं। तच्च सर्वेषां सम्भवत्येव—ब्रह्मनिष्ठा विकलाः केवलाश्रमिणः पुण्यलोकभाजः तेष्वेव ब्रह्मनिष्ठोऽमृतत्वभाक् भवतीति हि भाष्यते। न चाश्रमाणां काम्यत्वे प्रमाणाभावः। त्रयोधर्मस्कन्धाः इत्यारभ्य चतुरः आश्रमानुक्त्वा य एते पुण्यलोकाभवन्ति ब्रह्मसंस्थोऽमृतत्वमेतीति चतुर्णामप्याश्रमाणां पुण्यलोकभावत्वोक्त्या काम्यत्वस्य सिद्धत्वात्।

उपबृंहितं च पराशरेण प्राजापत्यं गृहस्थानां ब्राह्मंसन्यासिनांस्मृतमिति प्रकृत्य—"एकान्तिनस्सदा ब्रह्मध्यायिनो योगिनोहि ये। तेषां तत्परमंस्थानं यद्वै पश्यन्तिसूरयः" इत्यन्तेन। किं च ब्रह्मचर्यं समाप्य गृहीभवेत्—गृहाद्वनी भूत्वाप्रव्रजेत्—यदिवेतरथा—ब्रह्मचर्यादेव प्रव्रजेत्—गृहाद्वा—वनाद्वा यदहरेव विरजेत्तदहरेव प्रव्रजेत् इति श्रुतिरेव ब्रह्मचर्याद्याश्रमत्रयस्यकाम्यत्वं ब्रूते। सन्यासाश्रमस्य विरक्ताधिकारत्वोक्त्या अन्येषामाश्रमाणां सकामाधिकारिकत्वावगमात्। सन्यासाश्रमस्य चानयाश्रुत्या काम्यत्वानव॰ तावपि प्रमाणान्तरेण तत्सिद्धेरनपायात्

अपि च, यद्याश्रमांगकर्मणां परित्यागो, नस्वीक्रियते। तदा "तुल्यन्तुदर्शनमिति, सत्र विरोधः स्यात्। कथमिदमुपपद्यते—ब्रह्मविदां कर्मानुष्ठानं अननुष्ठानं च फलाभिसन्धिरहितस्य यज्ञादि कर्मणः ब्रह्मविद्यांगत्वात् तथाविधस्य कर्मणः अनुष्ठानदर्शनमुपपद्यते।

वक्ष्यति च "सर्वापेक्षा च यज्ञादिश्रुतेः" इतिफलार्थस्य तस्यैव यज्ञादेः कर्मणो मोक्षैक फल ब्रह्मविद्याविरोधित्वात् । तस्यानुष्ठान दर्शन मुपपन्नतरं—विद्यायाः कर्मांगत्वे कर्मत्यागः कथमपि नोपपद्यते इतिहि तत्सूत्रभाष्यं ।

अत्र मुमुक्षूणां ब्रह्मविदां विद्यांगयज्ञादि कर्मानुष्ठानं, काम्य कर्माननुष्ठानं च सूत्राभिप्रेतमिति प्रतिपादनेन, विद्यांगानामेव मुमुक्षुभिः विद्यानिष्ठैः अनुष्ठेयत्वात्, आश्रमांग कर्मत्यागस्सिध्यति, इत्याश्रमांगकर्मत्यागानंगीकारे, तद्विरोधस्स्यादेव ।

किंच आश्रमांगकर्मत्यागानंगीकारे, "विहितत्वाच्चाश्रमकर्मापि" इत्यधिकरण सूत्रभाष्यविरोधः स्यादेव । तथाहि, तत्सूत्र भाष्यं, यज्ञादि कर्मांगिका ब्रह्मविद्येत्युक्तं, तानि च यज्ञादीनि, कर्माणि अमुमुक्षुणा केवलाश्रमिणाप्यनुष्ठेयानि उत, नेति चिन्तायां—विद्यांगानां सतां केवलाश्रमशेषत्वे नित्यानित्य, संयोग विरोधः प्रयुज्यत इति—यज्ञादीनां, केवलाश्रमधर्मत्वं न सम्भवतीति, प्राप्ते, उच्यते आश्रमकर्मापीति । आश्रमस्य कर्मापि भवति—केवलाश्रमिणाऽप्यनुष्ठेयानीत्यर्थः "यावज्जीव मग्निहोत्रं जुहोति" इत्यादिना विहितत्वात्—जीवननिमित्ततया नित्यवद्विहितत्वादित्यर्थः ।

तथा विद्यांगतया च, तमेतं वेदानुवचने नेत्यादिना विहितत्वात्, विद्याशेषतयाऽनुष्ठेयानीत्याह,—"सहकारित्वेन च" विद्योत्पत्तिद्वारेण, विद्यासहकारितयाऽप्यनुष्ठेयानि—अग्निहोत्रादीनामेव जीवनाधिकार, स्वर्गाधिकारवत्, विनियोगपृथक्त्वेन, उभयार्थत्वं, न विरुद्ध इत्यर्थः इति दृश्यये ।

अत्र केवलानां अमुमुक्षूणां आश्रमिणमाश्रमाङ्गकर्मानुष्ठानं इति प्रतिपादनेन मुमुक्षूणां विद्यानिष्ठानां आश्रमिणां विद्याङ्गकर्मानुष्ठान-

मिति प्रतिपादनेन, सिद्धोपायनिष्ठानां परमैकान्तिनां आश्रमिणां उभयविधयज्ञाद्यनुष्ठानं सिद्धं ।

न च आश्रमांगकर्मत्यागे तद्भ्रंशापत्तिः । आश्रमांगकर्म शास्त्रस्य केवलाश्रमिविषयतया पारमैकान्त्याश्रमि विषयत्वाभावेन तद्भ्रंशाप्रसंगात् । अतएव 'श्रुतिस्मृतिर्ममैवाज्ञा यस्तामुल्लं-घ्येत्यादि विरोधापादनमपि निरस्तं । अधिकारिभेदेन विरोधा-प्रसंगात् । अन्यथा काम्यानामपि त्यागे विरोधापत्तेः । अधिकारि भेदेन विरोध परिहारस्य तुल्यत्वाच्च, "संग्रहायचलोकाना"मित्यादेः परमैकान्ति, विषय विशेषशास्त्र सिद्ध कर्मपरतया ततः काम्या-नामाश्रमांगानां विद्यांगानांवा कर्मणामनुष्ठानं न प्रसज्यतएव ।

किंच परमकारुणिकेन, नित्यव्याख्यानकृता "अथपरमैका-न्तिनः भगवदाराधनक्रमं व्याख्यास्यामः" इत्यादिनारब्धे ग्रन्थेः "भगवदाराधनोपयुक्त शुचिहेतुभूत संध्यावन्दनादिकं भगवत्परं, प्रतिपाद्य भगवदाराधनं च सप्रपंचमभिधाय, विष्वक्सेनादि पारिषदाराधनं, तदन्तर्गतचोक्त्वा प्रक्रान्त भगवदाराधन क्रमव्या-ख्यानं समापितं । तत्र परमैकान्तिनोऽवश्यानुष्ठेय भगवदाराधना-न्तर्गत कर्मप्रतिपादक ग्रन्थे—वैश्वदेवस्य नित्यव्याख्यानकृतानुक्त-त्वेन संध्यावन्दनाद्याराधन वैषम्यावगत्या, तस्य काम्यत्वं भाष्य-कृदभिप्रेतमितिसिद्धं ।

किंच भगवता भाष्यकृता, नित्ये, ततश्च सुसंस्कृतान्नमा-ज्याढ्यमित्यादिना—भगवन्निवेदनादि पर्यङ्कासनान्तमुक्त्वा, स्वानि-याम्य स्वरूपस्थितीत्यारभ्य भगवन्त मनुज्ञाप्येति, भगवदनु-ज्ञापनमुक्त्वा—भगवन्निवेदितात् हविषः विष्वक्सेनाय किंचिदुद्धृत्य निधाय, अन्यत्सर्वमाचार्यप्रमुखेभ्यः वैष्णवेभ्यः प्रदाय । भगव-

धागावशिष्ट जलादिभिर्द्रव्यैः विष्वक्सेनं अभ्यर्च्य, पूर्वोद्धृतं हविश्च-दत्वा, तदर्च्चनं परिसमाप्य अर्घ्यं दत्वा भगवन्तं अष्टाङ्ग प्रणामेन, प्रणम्य शरणमुपगच्छेदित्यत्र भगवन्निवेदितान्न विनियोग प्रति-पादनपरग्रन्थे विष्वक्सेन निवेदनार्थं हविरुद्धरणवद्वैश्वदेवार्थं हविरुद्धरणाकथनेन विष्वक्सेनार्थहविर्व्यतिरिक्तस्य सर्वस्य हविषः वैष्णवार्थत्व कथनेन च—वैश्वदेवस्य नित्यबहिर्भावेन काम्यत्वं भगवद्भाष्यकाराभिप्रेतमिति सिद्धं ।

किंच, "अशुद्धमिति चेन्न शब्दात्" इतिसूत्रे - प्राभाकर मतदूषण प्रघट्टिकायां - अथोच्येत - अग्नीषोमीयादिषु विधितःप्रवृत्तेर्नतद्विषयं निषेध विधिरास्कन्दति, रागप्राप्तविषयत्वात्तस्य इति नैवमिहापि-रागप्राप्तेरविशिष्टत्वात् स्वर्गकामोयजेतेत्येवमादौहि कामिनः कर्त्तव्य-तया यागाद्युपदेशात् यागादेः, स्वर्गसाधनत्वमवगम्य - फलरागत एव यागादौप्रवर्त्तते । अग्नीषोमीयादिष्वपि - तेषांफलसाधनभूतस्य यागादेः उपकारकत्वं शास्त्रादवगम्य रागादेव प्रवर्त्तते । लौकिक्यामपि हिंसायां केनचित्प्रमाणेन हिंसायाः, स्वसमीहित साधनत्वमवगम्य रागात्प्रवर्त्तत इति न कश्चिद्विशेषः । तथा - नित्येष्वपि कर्मसु सर्ववर्णानां स्वधर्मानुष्ठाने - परमपरिमितं सुखमिति आदि वचनात्फल-साधनत्वमवगम्य, रागादेव, प्रवृत्तिरिति - तेषामप्यशुद्धियुक्तत्वमिति भाष्यं श्रूयते । तत्र फलसाधनकर्मणां - तदंगकर्मणां लौकिककर्मणां नित्यकर्मणां च फलार्थतया रागतः प्रवृत्ति प्रतिपादनेन सर्वेषां काम्यत्वावगमेन वैश्वदेवस्यापि काम्यत्वं सिद्धं ।

नित्यकाम्यादि विभागश्च उपाध्यसंकराभिप्रायः इति च द्योत्यते । न हि केवलस्यैव काम्यस्यत्यागः - न नित्यसंवलितस्येति वक्तुं युक्तं

सन्ध्यावन्दनादि नित्यकर्मणोपि ब्रह्मलोकप्राप्त्यादि फल साधनत्व श्रवणेन - मोक्ष विरोधि फलसाधनत्वलक्षण त्याज्यतानियामकाकार विशेषात् ।

किंच, यदि वैश्वदेवादेः काम्यत्वं न स्वीक्रियते तदा नित्यानां नैमित्तिकानां च सर्वेषामित्यष्टादश गीताभाष्य विरोधस्यात् । तत्र सर्वेषां फलत्यागेनानुष्ठेयत्वोक्त्या फलसाधनत्व प्रतीतेः नित्यानामपि फलसाधनत्व सिद्धया तदनंगीकारे तद्विरोधस्यदुर्वारत्वात् - फलसत्व एव तत्त्यागस्य फलसाधनौचित्यात् ।

किंच, अध्ययनस्य स्वाध्यायसंस्कारस्य - जपादिना स्वरूपेणापि - फलसाधनस्वाध्यायार्थतया काम्यत्वेन तदंगभूतोपनयनस्य— तत्साध्य वर्णाश्रमाणां—तदंगभूतकर्मणां च सर्वेषां काम्यत्वेन वैश्वदेवस्यादि काम्यत्वं सिद्धमेव ।

किंच, वैश्वदेवस्य नित्यत्वेप्रमाणाभावात् काम्यतया तस्य नानुष्ठेयता—न च प्रत्यवायवचनान्नित्यत्वं—प्रत्यवायप्रतिपादक वचनासिद्धिः सिद्धौवा तस्य केवलाश्रमिविषयत्वेनान्यथासिद्धत्वात् । "नकुर्याद्वैश्वदेवन्तु विष्ण्वाराधनलोलुपः । यदिकुर्याद्विमोहेन ब्रह्महत्यासमंभवेत् ।" "वैश्वदेवहुतोच्छिष्टं भुक्त्वा चान्द्रायणं चरेत्" इत्यत्र विष्ण्वाराधनलोलुपः इति परमैकान्तिविषय निषेधवचनानुसारेण-प्रत्यवाय वचनस्य केवलाश्रमिविषयत्वावगमाच्च ।

ननु औपासनाग्नौ वैश्वदेवस्यकरणविधानात्तस्य नित्यत्वमिति चेन्न । अनित्यस्यापि सीमन्तादेः औपासनाग्निकरणदर्शनेन तावन्मात्रेण नित्यत्वासम्भवात् । जीवश्राद्धगयाश्राद्धयोः औपासनाग्नौकरणेऽप्यनित्यत्वेन—तत्रानैकान्त्याच्च - पितृविषयश्राद्धमात्रस्यालौकिकाग्नावेव विहितत्वेन जीवश्राद्धादेरप्यौपासनाग्नौकरणावश्यंभावात् ।

किंच, विष्णोर्निवेदितान्नन्तु पावनं लोक पावनं—इत्यादि वचनेन, भगवदाराधनादेवान्नसंस्कारसिद्धेः। तदर्थं वैश्वदेवकर्म—नानुष्ठेयम्, न च विकल्पः। केवलाश्रमादि विषयभेदेन सामंजस्येऽष्टदोषदुष्टविकल्पानवकाशात्। अन्यथा सामान्यविशेषस्थलेपि विकल्पोदुर्वारस्यात्।

किंच, किंवैश्वदेवः किं उपयोक्ष्यमाणस्य अन्नस्य संस्कारः, किं वा उपयुक्तस्य? नाद्यः, वैश्वदेवस्य भगवन्निवेदनार्थं न संस्कारत्वानभ्युपगमेन निवेदयिष्यमाणान्नसंस्कारत्वायोगात् "विष्णोर्निवेदितान्नेनयष्टव्यं देवतान्तरम्", इत्यादिवचनविरोधाच्च। प्राणा हुत्यादेरतुल्यदेवतोच्छिष्टान्नेन कर्तुमयुक्ततया प्राणाहुत्यादौ होष्यमाणान्नसंस्कारत्वायोगाच्च। रागप्राप्तभोजनस्य लौकिकतया तदर्थान्नेष्टसंस्कारानर्थकथने भोक्ष्यमाणान्नसंस्कारत्वासम्भवाच्च, नान्त्यः। सोमादीनामृत्विगादिभक्षणवत्—स्वामिशिष्टन्तुदासानां युक्तमाहुर्मनीषिणः कारिभ्योदेयं स्वदीयभुक्तोजितशेषभोजिना-इत्यादिवचनेन—भगवत निवेदनस्यैव, तत्प्रतिपत्तित्वात्। वैश्वदेवस्य प्रतिपत्तित्वे कृष्णविषाणानिरसनादिवत् स्वविधिप्रयुक्तत्वाभावेन—अशक्तौ जल दर्प्पणादिविधानानुपपत्तेश्चेति नान्नसंस्कारोवैश्वदेवः।

ननु आत्मसंस्कारत्वेन वैश्वदेवोनित्यः इति चेन्न। लौकिके कर्मणि तत्फलेवा कर्तृत्वभोक्तृत्वयोः संस्कारानर्थक्यात् वैदिकविषययोः संस्कारार्हत्वेपि "ऋणानि त्रीण्यपाकृत्य मनोमोक्षे निवेशयेत्—अनपाकृत्यमोक्षन्तु सेवमानो व्रजत्यधः" इति प्रत्यवाय परिहारार्थस्य तस्य संस्कारत्वासंभवात् यैस्तु द्रव्यं चिकीर्ष्यते, तानिगुणभूतानि, यैस्तु द्रव्यं न चिकीर्ष्यते-तानि प्रधानभूतानीत्युक्तयोः गुणप्रधान कर्मत्वयोः एकत्र विरोधात्। अतोन संस्कारोऽयमिति सिद्धं।

किंच विषभक्षण तृणच्छेदन चन्द्रानयनादौ प्रवृत्तिवारणाय वलवदनिष्टाननुबन्धि, इष्टसाधन कृति साध्यत्व ज्ञानस्य प्रवर्त्तकतया प्रवर्त्तकज्ञानविषयस्यैव विध्यर्थत्वेन विधेयस्य वैश्वदेवस्यापि इष्टसाधनतया, काम्यत्वमवर्जनीयमेव ।

न चैवं, सन्ध्यावन्दनादेरपि, विधेयतया इष्टसाधनत्वेन काम्यत्वं स्यादिति वाच्यं । "अहरहस्सन्ध्यामुपासीत", "यावज्जीवमग्निहोत्रं जुहोति" इत्यादि, स्वविधि वाक्यस्थ, अहरादि पद वीप्सादिना विधेय सन्ध्यावन्दनादेः नित्यत्वावगत्या, नकळञ्जं, भक्षयेदित्यादाविव, वाधेन—तत्र विधेः इष्टसाधनत्व तात्पर्याभावेन काम्यत्वानवकाशात् । विधिवाक्यावगत, नित्यत्वत्वानुसारेण, "यदह्नापापमकार्ष" इत्यादिमन्त्रवर्णस्य, "विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनं" इत्यादि अर्थ वादस्य च मन्त्रार्थवादाधिकरण सिद्धस्मारकत्व, प्राशस्त्याभ्यां, लब्ध प्रयोजनतया फलपरत्वकल्पनानवकाशेन, संध्यादेः रात्रिसत्रन्यायाविषयत्वेनाफलतयावाधेन तत्रविधेः इष्टसाधनत्व तात्पर्यासंभवेन संध्यावन्दनादेः ततः काम्यत्वानवकाशात् ।

न च प्रकृतेपि—प्रत्यवाय, वचनावगत, नित्यत्वानुरोधेन—विधेः इष्टसाधनत्व—तात्पर्यायोगात्—न काम्यसिद्धिः इतिवाच्यं । प्रधान विधिवलेन—प्रत्यवाय वचनस्यैव अर्थवादरूपतया कथंचिन्नेयत्वात् । संध्यादेस्तु स्वविधिवाक्यकृताहरादिपद वीप्साद्यवगत नित्यत्वबलायाताफलत्व बाधितेष्टसाधनवत्तया तत्र विधितात्पर्यासंभवेन, वैषम्यात् ।

प्रत्यक्षश्रुत, प्रत्यवाय, वचन कल्प्यविधेः उपजीव्य प्रत्यवायवचनानुसारित्वेपि — द्वयोः प्रत्यक्षश्रुतिस्थले - प्रधानभूत

विध्यनुसारेण प्रत्यवायवचनस्यैव - नेतुं युक्तत्वात् । किंच, स्थालीपाकादिवत् अग्निमुखादेरभावेन वैश्वदेवस्य न नित्यत्वमुपपत्तिमत् ।

किंच, अकरणेप्रत्यवायेपि शिवरात्रिवदधिकारिविशेष नियतत्वेन, परमैकान्तिभिरननुष्ठानं उपपद्यतएव । किं बहुना ऋषयः- काव्षेयाः - ऊचुः "यूयं वर्णधर्मिणः तस्मिन्दृष्टेपरावरे - किमर्थावयमध्येष्यामहे" इत्यारभ्य विप्रतिषिद्ध काम्य वैश्वदेवोच्छिष्टं न भोक्ष्यामः । किंवा अदृढेन यज्ञेनदानेनेतिश्रुतिः—विधियज्ञाज्जपयज्ञो- विशिष्टो दशभिर्गुणैः "कुर्यात् घृतपशुं संगेकुर्यात्पिष्टपशुं तथा । नत्वेवतुवृथा हन्तुं पशुमिच्छेत् कथंचन ॥ पशुयज्ञैः कथं हिंस्रैः मादृशोयष्टुमर्हति । हिंसात्मकैस्तु किंतस्य यज्ञैः कार्यं महात्मनः ॥" "प्रस्वापेच प्रबोधेच पूजितो येनकेशवः । किंकार्यं वैश्वदेवेन देवपूजा परस्य वै ॥" किंवायज्ञेन दानेन वैश्वदेवेन भूमिप । वैश्वदेवहुतोच्छिष्टं न भुंज्यात् वैष्णवोत्तमः ॥ शुनोच्छिष्टं पुरोडाशं यथात्यक्ष्यन्ति याज्ञिकाः ॥ विष्णोर्निवेदितान्नन्तु पावनं लोकपावनं—तेनैव चारितार्थत्वात् न साधुश्वनिवेदितम् कथं प्राणाहुतिः कार्या ? देवतान्तरशेषतः कौलेयकुलशिष्टं हि कथंराज्ञो निवेदयेत् ! स्वामिशिष्टन्तुदासानांयुक्तमाहुर्मनीषिणः— यदिपाकद्वयं कुर्यात्साम्यतास्यात् हरेः ध्रुवं—अन्नसंस्कारसिद्ध्यर्थं वैश्वदेवा यजन्तिहिः— विष्णोर्निवेदनेनैव संस्कृतं पावनंचतत्—इत्यादिवचन सहस्रं वैश्वदेवाकरणे प्रमाणं ।

न चैषामाकराभावः शंक्यः—वार्त्तिककारवर्णित विरोधाधिकरण न्यायभंगप्रसंगात् । तत्रहि स्वीयप्रत्यक्षाभावस्य वस्त्वभावासाधकत्वं— न्यायभंगप्रसंगात् । सकलपुरुषप्रत्यक्षाभावश्च असिद्धः इत्युक्तं—पूर्वाचार्यग्रन्थादौदर्शनेन— सकलपुरुषप्रत्यक्षाभावश्च असिद्धः इत्युक्तं—पूर्वाचार्यग्रन्थादौदर्शनेन— शाखानंत्येन च अभावस्य निश्चेतुमशक्यत्वात्—शाक्यादिस्मृति स्थलेतु—वेद, वैदिक विद्वेषिणां—वेदाध्ययन विरहिणां—अनन्यथा-

सिद्धश्रुति विरोधविहित शाकयादि मूलकल्पनं तु अप्रामाणिकमेवेति सिद्धं। वैश्वदेवस्य अधिकारिविशेषनियतत्वं—

नन्वेवं सर्वेषांनित्यानां नैमित्तिकानां चकर्मणां—वर्णाश्रमानुबन्धिनां च काम्यत्वेन—अधिकारि विशेषविषयत्वेन च परमैकान्तिभिस्त्यागस्वीकारे—विधिनिषेधशास्त्रावश्यकत्वेन कामचारापत्तावलेपक्रमवतार इति चेन्न।

स्वरूपपरप्रणवशिक्षित अनन्यार्हशेषत्व, अनन्यसाधनत्व, अनन्यभोग्यत्व अध्यवसायशीलानां नमःपदनियमित अत्यन्तपारतंत्रियस्वरूप ज्ञानानां—नारायणपदोपात्त - अखिल कल्याण-गुणणानुभवजनितप्रीतिप्रेरित—कैंकर्याख्य फलवाचक—तादर्थ्य चतुर्थ्यन्वित—नमः पदविशोधित कैंकर्यगत—पारार्थ्य परिज्ञानवतां जायमान भगवत्कटाक्षलब्ध—स्वाचार्योपदिष्ट तत्व हित पुरुषार्थ, याथार्थ्यश्रद्धावतां आकिंचन्याद्यधिकारसंपन्नानां - लक्ष्मीपुरुषकार-पुरस्सरं भगवतिन्यस्तसमस्तात्मभराणां - अत्यन्त भगवदानुकूल्य व्यवसायिनां - "साहानिः तन्यहच्छिद्रं क्षणेपिते - यद्विरहः" इत्यादि प्रमाणानुवदित भगवद्विरहलब्ध प्रसंग भीरुताकानां— जिघ्रघ्राणेत्यादि प्रकारेण भगवता स्वविषयविनियोजित निखिलकरण कलेबरवृत्तिकानां भगवद्भोगोपकरणतैकभाजनानां भगवदत्यर्थप्रियाणां (अहमज्ञानजं......... ....तमोनाशयामि - सर्वपापेभ्यो मोक्षयिष्यामि) इत्युक्तरीत्याभगवन्निरस्त समस्तविध उपाय उपेय विरोधिदुरित कर्मणां—देशान्तरगतपुत्रलाभप्रवणमनस्क पितृसदृश - भगवदत्यन्तापेक्षित स्वप्राप्तिकानांविषयान्तरप्रावण्यादि विरहेण - स्वतः, परतो वा बुद्धितः कामचार प्रसक्त्यनवकाशात् - प्रामादिकस्य च कादाचित्कस्या किंचित्करत्वात् न हि कश्चित् अपरिच्छिन्न,

अनवधिकातिशयानन्दापरिमितोदारगुणसागरं, अव्याजबन्धुमखिल-स्वामिनं, परमप्राप्यं भगवत्कटाक्षलब्ध ज्ञानातिशयेन, फलदशातुल्यं अवाप्नुवन्विषयान्तरमीक्षते। यत्र नान्यत्पश्यति, स्थितेररविन्दे—इत्याद्युक्त विषय वैलक्षण्यस्वाभाव्यात्—न वा भगवानीश्वराय निवेदितुमित्याद्युक्तरीत्या चेतनप्राप्तिमुद्दिश्य, चेतनोन्निनीषया—जगत्सृष्ट्यादि, बहुतरव्यापारकलापमनुतिष्ठन्-चेतनं पुनरधोनिनीषति तथासति हि उन्मत्तत्वप्रसंगात्।

न चैतादृशाधिकारिदौर्लभ्यं शक्यशङ्कं देश काल चेतनानन्त्येन-तदभावस्य निश्चेतुमशक्यत्वात्। शुकमुनिप्रभृतीना-मुत्पत्तिशिष्ट विरक्तिकानां बहूनां दर्शनाच्च। न चेदानीन्तनानां तादृश दशा विरहिततया कथमिदमनुष्ठानं उपपद्यत इतिवाच्यं। भवन्मतेऽपीदानीन्तनानां त्रैवर्गिक विरक्ति विरहिततया काम्य-कर्माननुष्ठानासिद्धिप्रसंगात् जायमान भगवत्कटाक्षमूलाचार्योप-देशायत्त विषयान्तरदोषदर्शनायात विषयान्तर वैराग्यादिसिद्धिवत्। परमप्राप्य कैंकर्येतर वैराग्यादिसिद्धेरपि संभावितत्वात्। न ह्येतावता सन्ध्यादेरननुष्ठानमापादनीयं-भवन्मतेपि कृत्स्नानुष्ठानप्रसंगात्—अनुष्ठान अननुष्ठानयोरस्माकमवशिष्टत्वात्। नह्येवं शास्त्रातिलंघनं दोषः—शास्त्राणामधिकारि विशेषनियतत्वात्-न च शास्त्रवश्यानां नित्येष्वपि शक्ताधिकारादशक्यत्यागः शक्यस्य चानुष्ठानमिति न कृत्स्नानुष्ठानप्रसक्तिः। युष्माकन्तु-शास्त्रोत्तीर्णानां संध्यादि कृत्स्ना-ननुष्ठानप्रसंगः इतिवाच्यं। नित्यानां-विहगभुजगादीनां-समस्त-विधकैंकर्य समर्थानामपि भगवत्संकल्पाधीनकतिपय कैंकर्यानुष्ठानान-नुष्ठानवत्—स्वपरस्वरूप ज्ञानविशेष शीलानामपि-भगवत्संकल्पाधीन कतिपय संध्यादि कैंकर्यानुष्ठानोपपत्तेः निश्शेषनिवृत्तकर्मणां पर-

भक्त्यादिमतां शठारिप्रभृतीनां - भगवद्विभूतिभूत संसारि जन दुर्गति प्रतिचिकीर्षया - भगवदनुभवगर्भ परोपदेशादि प्रवृत्तिवत् परार्थसंध्या द्यनुष्ठानोपपत्तेश्च ।

न चैवं कर्मान्तरमपि सर्वं - तथैवानुष्ठेयं स्यादिति युक्तं । आरोपे सति - निमित्तानुसरणं—न तु निमित्ते सतीत्यारोपः इति न्यायपराहतत्वात् । प्रपन्न विषये स्वतः प्रसन्नेन भगवतैव समस्त प्रारब्धादिकर्माश्लेष विनाशकरणेन कर्मवैचित्र्यासंभवेन तदीय दृष्टा दृष्टार्थ समस्तव्यापारेषु - स्वतन्त्र भगवत्संकल्पाधीनतायाएव अवश्या-श्रयणीयत्वात् । भगवान् स्वशेषभूतेन स्वकीयदेहेन्द्रियाद्युपकरणैः स्वकीय सांस्पर्शिकादीन् स्वप्रीतये स्वयमेव प्रतिपादयितुं उपक्रमते । इत्येव पूर्विकानुष्ठान अनुसंधान बाहुळ्य दर्शनात् । इतरथा बहुतर-रहस्यत्रय - तदुपबृंहण स्मृतीतिहासपुराणपूर्वाचार्य व्याख्यान वैघटया-पातात् इत्यलमतिविस्तरेण इति ।

तथैवोक्तंसच्चरित्रपरित्राणे - स्मृतिरत्नाकरे परिशिष्टे "शाकंवा, यदिवापत्रं पुष्पंवा यदिवाफलं । संकल्पयेद्यदाहारं तेनाग्नौजुहुयादपि" इति । तत्रैव, यमः, "पंच सूना गृहस्थस्य वर्त्तन्तेऽहरहस्सदा । खण्डनी पेषणी चुल्ली उदकुम्भ उपस्करः॥ एतानि वाहयन्विप्रोवध्यतेवै मुहुर्मुहुः। एतासांपावनार्थन्तु महायज्ञाः प्रकीर्तिताः ॥ ब्रह्मयज्ञोदेवयज्ञः पितृयज्ञ-स्तथैव च । भूतयज्ञोनृयज्ञश्च पञ्चयज्ञाः प्रकीर्त्तिताः ॥" मनुः "अध्यापनं ब्रह्मयज्ञः पितृयज्ञश्च तर्पणम् । होमोदैवो बलिर्भौतो नृयज्ञोतिथिपूजनं ॥" सूनाहिंसास्थानानि - अथसूनांव्याख्यास्यामः - जंगमस्थावरान्प्राणिनः सूदयन्तीति-सूना - इति हारीतस्मरणात्—खण्डनी उलूखलादिः, पेषणी दृषदादिः, चुल्ली, पाकस्थानं, उदकुम्भः उदपानं, उपस्करः शूर्पादिः एतानिवाहयन् तत्तत्कर्मप्रापयन्— वध्यते पापेन युज्यते इत्यर्थः इति ।

अत्रहि आत्मार्थः पाकः । तत्र पंचसूनाप्रायश्चित्ततया पंचयज्ञादिकं कर्त्तव्यमितिलब्धे अन्यत्र च परमैकान्तिनः भगवद्यागः प्रधानं । तदर्थमेव तु तस्य पाकः अनुयागशब्दितं देहधारणार्थमितभोजनं तु तस्य प्रतिपत्ति संस्कारः इति । तथा च शाण्डिल्यः "भोगानुपार्ज्य यागार्थं विधिवत्स्नानमाचरेत् । भगवद्यागयोग्यं 'यत्तदेवाशनकर्मणि ॥ भोजनार्हमिदं देवयागार्हमिति नेष्यते ॥" इति । भगवद्भुक्तशेषंयत् भुक्तं भागवतेनयत् तदेव भोज्यमुद्दिष्टं भगवद्यागसेविभिः" इति च । तथा च पंचसूनाप्रायश्चित्तरूपं, पंचयज्ञादिकं - आत्मार्थ - पाकसंकल्पयितृविषयं, न तु भगवद्यागार्थ पाकसंकल्पयितृ विषयं । परमैकान्त्यधिकारिविषये, मन्निमित्तंकृतंपापमपि धर्मायकल्पत इत्यादिना भगवदर्थपापे पापाभावबोधनेन प्रायश्चित्तानपेक्षणात् आत्मार्थ पाकेतु प्रायश्चितापेक्षणात् विधानं ।

किं च शरणागताधिकारिणाह्युत्पन्नानर्थनाशनं प्रायश्चित्तं नानुष्ठेयं । तथा च लक्ष्मीतन्त्रे-"प्रायश्चित्तात्मकः कश्चित् उत्पन्नानर्थनाशनः । एवंरूपं समभ्यर्च्यय प्रक्षीणाशेषपातकः अनुष्ठितक्रतुशतो भवत्येव न संशय ॥" तमंशंनैवकुर्वीत मनीषीपूर्वराशिवत् इति । किं च कृतास्समस्तायज्ञाश्च दानानि च तपांसि च - प्रायश्चित्तमशेषेण नित्यमर्चयताहरिं इति अनेनैव प्रपन्नस्य भगवन्तं सनातनं तस्यानुबन्धाः पाप्मानः सर्वेनश्यन्तितत्क्षणात् । "कृतान्यनेन सर्वाणि तपांसि तपतां वर सर्वेतीर्थाः सर्वयज्ञास्सर्वं दानानिचक्षणात् कृतान्यनेन मोक्षश्च तस्य हस्ते न संशयः" इति । भरद्वाजादिवचनैःभगवदर्चनस्यैव, पंचयज्ञकार्यकरत्वावगमान्नपरमैकान्तिभिः पंचयज्ञादिकं कर्त्तव्यं ।

किंच "यद्वा-परमसंस्काराः प्राप्यागुरुसमानतः। सर्वत्रहरिरेवार्च्यो नाग्निकर्मेतिकेचन ।" इति भरद्वाजेन भगवद्याग प्रधानस्याधिकारिणि अग्निकर्मशब्दितं पंचयज्ञादिकं नानुष्ठेयमित्युक्तं—

किंच पंचयज्ञादेः काम्यत्वात् - काम्यस्य च अनर्थसाधकं किंचित् - किंचिच्चाप्यर्थसाधकमित्युपक्रम्य उपायापाय संज्ञौतुपूर्व-राशी परित्यजेदिति लक्ष्मीतन्त्रे प्रपन्न विषये प्रतिषेधात् न पंचयज्ञा-दिकं प्रपन्नेनानुष्ठेयं। तथा च भृगुः काम्यत्वमाहुः "यत्फलं सोमयागेन प्राप्नोतिधनवान्द्विजः सम्यक् पंचमहायज्ञैर्दरिद्रस्तदवाप्नुयत्" इति आपस्तंबश्च - य एतानव्यग्रं यथोपदेशं कुरुते, नित्यं तस्य स्वर्गः पुष्टिश्चेति ।

ननु च अकरणे प्रत्यवायस्मरणान्नित्यत्वं तथा च - अगस्त्यः "सूनानिर्णीतदोषाये सर्वेतेवृषळास्मृताः न तेषामधिकारोस्ति क्वचिद्धर्मे दुरात्मनामिति" - व्यासः "पंचयज्ञाश्च योमोहान्नकरोतिगृहाश्रमी तस्य नायं न परो लोको भवति धर्मतः" इति। यमश्च "अकृत्वा वैश्वदेवं तु भुंजते ये द्विजाधमाः। वृथा तेनान्नपाकेन काकयोनिं व्रजन्तिते" इति। अतः पंचयज्ञादेर्नित्यत्वमिति चेन्न।

एषां वचनानां निमित्तवतः प्रायश्चित्तमकुर्वतः कर्मानधिकार प्रयोजक दोषातिशयपरतया उपपन्नत्वेन - नित्यत्व बोधकत्वाभावात् - प्रायश्चित्तरूपत्वस्यावश्यकत्वात् शरणागताधिकारिव्यतिरिक्त विषये नित्यत्वबोधकत्वाच्च। यथाहि शिवरात्र्यादेः अवैष्णव विषये नित्यत्वं, तद्वदेवाप्रपन्नविषये, पंचयज्ञादेर्नित्यत्वपरत्वं-" वैश्वदेवस्तुकर्तव्यः पंचसूनापनुत्तये" इत्यानुषंगिकं फलं-प्रत्यावाय निवृत्तेरेवप्रधानत्वात्-इति तु न सम्यक्। उदाहृत वचनानां—नैमित्तिकानुष्ठानाभावकालीन, निमित्तमूलकदोषातिरेकपरत्वेनाप्युपपत्त्या प्रत्यवायबोधकत्वाभावात्।

तदिदमाशक्य परिहृतं, रहस्य सर्वस्वे न च प्रत्यवायवचना-न्नित्यत्वं। प्रत्यवाय प्रतिपादकवचनासिद्धेः। सिद्धौवा तस्य केवला-श्रमिविषयत्वेन अन्यथासिद्धत्वादिति। एवं विज्ञानेश्वराभ्युपगतः

पुरुषसंस्कारपक्षः निगमे प्रतिपादितः। अन्नपुरुष उभयसंस्कारपक्षश्च केवलाश्रमि विषयः इति न विरोधः—परमैकान्ति विषये तु। न पुरुषसंस्कारावकाशः। "मन्निमित्तं कृतं पापमपि धर्मायकल्पते" इत्याद्युक्तेः। नाप्यन्नसंस्कारः पंचयज्ञादेः भगवदाराधनार्थान्नसंस्कारत्वानभ्युपगमात्; नापि प्राणाहुतौ होष्यमाणान्नसंस्कारः। एवं कृत्वातिथिमुख्यैस्सहभुक्त्वा प्रतिपत्ति कर्म कुर्यादिति भोजनस्य वैश्वदेवादि प्रतिपत्तिसंस्कारत्वोक्तेः।

न वा पंचयज्ञादेर्भगवदाराधन प्रतिपत्तित्वं युक्तं। प्रतिपत्तेः स्वविधिप्रयुक्तत्वाभावेन अशक्तौ जलतर्पणादि विधानानुपपत्तेः। भगवद्भुक्तशेषं यद्भुक्तं भागवतेन यदित्यादिना परमैकान्तिसमाराधनपूर्वकं स्वयं अनुयागशब्दित मितभोजनस्यैव तत्प्रतिपत्तित्वोक्तेः 'यूयं वर्णधर्मिणः' इत्यारभ्य—'विप्रतिषिद्धकाम्य वैश्वदेवोच्छिष्टं न भोक्ष्यामः' इति श्रुतिः। "किं कार्यं वैश्वदेवेन देवपूजापरस्यवै। किं कार्यं यज्ञेन दानेन वैश्वदेवेन भूमिप॥ वैश्वदेव हुतोच्छिष्टं न भुंज्याद्वैष्णवोत्तमः। शुनोच्छिष्टं पुरोडाशं यथात्यक्ष्यन्ति याज्ञिकाः॥" "विष्णोर्निवेदितान्नन्तुपावनं लोकपावनं। तेनैव चरितार्थत्वात् साधुतत्वं निवेदितम्॥ कथं प्राणाहुतिंकुर्याद्देवतान्तरशेषतः॥" इत्यादि—

स्मृतिश्च रहस्य सर्वस्वकृता प्रदर्शितात्रानुसन्धेया। अत एव नित्ये भगवता भाष्यकृता वैश्वदेवादेरवकाशो निरुद्धः। "नित्य त्रयं तु भक्तस्य, नित्यनैमित्तिकत्रिके। ज्ञानिनः कर्मिणस्तुस्यात्सर्वमेतत्त्रिकं त्रिकं।" "नित्यनित्यं प्रपन्नस्य शिष्टेष्वष्टसु न ग्रहः" इति सांप्रदायिकाः। एवंच, यत्पराशरस्मृत्युत्तरखण्डगतं वचनं तथैव पञ्चयज्ञादीति। यच्चप्रपन्नपारिजातगतं वचनं संध्यार्च्चां पंचयज्ञादीति—तत्कामाभिषंगयुक्त मन्दाधिकार प्रपन्नविषयमित्ययमर्थः

तत्तत्प्रकरण पर्यालोचनयालभ्यते पराशरेणहि काम्यार्चनमुक्तं। प्रपन्नपारिजातेतु सीमन्तोन्नयनादिकमुक्तं। अतस्तत्साहचर्यात्पञ्च-यज्ञादिकमपि मन्दाधिकारिविषयं। नहि उत्तमाधिकारिणो निखिल-विषयविरक्तस्य काम्यार्चनाद्यवकाशः। अतः पंचयज्ञानां अनुष्ठानं अननुष्ठानं च केवलाश्रमि, परमैकान्तिरूप अधिकारिभेदेनोपपन्नम्। केचित्तु वैश्वदेवाकृतं पापं भिक्षुरेको व्यपोहति न भिक्षुणाकृतं पापंवैश्वदेवो व्यपोहति इति पराशरवचनस्य-भिक्ष्वाराधनेन वैश्वदेवाकरण दोषोनास्तीत्यर्थं मन्वानाः भगवदाराधनान्तर्गत यतिवरार्चनस्य नित्यत्वात् वैश्वदेवं न कर्त्तव्यमिति मन्यन्ते। स्मृतिरत्नाकरेतु-"वैश्वदेवात्प्रागेव भिक्षौ समागते भिक्षांदद्या वैश्वदेवाकरणे नदोषः" इति भावः। इत्युक्तं वैश्वदेवात्प्रागेवेत्यर्थेतु अक्षरस्वारस्यं मृग्यं। यश्चशाण्डिल्येन "आवाह्याग्नौ जगन्नाथं मनसाभ्यर्च्य शक्तितः। जुहुयात्काष्ठ पुष्पान्न घृतक्षीरतिलोदकम्" इति—यागानुयागयोरन्तराले होमोभिहितः सतु पापक्षयः। क्रियापूर्तिः। सर्वोपद्रव निग्रहः। ऋद्धि-श्चित्तप्रसादश्च तस्मात् होमं नलोपयेत्—विशुद्धद्रव्य योगेन पंचकाल-निषेविणां—श्रद्धया जुह्वतान्नित्यं नसाध्यमिह किंचनेति-पूर्वानु-सारात्फलविशेषार्थ इति तदकरणेपि न विरोधः। एवमेव, पाद्म-पुराणोक्त वैकुण्ठा होमाकरणेपि न विरोधः। अग्निकार्यशब्दितौपासन अग्न्याधेयन्तु नाग्निकर्मेति केचनेत्यादिभिः अवगत पक्षभेदेन वैकल्पि-कमिति यथाचारं व्यवस्था। अतः भगवद्यागशिष्टस्य अन्नादेः तदी-याराधन पूर्वक मतिथ्यभ्यागत पोष्यवर्गैस्सह स्वयं देहधारणार्थमित भोजनमेव प्रतिपत्तिरिति।

व्यासः "सायंप्रातर्वैश्वदेवः कर्तव्यः बलिकर्मच। अनश्नतापि कर्त्तव्यमन्यथा किल्बिषीभवेत्।" नारायणः (1) सभार्यस्तु शुचिः

स्नातो विधिनाचम्यवाग्यतः, प्रविश्य सुसमिद्धेग्नौवैश्वदेवं समाचरेत् । (2) लोकाक्षिः—द्विजस्तु अहरहः कुर्याद्वैश्वदेवं हुताशने, अन्यथादोषमाप्नोति वृक्षस्यात्कण्टकी भुवि ॥ (3) गौतमः—वैश्वदेवं परित्यज्य यो भुङ्क्तेद्विजसत्तमः महान्तंनरकंगत्वा वृक्षोभवतिकण्टकी (4) प्रायश्चित्तमिदं प्रोक्तं वैश्वदेवापरिग्रहे, फलकृच्छ्रं तदाकृत्वा शुद्धिमाप्नोतिपूर्वजः (5) आपस्तम्बः—यस्याग्नौनक्रियते यस्यचाग्रेनदीयते न तद्भोक्तव्यं (6) बोधायनः—अहरहर्भूतेभ्यः बलिंहरेत् (7) नरसिंहपुराणे पौरुषेणैवसूक्तेन—ततोविष्णुं समर्चयेत् वैश्वदेवं ततः कुर्याद्बलिकर्मततो मुखान् (8) वैश्वदेवेन येहीनाः आतिथ्येनबहिष्कृताः सर्वेते वृषलाज्ञेया प्राप्तवेदा अपि द्विजाः (9) व्यासः एकस्मिन्पाचयेद्भाण्डेपूर्वं विष्णुनिवेदनं— वैश्वदेवं ततः शिष्टाद्व्यासस्यवचनं तथा । आश्वमेधिके—पंचयज्ञान्परित्यज्य योभुंक्ते हि द्विजाधमः—सभवेद्विड्वराहश्च श्वानयोनिषुजायते । व्यासः—पयोमूल फलैर्वापि पंचयज्ञान्समाहरेत्—अकृत्वा पंचयज्ञांस्तु भुंक्त्वा चान्द्रायणं चरेत् । पारमेश्वरसंहितायां— ये वैश्वदेवनिरता विप्राद्या वैष्णवास्तु ते, यल्लब्धं भगवद्भुक्तं - तस्मादादाय तुर्यांशकं, तेनकृत्वा-वैश्वदेवमवशिष्टांशकेनतु-कुर्युः प्राणादियात्रान्तु विधानेन द्विजो-त्तम-इत्यादिकं वचनं - आत्मार्थपाकसंकल्पयितृ - अधिकार्यन्तर विषयं । न तु सिद्धोपायनिष्ठाधिकारिविषयं । वासुदेवसंहितायां—

"मद्यागानन्तरं देविवैश्वदेवंविनारमे । अनुयागस्तदाकार्यः परमैकन्तिाभिर्द्विजैः ॥" इत्यादिवचनसद्भावात् तथा च प्रपन्नैः वैश्वदेवादिकं नकर्त्तव्यमिति सिद्धम् ।

इति श्रीसदनुष्ठानदर्पणे वैश्वदेवाकरणविषयो नाम सप्तदशप्रतिफलनं

श्रीः

विषुसंक्रान्ति अयनसंक्रान्ति चतुष्टय मात्रतर्पणकर्त्तव्यत्व विषये प्रमाणं

"प्रपन्नैः विषुद्वय अयनद्वय संक्रान्ति चतुष्टयतर्पणमनुष्ठेयं, तदितरत् नानुष्ठेयं। सच्चरित्रपरित्राणे, संक्रान्तिश्राद्धस्य अकरणेप्रत्यवायस्मरणान्नित्यत्वं - तत्र अयनेद्वे विषुवेद्वे" इति भागवते तन्मात्रग्रहणात् विशेषेण अयनद्वयमिति - विषुवद्वय अयनद्वययोः विशिष्यविशेषस्मरणाच्च विषुद्वयं, अयनद्वयं च अनुष्ठीयते—अन्यासु संक्रान्तिषु, न निर्बन्धः। इत्यादिना प्रपन्नानां विषुद्वय अयनद्वयमात्र तर्पणस्य प्रतिपादितत्वात्।

"न च प्रत्यब्दे वा च मासेवा भवितव्यानियानि च। उपवास व्रतादीनि नित्यान्याहुर्मनीषिणः" इति सुमन्तुवचनेन "यदासूर्यः पूर्वराशेः परराशिगतोभवेत्। तदा संक्रान्तिसंज्ञश्च पुण्यकाल उदीरितः॥" इति शातातप वचनेन च संक्रान्ति श्राद्धनित्यत्यत्व प्रतिपादनात् सर्वसंक्रान्तिषु तर्पणमावश्यकमिति वाच्यं।

वसिष्ठस्मृतौ " उपोष्यैव तु संक्रान्त्यां स्नातो योऽभ्यर्चयेद्धरिं— प्रातस्सर्वोपचारेण सकाम्य फलमश्नुते" इति,। अयने विषुवे चैव त्रिरात्रोपोषितोनरः स्नात्वाच पूजयेदीशं सर्वान्कामान्समश्नुते इति—"सप्तोपोष्यारवेर्वारात् आदौस्नात्वाथ संक्रमे - अर्कमभ्यर्चयेद्यस्तु सोऽदुःखस्सुखमश्नुते" इति स्मृत्यन्तरे संक्रान्ति विषुवेद्वे च विशेषेणायनद्वयं व्यतीपातो जन्म ऋक्षं चन्द्रसूर्यग्रहस्तथा–इत्येतां श्राद्धकालांस्तु काम्यानाहप्रजापतिः इत्यादि वचनैः संक्रान्तिश्राद्धस्य काम्यत्वस्य निर्णीतत्वात्।

तर्हि सर्वसंक्रान्त्युच्छेद प्रसंगः इति चेन्न। तमंशं नैव कुर्वीतेति केषांचित्कर्मणां त्याज्यत्वोक्त्या एकस्मिन्विषये विधिनिषेधयोः

प्राप्तयोस्सतोः विषयव्यवस्थायाः सर्वतान्त्रिकसिद्धत्वेन विषुद्वय अयनद्वयश्राद्धस्य प्रपन्नाधिकारकत्वं तदितर संक्रान्तिश्राद्धस्य—फल-कामाधिकारकत्वमिति व्यवस्थापयितुं युक्तत्वात् । अयने विषुवेद्वे च चतस्रः षडशीतयः चतस्रो विष्णुपद्यश्च संक्रान्त्योद्वादश स्मृताः इति वृद्धवासिष्ठविवरणं । कार्ष्णाजिनिना – "मृताहेऽहरहर्दर्शे श्राद्धं यच्च महालये - तन्नित्यमुदितं सद्भिः नित्यवत्तद्विधानतः" इति मृताहादौ श्राद्धस्य नित्यत्वमुक्तं । तत्र अहरहश्राद्धस्य शिष्टाचाराभावात् स्मृति मुक्ताफलोक्तरीत्या श्रद्धालुविषयत्वं परिकल्पितं, सकृन्महाळय साधारण महाळय शब्दप्रयोगेपि पक्षमहाळयस्य कात्स्न्र्येन शिष्टाचाराभावात् पक्षमहाळयस्य काम्यत्वं सकृन्महालयस्य केषां चिदावश्यकत्वं परिकल्पितं । याज्ञवल्क्येन "राहुदर्शन संक्रान्ति विवाहात्ययवृद्धिषु । स्नानदानादिकं कार्यं निशिकाम्यव्रतेषु च ॥" इति उपरागसंक्रान्त्यादौ रात्रि श्राद्धकर्त्तव्यत्व विधानेपि संक्रान्तेः शिष्टाचाराभावात् - तदितर-कालकर्त्तव्यत्वं परिकल्पितं वैदिकसार्वभौमैः । तेन रात्रौश्राद्धव्रतादी-निकार्याणि भवन्तुन निष्कामुकेनेति रात्रौसंक्रान्ति श्राद्धस्य फल-कामाधिकारकत्वं परिकल्पितं । तद्वदत्रापि पूर्वाचार्यग्रन्थेषु विषुद्वय, अयनद्वयमात्र तर्पणकर्त्तव्यत्वं व्यवस्थापितं। सकृन्महळयस्य अन-नुष्ठेयत्वे प्रमाणमुत्तरवक्ष्यते । संक्रान्तौ यानि दानानि हव्यकव्यानि दातृभिः तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनीति - शातातपोक्त्या संक्रान्तिश्राद्धादेः पुनर्जन्म प्राप्त्यादि फलप्रतिपादनात्—विषुद्वय अयनद्वय व्यतिरिक्त संक्रान्ति तर्पणं प्रपन्नाननुष्ठेयमेव । अतः प्रपन्नैः विषुद्वय अयनद्वय संक्रान्ति चतुष्टयमात्रतर्पणमनुष्ठेयमेवेति सिद्धं ।

इति श्रीसदनुष्ठानदर्पणे विषुसंक्रान्ति अयनसंक्रान्ति
चतुष्टयमात्र तर्पणकर्त्तव्यत्व विषयो नाम अष्टादशप्रतिफलनं
श्रीरस्तु

श्रीः

श्रीमते रामानुजाय नमः

श्रीमद्वरवर मुनये नमः   श्री शुद्ध सत्व गुरवे नमः   श्रीमद्वरद गुरवे नमः

एको न विंश प्रतिफलनम्

सकृन्महालयाकरण विचारः

प्रपन्नैः सकृन्महाळयं अननुष्ठेयं, तथा वचनसद्भावात्, शिष्टाचाराच्च। तथाहि श्रीधराचार्य विरचित, तैत्तरीयोपनिषद्भाष्ये "यान्यनवद्यानिकर्माणि, तानिसेवितव्यानि नोइतराणि। यान्यस्माकं सुचरितानि, तानित्वयोपास्यानि, नोइतराणि" इतिमंत्रः। तद्भाष्यं—यानिप्रसिद्धानि अनवद्यानि अनिन्दितानि कर्माणि, तानिसेवितव्यानि इतराणि—विपरीतानि। आचार्यकृतान्यपि नो, त्वया नोसेवितव्यानि। अस्माकं, वर्णाश्रमाचारवतां - यानि सुचरितानि शोभनचरितानि - आपस्तम्बोक्तानि त्वया, संस्कारवता - तानि उपास्यानि इतराणि, महाळयादीनि नोपास्यानीत्यर्थः इति।

ननु, "अहन्यहनि यत् श्राद्धं, श्राद्धं यच्चमृतेहनि तन्नित्यमुदितं श्राद्धं श्राद्धं यच्च महाळये" इतिवचने महाळयस्य नित्यत्व प्रतिपादनात् महाळयमनुष्ठेयमिति चेन्न। तस्य धनपुत्रादि कामाधिकारिविषयत्वेन प्रायिक नित्यत्वपरत्वात्। अन्यथा—"अमावास्या व्यतीपात मन्वादिष्वष्टकासु च। विद्वान् श्राद्धमकुर्वाणः प्रायश्चित्तीयते नरः ॥" इति शौनकेन नित्यैस्सह मन्वादि ग्रहणात्।

मन्वादिश्राद्धस्यापि कर्तव्यत्वं स्यात्। मन्वादिश्राद्धस्य "तिथ्यादिषु च यच्छ्राद्धं, मन्वादिषु युगादिषु। अलभ्येषु च योगेषु तत्काम्यं समुदाहृतं इति गालव वचनेकाम्यत्व प्रतिपादनात् अमुख्यत्वमिति चेत् ॥" सिद्धोपायनिष्ठाधिकारि विशेषे महाळयस्यापि

अनुरूयत्वं - भवतः अधिकारपूर्त्यभावेन सर्वमनुष्ठेयमिति चोद्ये कृते भवतः पारमैकांत्यपूर्त्यभावेन पूर्वोक्तरीत्या तादृशकाम्यकर्मणां अनुष्ठेयत्वप्रसंगः, तदधिकारिविशेषनियतमिति चेत् , तदत्रापि तुल्य-मिति पश्यतु भवान्—एतच्चोद्यं रहस्यसर्वस्वे विस्तरेण परिहृतं तत्र द्रष्टव्यम् । महाळयश्राद्धस्य काम्यत्वमुक्तं मार्कण्डेयेन—

"कन्यागते सवितरि दिनानि दश पञ्च च ।
पार्वणेनैव विधिना तत्र श्राद्धं विधीयते ॥

प्रतिपत् धनलाभाय द्वितीया हि प्रजाप्रदा ।
वरार्थिनां तृतीया च चतुर्थी शत्रुनाशिनी ॥

श्रियं प्राप्नोति पंचम्यां षष्ठ्यां पूज्यो भवेन्नरः ।
गाणाधिपत्यं सप्तम्यां अष्टम्यां बुद्धिमुत्तमां ॥

स्त्रियो नवम्यां प्राप्नोति दशम्यां पूर्णकामताम् ।
वेदांस्तथाप्नुयात्सर्वानेकादश्यां क्रियापरः ॥

द्वादश्यां हेमलाभं च प्राप्नोति पितृपूजनम् ।
प्रजां मेधां पशून् पुष्टिं स्वातंन्त्र्यं वृद्धिमुत्तमाम् ॥

दीर्घमायुरथैश्वर्यं कुर्वाणस्तु त्रयोदशीम् ।
अवाप्नोति न सन्देहः श्राद्धं श्राद्धपरो नरः ॥

युवानः पितरो यस्य मृताश्शस्त्रेण वै हताः ।
तेन कार्यं चतुर्दश्यां तेषामृद्धिमभीप्सता ॥

श्राद्धं कुर्वन्नमावास्यां अन्नेन पुरुषश्शुचिः ।
सर्वान् कामानवाप्नोति स्वर्गं वात्यन्तमश्नुते ॥

इति महाळयश्राद्धस्य काम्यत्वेन प्रपन्नानुष्ठेयत्वमुक्तम् ।

एकादशीश्राद्धनिषेधनिर्णयग्रन्थे पक्षमहाळयस्य काम्यत्वेन, तदपि स्मार्तविषयं तत्तत्प्रकरणेष्वेव प्रकटितम् । जाबालिः—पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा । प्राप्नोति पंचमे दत्वा सर्वान्कामांश्च पुष्कलान् ॥ पैठीनसिः - अपरपक्षस्य पंचम्यां पुत्रकामो यजेत - षष्ठ्यां पशुकामः - सप्तम्यामृद्धिकामः - अष्टम्यामन्नाद्यकामः - नवम्यां ब्रह्मवर्चसकामः दशम्यां स्वर्गकामः - एकादश्यां धनकामः - द्वादश्यां क्षेत्रकामः—त्रयोदश्यां यज्ञकामः - चतुर्दश्यां युद्धे हतानां ऋद्धिमिच्छन् - सर्वकामोऽमावास्यायां दत्वा भुक्त्वा न मैथुनं व्रजेत् । यएवं विद्वान् पितॄन्यजति-वसवो रुद्रा आदित्याश्च प्रीयन्ते - पितरो नाम वसवः रुद्राः पितामहाः - आदित्याः प्रपितामहाः— तेभ्यो दत्तमिहाक्षयं भवति - तस्मात्पिण्डपितृयज्ञं निर्वर्त्य मासिश्राद्धं कुर्यादित्यादिना काम्यत्वं प्राह । चन्द्रिकायामपि मुमुक्षूणां काम्याननुष्ठानमुक्तम् - अत्र हारीतः—

काम्यश्राद्धानि काम्यार्थी सम्यगन्नेन साधयेत् ।
शरीरारम्भहेतूनि मुमुक्षुस्तानि नाचरेत् ॥
कामप्राप्तिविहीनानि श्राद्धान्युक्तानि यानि तु ।
तानि विध्यन्तरोक्तत्वात् स्वर्गमोक्षार्थमाचरेत् ॥
यथाकथंचिन्नित्यानि कुर्यादिन्दुक्षयादिषु ।
पात्रद्रव्यादिसम्पत्सु सत्सु काम्यफलं लभेत् ॥

इत्युक्तः काम्यश्राद्धानि मुमुक्षुभिरननुष्ठेयानीति सकृन्महाळयस्य श्राद्धस्यापि काम्यत्वादननुष्ठेयत्वमुक्तम् । सच्चरित्र - परित्राणे—यद्यपि कार्ष्णाजनिना— मृताहेऽहरहर्दर्शे श्राद्धं यच्च महाळये । तन्नित्यमुदितं सद्भिः नित्यवत्तद्विधानतः । इति सकृन्महाळयस्य नित्यत्वमुक्तं तथापि "सूर्ये कन्यागते श्राद्धं यो न

कुर्यात् गृहाश्रमी । धनं पुत्राः कुतस्तस्य पितृनिश्वासपीडनात् ॥ इति गार्ग्यस्मृतिपर्यालोचनायां धनपुत्राभिषंगयुक्ताधिकारकत्वप्रतीतेः काम्यत्वं सिद्धं । नच नित्यत्ववचनविरोधः सर्वेषां प्रायेणैहिक-धनपुत्रकामत्वनियमेन तत्प्रयुक्तनित्यानुष्ठानपरत्वेन तदुपपत्तेः अहरहःश्राद्धस्य अत्यन्तश्रद्धालुविषयत्ववत् कथंचिन्नित्यत्ववचनस्य प्रायिकनित्यत्वपरत्वस्यैव वक्तुं, युक्तत्वात् । तदुक्तं स्मृतिमुक्ताफले-अहरहः, अहन्यहनि यत् श्राद्धं तदपि नित्यमित्यर्थः । अत्रपार-स्करः-अहन्यहनि यच्छ्राद्धमित्यारभ्य - अहन्यहनीत्येतत् अत्यन्तश्रद्धालु विषयं वेति - नहि मृताहश्राद्धवत् दर्शश्राद्धवच्च अकरणे चण्डाळ-त्वादिकमुक्तं - किन्तु धनं पुत्राः कुतस्तस्येति कामासिद्धिरुक्ता ।

यथोक्तं—ज्ञानिनोऽज्ञानिनो वापि मूर्खः पण्डित एव वा । मृताहं समतिक्रम्य चण्डालः कोटिजन्मसु । इति, तथा - दर्शश्राद्धमति-क्रम्य यस्तु भुङ्क्ते द्विजाधमः । चण्डाळत्वमवाप्नोति जन्मानि नव पंच सः । इति । अतः मृताहश्राद्ध नित्यश्राद्ध दर्शश्राद्ध सकृन्म-हाळयश्राद्धानां चतुर्णामविशेषेण नित्यत्वोक्तावपि वचनान्तरानुरो धेन सकृन्महाळयश्राद्धस्य नित्यश्राद्धस्य अत्यन्तश्रद्धालुविषयत्वा-श्रयणवत् - धनपुत्राभिषंगयुक्ताधिकारिकत्वाश्रयणं युक्तं, धनपुत्राभिषं-गस्य च अप्रपन्नेषु सार्वत्रिकत्वान्नित्यत्ववादः, प्रपन्नानां तु तद-भावात् न तदपेक्षं सकृन्महाळयस्य नित्यत्वमिति ।

तत्रैव स्थलान्तरे "कैंकर्यं हि नाम स्वयंप्रयोजन-भगवत्प्रीतिहेतुः - तादृशप्रीत्युद्देश्यको व्यापारः । भोगमोक्षहेत्वपूर्व-स्थानीयभगवत्प्रीतिहेतुयोगोपासनादिव्यावर्त्तनाय स्वयंप्रयोजनेति, निषिद्धव्यावर्त्तनाय प्रीतीति, प्रीतिहेतुत्वभ्रान्त्यानुष्ठितव्यापार-

व्यावर्त्तनाय, हेत्विति स्वप्रीतिहेतुव्यावर्त्तनाय भगवदिति, कारुणिकानामानृशंस्यमूलकतादृशप्रीतिहेतुनित्यकर्मव्यावर्त्तनाय उद्देश्य-केति। व्यापारः प्रवृत्तिनिवृत्त्यन्यतरात्मकः धात्वर्थः। इदं लक्षणं प्रपन्नैः क्रियमाणनित्यकर्मणि मालाकरणादिषु नित्यमुक्तैः क्रियमाणेषु चामरपतद्ग्रहादिग्रहणादिषु चानुगतम्। तदाह हारीतः-यत्र यत्र हरेः पार्श्वे पादुकां वा पतद्ग्रहं। आदाय वासस्सायुज्यं मोक्ष इत्यभिधीयते। इति। अनिष्टाकरणस्य संग्रहाय साधारणो व्यापारशब्दः। क्वचिदनुभवस्यापि संग्रहाय व्यापारशब्दः। किमपि करोतीति किंकरः - ताच्छीलकष्टप्रत्ययः - किमपीति स्वनिर्बन्धो व्यावर्त्यते स्वाम्यभिप्रेतत्वं एव निर्बन्धोऽनेन लभ्यते। किंकरस्य कर्म कैंकर्यं कर्मणिष्यप्रत्ययः, अभिप्रायविज्ञानं च नित्यमुक्तयोः, सार्वज्ञ्यात्, मुमुक्षोस्तु शास्त्रात्। तच्च शास्त्रं प्रपन्नमात्रविषयं - लक्ष्मीतन्त्र अहिर्बुध्न्यसंहिता भरद्वाजसंहितादिरूपं - तत्र च अज्ञातज्ञापनांशो मुख्यः - सहजकिंकरस्य तादृशस्वरूपज्ञानवतो रागतः स्वयमेव कैंकर्यप्रवृत्तस्याप्रवृत्तप्रवर्तनांशः तत्प्रवृत्त्युत्तम्भकः।

अयमत्र निष्कर्षः–उपासनं शक्ताधिकारकं - प्रपदनं त्वशक्ताधिकारकं प्रपदनविधौ च धर्मत्यागवचनं अशक्तिप्राप्तधर्माननुष्ठानानुवादः इति पक्षे नित्यनैमित्तिककर्मणां अप्रपन्नविषय इव प्रपन्नविषयेऽपि प्रत्यवायपरिहारकृतासाधारणचोदनयानुष्ठानमिति कैंकर्यशब्दो गौणः न ह्यसौ मोक्षोपायेष्वशक्तः इति प्रत्यवायपरिहारार्थकर्मण्यप्यशक्तः, अतः गौणत्वं दुर्वारं। प्रपत्तिः उपायान्तरस्वरूपविरोधज्ञानाधिकारा - तद्विधौ च धर्मत्यागवचनं उपायान्तरत्यागरूपांगविधिः, तत्र नित्यकर्मणामप्रपन्नविषये यादृशी उपायता प्रत्यवायपरिहारहेतुता - पुण्यलोकप्राप्तिहेतुता - ब्रह्मविद्यांगता च तस्यास्सर्वस्या अपि त्यागविधानात्

तदकरणे प्रत्यवायावकाशः, परंतु संयोगपृथक्त्वेन कर्मभेदेन वा नित्यकर्मणां कैंकर्यत्वं प्रपन्नविषयैः पराशरशाण्डिल्यसंहितालक्ष्मीतंत्रादिविशेषशास्त्रैर्बोध्यते । तत्र केचित्कैङ्कर्यविशेषाः विशिष्यैव निर्दिश्य विहिताः - संध्यादिकैंकर्यविशेषास्तु निर्देशलाघवायाप्रपन्नविषयनित्यत्वोपलक्षणेन - नित्यादिशब्देन निर्दिश्य विहिताः, निषिद्धनिवृत्तिरपि सामान्यतो विशेषतश्च बोधितत्वादावश्यकेति मुख्यः पक्षः । अत्र च प्रपन्नेन क्रियमाणानां नित्यकर्मणां कैंकर्यत्वं मुख्यं, तत्र नित्यानि संध्यादीनि - अकरणेऽनर्हत्वश्रवणात् - एवमेकादश्युपवासादीनि नित्यानि, दर्शोपरागश्राद्धान्यपि नित्यानि - अकरणे प्रत्यवायस्मरणात्-प्रेतश्राद्धस्यापि नित्यत्वं अकरणे प्रत्यवायस्मरणात् विशिष्यापि भरद्वाजेन "क्रियते चास्य पुत्राद्यै"रिति प्रपन्नेन तस्य कर्त्तव्यत्वमुक्तं, मृताहश्राद्धस्याकरणे प्रत्यवायस्मरणान्नित्यत्वं - तदपि भरद्वाजेन "गुरूणामंतिमतिथौ' इत्यादिना प्रपन्नविषये विशिष्यापि विहितं - तत्रानर्थापेक्षो भोजयेदिति भोजनमात्रस्य प्रधानत्वं - पिण्डहोमयोस्तदंगत्वं चोक्तं । तत्र नित्यश्राद्धेषु–यथाकथंचित्कुर्वाण इत्यंगेषु यथाकथंचित्करणोक्तेः पिण्डहोमयोर्न निर्बन्धः–सपिण्डीकरणादिषु तु पिण्डहोमयोर्नियमतोऽनुष्ठानं शिष्टानां दृश्यते— तदपि यथाचारमनुष्ठेयम् । अर्कद्विपर्वरात्रौ च मृताहात्पूर्ववासरे । तथा चतुर्दश्यष्टम्योः संक्रान्तौ च महोत्सवे ॥ पितरौ व्याधिना क्रान्तौ गुरूणां दुःखसंभवे । न द्विवारं समश्नीयात् विप्रो धैर्यमनुस्मरन् ॥ तस्य पापस्य शुद्ध्यर्थं सहसा निष्कृतिं चरेत् । पंचगव्येन शुद्धिः स्याद्विप्रो द्विर्वारभोजने ॥ इत्युक्तमेकवारभोजनं च प्रपन्नस्य देहोपचयासहिष्णोः अभिमतमेवेति न तत्प्रत्याख्येयं, भानुवाराष्टम्योः एकवारभोजनन्तु - भारते-"एकभुक्तं तु मतिमान्यः कुर्याद्रविवासरे । स मुक्तः सर्वपापेभ्यो गंगास्नानफलं लभेत् । इत्यादिना फलश्रवणादनावश्यकम् । उपाकर्म

च अध्ययनोत्सवादिषु पारायणादौ अतिशयहेतुत्वादधीतवेदैरपि कर्त्तव्यम्। एवं कृत्तिकादीपादिकमपि नित्यत्वादनुष्ठेयं, तत्फलं हि दिव्यदेशाभिवृद्धिः - तदीयविपन्निवृत्तिश्च परसमृद्धिप्रयोजनस्य प्रपन्नस्य नित्याभिमता। यथोक्तं - जयोत्तरसंहितायां - "कृत्तिकादीपविधिना समाराधनमुत्तमम्। स्थानस्य राजराष्ट्रस्य संपत्करमनुत्तमम्॥ विपत्प्रशमनं ब्रह्मन् प्रीणनं जातवेदसः। एवमेव विधानेन कृत्तिकोत्सवमाचरेत्॥ इति नियतेष्टफलसाधनस्य हि कर्मणो नियतानुष्ठेयत्वं सुधीविलोचने सूचितं। यथा-स्मृतिं यशो मेधा (मिच्छन्ति)[मिति] मधुमांसादिवर्जने हेतूक्तेः स्मृत्यादिरूपफलस्य सर्वेष्टत्वात् इति। अत्र मेधायाः नियतेष्टत्वात् मधुमांसनिवृत्तेर्नित्यत्वमभिप्रेतम्, एवं स्थान शब्दितदिव्यालयसमृद्धेः नित्येष्टत्वात् तदर्थः कृत्तिकादीपोऽपि नित्यः, अत एव नियतेष्टधनप्रजासाधनं सकृन्महाळयश्राद्धमपि केवलकाम्यमिति पूर्वमेवोक्तम्। शाण्डिल्यश्च, पुत्रार्थं नोद्वहेद्भार्यां कर्मपुत्रा हि योगिनः। इति पुत्रार्थं उद्वाहनिषेधेन तदर्थं सकृन्महाळयश्राद्धमपि निषेधयति। तत्रैव यज्ञानुष्ठानविषये च वक्तव्यं पूर्वमेवोक्तम्।

न च यज्ञाकर्त्तव्यत्ववचनं काम्ययज्ञानुष्ठानविषयं नित्ययज्ञानुष्ठानं त्वावश्यकं, चण्डालात्प्रतिगृह्यापि तत्कर्त्तव्यतोक्तेः इति वाच्यं - तस्य "ध्यायन् कृते यजन् यज्ञैस्त्रेताया" मिति त्रेतायुगादि विषयत्वेन सावकाशत्वात्—चत्वारः पाकयज्ञास्तु विधियज्ञसमन्विताः। सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम्॥ विधियज्ञात् जपयज्ञो विशिष्टो दशभिर्गुणैः। इति यमस्मरणेन जपयज्ञेन चारितार्थ्यावगमाच्च। तस्मात् नास्ति यज्ञसमो रिपुरिति वचनं-नित्य काम्य क्रिया साधारणम्।

भारद्वाजसंहितास्थ नित्य नैमित्तिक शब्देन, च लक्ष्मीतन्त्रोक्तं कर्माभिधीयते, तथाहि— क्रियमाणं न कस्मैचिद्यदर्थाय प्रकल्पते।

अक्रियावदनर्थाय तत्तु कर्म समाचरेत् ॥ इति, तस्यायमर्थः– यत्कर्म-क्रियमाणं सत्, कस्मैचिदर्थाय प्रत्यवायप्रतिबन्धाय वा, स्वर्गादये वा कस्मैचिदपि प्रयोजनाय - न प्रकल्पते - न समर्थं भवति - किंच अक्रियावत्, हिंसास्तेयादिरूपविपरीतक्रियया तुल्यं - अनर्थाय रूपाय न प्रकल्पते, तद्धेतुर्न भवति तदेव समाचरेदिति। अनेन प्राभाकराभिमतं नित्यं कर्मोक्तम्। तैर्हि नित्यकर्मणां प्रत्यवायपरिहारकत्वमपि नाभ्युपगतम्।

यद्वा, यत्कर्म क्रियमाणं सत् यदर्थाय न प्रकल्पते - पुत्रपश्वन्नस्वर्गात्मकभावरूपप्रयोजनहेतुर्न भवति - अक्रियावत् - अक्रियमाणं सत् - अनर्थाय च प्रत्यवायाय च कल्पते, तत्कर्म कुर्यादित्यर्थः। अनेन भाट्टाभिमतं नित्यत्वमुक्तम्, तैर्हि, नित्यकर्मणां प्रत्यवायप्रागभावपरिपालकत्वमभ्युपगतम्। तथाच प्रपन्नं प्रति नित्यतया विहितं सन्ध्याकर्मादिकं नित्यपदेन अनूद्य समाचरेत् इति, कैंकर्यात्मकसम्यक्त्वेन विशिष्टं प्रपन्नोऽनुतिष्ठेत् इति विधीयते- इदं, कैंकर्यत्वं च तत्रैव विशदीकृतं, यथा अविप्लवाय धर्माणां पालनाय कुलस्य च। संग्रहाय च लोकस्य मर्यादास्थापनाय च ॥ प्रियाय मम विष्णोश्च देवदेवस्य शार्ङ्गिणः। मनीषी वैदिकाचारं मनसापि न लंघयेत् ॥ इति। अत्र च प्रियायेति कैंकर्यत्वं उच्यते, धर्माविप्लवादिचतुष्टयं, भगवत्प्रीतौ द्वारं - यद्वा, आनुषंगिकप्रीतिहेतुरिति पक्षद्वयं-प्राचां ग्रन्थेषु स्थितम्। एतच्च कैंकर्यं, स्वरूपज्ञस्य रागतः प्राप्तमेव विशेषविधिभिः उत्तम्भ्यते - स्वरूपानवधानेन रागमांद्यादकरणे, च भगवत्प्रियत्वाभावः प्रसजति— न च ततोऽन्यदनिष्टं नाम किंचिदस्ति, तदुक्तं तत्रैव, "यथाहि वल्लभो राज्ञो नदीं राज्ञा प्रवर्तिताम्। लोकोपयोगिनीं रम्यां सर्वसस्यविवर्धिनीम्। लंघयन् शूलमारोहेदनपेक्षोऽपि

तां प्रति । एवं विलंघयन्मर्त्यो मर्यादां वेदनिर्मिताम् । प्रियोऽपि न प्रियो मे स्यात् मदाज्ञाव्यतिवर्त्तनात् ॥ इति, अत्र च वल्लभः इत्यनेन प्रपन्नस्य भगवदत्यन्ताभिमतत्वं लब्धं, लोकेत्यादिना च अप्रपन्नान्प्रत्यावश्यकत्वं लब्धं, रम्यामिति स्वरूपज्ञान् प्रति भोगरूपत्वं लब्धं, सर्वसस्येति लोकोपयोगो विवृतः - भोगविशेषा मोक्षविशेषाश्च सस्यस्थानीयाः, अनपेक्षः इत्यनेन - प्रपन्नान् प्रति प्रत्यवायपरिहारार्थतयाऽप्यनावश्यकत्वं लब्धं - प्रियोऽपि न प्रियो मे स्यादित्यनेन भगवत्प्रियत्वाभावः उक्तः। तत्र दृष्टान्तः शूलारोहणं- न तु नरकापत्तिः । न खलु भागवताः यमविषयं गच्छन्तीति श्रुतेः। अतः नित्यनैमित्तिकं प्रपन्नेन कैंकर्यतयैव कार्यम् । अयमर्थः पूर्वाचार्य-प्रबन्धेषु विशदः। कारुणिकानां आनृशंस्येन प्राप्तं नित्यकर्मादिकं कैंकर्यकोटौ निविशते - तस्य सर्वपापमध्येऽन्तर्भावान्न बन्धकत्वमित्यपि पक्षः पूर्वाचार्यग्रन्थेषु स्थितः। सोपि योजनाभेदादुपपन्नः । अकृत्य-करणन्तु भगवदनभिमतं पुरुषार्थहानिं च जनयति। अतः सर्वथा-त्याज्यम्। यथोक्तं-विभोःकालुष्यकारिणी, मनसापि नचिन्तयेत् इति, पाद्मेच- अकृत्यं वैष्णवः पापं बुध्वा सम्यक् परित्यजेत् । एकान्ती सन्त्यजेत् शास्त्रदूषणं चेतसा सदा। तथैव परमैकान्ती हेयबुध्या परित्यजेत्। इति। भरद्वाजश्च— विहिताचरणं कर्म वैराग्यं निद्यवर्जने । ज्ञानं सुदृष्टिर्भक्तिस्तु हरिचिह्नसदाश्रया॥ एवं चतुर्विधामेनां प्रीतिरूपां हरेः स्वयम्। यो वृत्तिमवमन्येत न च तस्यास्ति निष्कृतिः ॥ न देवतान्तरपरा न च कस्यापि साधनम्। परं प्रसाद एवैषा वृत्तिर्विश्वात्मनो हरेः॥ देहस्यात्यन्तिकलये मोक्षाख्ये सति सा पुनः । निश्रेयसपरं ब्रह्म निर्वाणमिति चोच्यते ॥ इति स्वयंप्रीतिरूपां वृत्तिं प्रसादः इति च आयुर्घृतमितिवत् व्यपदेशः-अन्ते च स एव उपासनविधौ धर्मः ये चान्ये

परिकीर्त्तिताः। न्यस्तात्मनस्तु तान् सर्वान्फलान्येत्र निबोधत ॥ इति, न्यस्तात्मनः प्रपन्नस्य फलानि स्वयंप्रयोजनानि। अन्यदप्युक्तदिशानुसन्धेयं इति।

न च सकृन्महाळयनिषेधकं वचनं कुत्राप्यदृष्टचरमिति वाच्यम्,

सकृन्महाळयोऽप्येवं न कर्त्तव्यो वसुन्धरे।
मदेकशरणैर्नित्यं मद्भक्तैर्मत्परायणैः॥ इति

प्रपन्नविषये तन्निषेधकवराहसंहितावचनस्य प्रसिद्धत्वात्,
अतः प्रपन्नैः सकृन्महाळयश्राद्धं नानुष्ठेयमेवेति सिद्धम्।

इति श्रीसदनुष्ठानदर्पणे - सकृन्महाळय
श्राद्धाकरणं नाम एकोनविंशं प्रतिफलनम्।

—०—०—

श्रीरस्तु

सदनुष्ठानदर्पणे विंशं प्रतिफलनम्।

(पित्रादीनां वस्वाद्यूहाभावविषयः)

प्रपन्नैः तदीयाराधनात्मकश्राद्धे - वसुरुद्रादित्येत्याद्यूहः न वक्तव्यः-वचनसद्भावात् शिष्टाचाराच्च। तथाहि—'स्वीयान्पितृ(नु)[मु]द्दिश्य विष्णोरंशात्मकान् बुधः। वैष्णवान् त्रीन् समभ्यर्च्य श्रद्धयाराधयेदिह'॥ इति। क्रियते चास्य पुत्राद्यैर्यत्किमप्यौर्ध्वदेहिकम्। तत्सर्वं प्रियभक्तस्य विष्णोः प्रीतिकरं भवेत्॥ गुरूणामन्तिमतिथौ जन्मभे श्रवणेऽपि वा। हरिमभ्यर्चयेत् भक्तया तद्भक्तांश्च विशेषतः॥ इति। सर्वयज्ञमयं विष्णु मत्वा देवं जनार्दनम्। आमन्त्र्य वैष्णवान्विप्रान् कुर्यात् श्राद्धमतन्द्रितः॥ प्रत्यब्दं पार्वणं श्राद्धं

कुर्यात् पित्रोर्मृतेऽहनि। अन्यथा वैष्णवो याति ब्रह्महत्यां न संशयः॥ इति भरद्वाजहारीतस्मृत्यादिषु प्रपन्नैः श्राद्धं स्वयंप्रयोजनत्व-बुद्ध्या तदीयाराधनत्वेन कर्त्तव्यमित्युक्तम्। देवो यदि पिता जातः शुभकर्मानुयोगतः। तस्यान्नममृतं भुत्वा देवत्वेऽप्युपगच्छति॥ देवत्वे भोग्यरूपेण पशुत्वे तु तृणं भवेत्। श्राद्धान्नं वायुरूपेण नागत्वेऽ-प्युपतिष्ठति॥ पानं भवति यक्षत्वे गृध्रत्वे च तथामिषम्। दनुजत्वे तथा मांसं प्रेतत्वे रुधिरोदकम्॥ मानुषत्वेऽन्नपानादि नाना-भोगकरं तथा। रतिशक्तिः स्त्रियं कान्तं भोज्यं भोजनशक्तिता॥ दानशक्तिः सविभवा रूपमारोग्यमेव च। श्राद्धपुष्पमिदं प्रोक्तं फल ब्रह्म समागतम्॥ इति मात्स्यपुराणादिनोक्तं, प्रमीतस्य स्वकर्मानुगुणं देव पशुनागादिभावे, श्राद्धान्नस्य अमृततृणवाय्वादिरूपत्वमधिष्ठातृ-वस्वादिप्रीणनत्वं च मुमुक्षुविषये न सम्भवति - प्रमीतस्य मुक्तत्वात्, एतत् विविच्योक्तं सन्मार्गदर्पणे सत्संप्रदायप्रतिफलननामक-तृतीयपरिच्छेदे। परमैकान्तिनः श्रीवैष्णवस्य "श्रुतिस्मृतिर्ममैवाज्ञे" त्युक्तरीत्या, भगवदाज्ञारूपश्रुतिस्मृतिचोदितस्य भगवच्छरीरभूत-नानाविधदेवताराधनरूपस्य नित्यनैमित्तिकभेदभिन्नस्य कर्मणः यस्तामुल्लंघ्य वर्त्तते। आज्ञाछेदी मम द्वेषी मद्भक्तोऽपि न मे प्रियः॥ इत्याद्युक्तरीत्या अकरणे भगवन्निग्रहात्मकनरकप्रापकत्वात्, करणे वर्णाश्रमाचारवता पुरुषेण परः पुमान्। विष्णुराराध्यते पन्थाः नान्यस्तत्तोषकारकः॥ ये यजन्ति पितॄन् देवान् ब्राह्मणान् सहुता-शनान्। सर्वभूतान्तरात्मानं विष्णुमेव यजन्ति ते॥ इत्याद्युक्तरीत्या भगवदाराधनरूपतया तन्मुखोल्लासकरूपतया निरतिशयपुरुषार्थ-साधनत्वात् स्वयंप्रयोजनबुध्यानुष्ठानेन भवितव्यं - एवं च सति—

सर्वकर्मसमाराध्यः सर्वकर्मफलप्रदः । सर्वान्तरात्मा गोविन्दः शरणागतवत्सलः ॥ भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् । अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ॥ इत्याद्युक्तरीत्या श्रियःपतिरेव भगवान् पुरुषोत्तमः तत्तद्देवतान्तरात्मतया तत्तत्कर्मसमाराध्यः सर्वभूतसुहृत्तातिरेकेण स्वाश्रितदोषानपि भोग्यतया मन्वानः तं अत्यर्थप्रीतिविषयं स्वात्मानं प्रापयति । एवं च सति - मुक्तं स्वपित्रादिमुद्दिश्य मुमुक्षुणा पुत्रेणानुष्ठेयं श्राद्धादिकर्म कुत्र पर्यवस्यतीति चेत् उच्यते - नित्यविभूतिवासिनां मुक्तानां उभे विद्वान्पुण्यपापे विधूय निरंजनः परमं साम्यमुपैति, मम साधर्म्यमागताः इत्यादि श्रुतिस्मृतिप्रक्रियया, पुण्यापुण्यलक्षणसकलकर्मविमोकपूर्वकं परमपुरुषेण परमसाम्यापन्नतयाऽवगतानां नोपजनं स्मरन्निदं शरीरमित्याद्युक्तरीत्या - निरस्तसमस्ताविद्यादिदोषगन्धतया अवस्थितानां अस्पृष्टसंसारगन्धनित्यसूरिवत् 'सोऽश्नुते सर्वान्कामान्, सह ब्रह्मणा विपश्चिता', इत्याद्युक्तपरब्रह्मगुणानुभवानन्दनिर्भरतावगमात्तदुद्देशेन बद्धमुमुक्षुपुत्रक्रियमाणं श्राद्धकर्म "प्रकृत्यन्तः कृतं कर्म तत्रैव फलदं स्मृतं" "परविद्यां विना सर्वप्राणिनः कर्मशालिनः" इत्यादिस्मृत्या लीलाविभूतौ क्रियमाणस्य कर्मणः तत्रैव फलप्रदत्वात् एवंविधमुक्ताधिकारिण्यपर्यवस्यत्, केनचित् स्वांशेन 'अर्यमादिगणस्यापि पितृलोकनिवासिनः । तत्तद्वर्णानुगुण्येन श्राद्धनिर्वाहकस्य वा' ॥ इत्यादिस्मृतिभिः पितृलोकवासितया तत्तद्वर्णश्राद्धनिर्वाहकतया चावगतेषु, अर्यमादिपितृदेवतागणेषु अन्येन स्वांशेन - अपुत्राणां कथं मुक्तिः अस्माकन्तु पितामह । इति केचित्सुराः पूर्वं पप्रच्छुः द्विजसत्तम ॥ ब्रह्मा - जीवलोके पितृश्राद्धे युष्मानभ्यर्चयेत् द्विजः । प्रथमं स्वपितॄणान्तु प्रीतिं दद्यात्तिलादिभिः ॥ विश्वेषु देवेषु अपरेणांशेन, अग्निं यदाहुतिं दद्यादादित्यमुपतिष्ठते ।

आदित्याच्चन्द्रमाप्नोति तं देवान् बोधयेत्सुरान् ॥ अत्रत्यदेवशब्दः पितृवाचकः इत्यादि स्मृत्युक्तरीत्या विश्वेषां देवानां पितृगणानां च - यथाभागं सुखप्रापकेषु अग्न्यादित्यादिषु च सुखप्रापकतया पर्यवस्यत् - स्वपित्रादिसुखप्रापकतया अवशिष्टेन भागेन, "द्विषन्तः पापकृत्यां - सुहृदः साधुकृत्याम्" इत्यादि श्रुत्युक्तरीत्या मुक्तस्य पूर्वोत्तरयोः - सुहृत् द्विषत् संक्रमणवत् - तत्सुहृत्स्वेव सुखप्रापकतया पर्यवस्यति। पुत्रस्य अमुमुक्षुत्वे तु 'मनुः पुत्रेभ्यो दायं व्यभजत्' इत्याद्युक्तरीत्या पितृसंपादितधनसंचयस्य पुत्रगामित्ववत् - तस्यैव-पितृस्नेहवतः सुखप्रदं भवति। पित्रादीनाममुक्तत्वपक्षे तु स्वर्गनरक-भूलोकादिष्वन्यतमवर्त्तित्वात् तच्छ्राद्धदाने, 'प्रारब्धकर्मप्राबल्यात् सुरादिषु चतुर्ष्वपि। जातानां पितृमुख्यानां तृप्त्यै दद्यात्तिलोदकम् ॥' इत्याद्युक्तरीत्या चतुर्विधदेहान्यतमभूतपित्रादिचेतनानामेव सुखप्रापकं भवति। सुखदुःखोभयविहीनशिलादिरूपत्वपक्षेऽपि कालान्तरे तस्यैव सुखप्रापकं भवति। अयमर्थः आथर्वणवेदगतकाण्वशाखासिद्धः इति चिरकालवृद्धोपसेवासमाकलितसकलश्रुतिसारार्थेन वैदिकसार्वभौमेन स्मृतिसंग्रहकारेणापि स्वप्रणीत आचारकाण्डे अपुत्रखण्डे सप्रमाणं प्रपंचितः इति अतः प्रपन्नक्रियमाणतदीयाराधनात्मकश्राद्धे वसुरुद्रादि-त्याद्यूहः न वक्तव्यः तदुद्दिष्टस्य परमपदवासित्वात् - तदूहः पितृलोकादिवासिविषय एव वक्तव्यः।

नात्र वचनाभावः शंकनीयः, 'संसारिणां बुभुक्षूणां मृतानां पापकर्म-णाम्। तथैव पुण्यशीलानां पितृलोकनिवासिनाम् ॥ कर्मशेषोपपन्नानां पुनर्जन्मवतां नृणाम्। वसुरुद्रादित्यरूपा उक्तिः श्राद्धेऽस्ति नारद। मुमुक्षूणां मृतानान्तु विष्णुलोकनिवासिनाम्। वसुरुद्रादित्यसंज्ञेत्युक्तिः श्राद्धे न विद्यते ॥ इति आनन्दसंहितादिप्रमाणानां जागरूकत्वात्।

वस्वादींश्च पितॄन् ध्यात्वेति – वसुभ्यो रुद्रेभ्यः आदित्येभ्यः इति कथमुपपद्यते इति चेत् न। तद्विधिविच्य तन्निषेधकवचनाभावात् तथा शिष्टाचाराच्च। अतः प्रपन्नैः तदीयाराधनात्मकश्राद्धेवसुरुद्रादित्येत्याद्यूहो न कर्त्तव्य एवेति सिद्धम्।

इति श्रीसदनुष्ठानदर्पणे पित्रादीनां
वस्वाद्यूहाभावविषयो नाम विंशं प्रतिफलनम्।
श्रीरस्तु

श्रीः

एकविंशं प्रतिफलनम्।

एकादश्यां श्राद्धाकर्त्तव्यत्वविषये प्रमाणं–प्रपन्नैः एकादशीव्रतदिनप्राप्तं श्राद्धात्मकतदीयाराधनं, तदितरदिन एव कार्यं तथा वचनसद्भावात् शिष्टाचाराच्च। तथाहि, श्रुतौ शतपथब्राह्मणे शुक्लयजुषि-अथ याज्ञवल्क्यः पक्षे पक्षे - एकादश्यां न याजयेत् - न तर्पयेत् न श्राद्धकर्म कुर्वीत यदि मोहेन कुर्यात् सोऽग्निहा स पितृहा स मातृहा च इति। हारीतस्मृतौ वृत्त्यधिकारनामके - अष्टमाध्याये-पित्रोःश्राद्धं प्रकुर्वीत नैकादश्यां द्विजोत्तमः। द्वादश्यान्तत्प्रकुर्वीत नोपवासदिने क्वचित्॥ इति पराशरस्मृतौ - यथाऽऽशौचाब्दिकं श्राद्धं आशौचान्ते विधीयते। तथैवैकादशीश्राद्धं तत्कुर्यात्तदनन्तरम्॥ इति, इतिहासोत्तमे, चतुर्विंशेऽध्याये शौनकं प्रति भृगुः—"भुंजन् श्वमांसमश्नीति श्रुतिरेषा सनातनी। एकादश्यां निराहारः पक्षयोरुभयोरपि॥" इति - परमवैदिकसिद्धान्ततत्त्वरत्नाकरे-श्रीभारते—ये कुर्वन्ति महीपाल श्राद्धमेकादशीदिने। त्रयस्ते नरकं यान्ति दाता भोक्ता विधायकः॥ इति, ब्रह्मकैवर्त्ते— एकादश्यान्तु यः कुर्यात् यदि श्राद्धं विमोहतः। अनर्हान्नप्रदाता स पितॄणां नरकावहः॥ इति, पाञ्चरात्रे

विहगेन्द्रसंहितायां परिशिष्टे षड्त्रिंशेऽध्याये-एकादशीं परित्यज्य द्वादश्यां विहितं प्रभोः। नारायणस्य प्रीत्यर्थंस्यात् श्राद्धं तद्धि वैष्णवम् ॥ इति। श्रीवैखानससंग्रहे भविष्यत्पुराणे, भुंक्ष्व भुंक्ष्वेति यो ब्रूयात् यो भुंक्ते हरिवासरे। तावुभौ पतितौ स्यातां तस्मात् श्राद्धं परेऽहनि ॥ इति। इत्थं उक्तं चेत् उच्यते—आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः। वैष्णवो नः कुले जातः स नस्सन्तारयिष्यति ॥ अभयं सर्वभूतेभ्यो ददामि, विनतविविधभूतव्रातरक्षैकदीक्षे – கேசவன் தமர் கீழ்மேல் எமரேழெழு பிறப்பும். इत्यादि प्रमाणानुसारेण परमैकान्तिनां पितृपितामहादीनां मुक्ततया पितृत्वावस्थाभावात् देवर्षिभूतात्मनृणां पितृणां इति परमैकान्तिनां पितृकिंकरत्वाभावात् च तेषां श्राद्धाद्यनुष्ठानस्य - अनपेक्षोऽपि तान् प्रति, सक्ताः कर्मण्यविद्वांसः चिकीर्षुर्लोकसंग्रहम्। लोकोपयोगिनीं रम्यामित्यादिरीत्या - केवल लोकसंग्रहार्थत्वेन आनृशंस्यप्राप्तत्वाच्च पितृक्रियासु नैर्भर्याभावात्– पितृक्रियालोपे प्रत्यवायासंभवात् वैष्णवानां - हारीतस्मृतौ विशिष्ट-परमधर्मशास्त्रे - अंबरीषमहाराज - हारीतमहर्षिसंवादे - पंचमेऽध्याये अंबरीषमहाराजं प्रति हारीतः - शंखचक्रोर्ध्वपुण्ड्रादिधारणं स्मरणं हरेः। तन्नामकीर्त्तनं चैव तत्पादाम्बुनिषेवणम् ॥ तत्पादवन्दनं चैव तन्निवेदितभोजनम्। एकादश्युपवासश्च तुलस्यैवार्चनं हरेः ॥ तदीयाराधनं चैव भक्तिर्नवविधा स्मृता। एतैर्नवविधैर्युक्तो वैष्णवः प्रोच्यते बुधैः ॥ गुणैरेतैर्विहीनस्तु न विप्रो न च वैष्णवः। इत्याद्युक्तरीत्या एकादश्युपवासलक्षणवैष्णवधर्मस्यैव प्राबल्यात्, गर्हितान्नं न चाश्नन्ति पितरश्च दिवौकसः। त्याज्यं हरिदिने श्राद्धं द्वादश्यामेव कारयेत् ॥ इति - एकादश्यां पितृदेवतानामप्युपवासस्मरणात्, नारदीये - यानि कानि च पापानि ब्रह्महत्यासमानि च। अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे ॥ इति एकादश्यामन्नस्य दुष्टत्वकथनात्। नारदः-सूतके च

नरः स्नात्वा प्रणम्य मनसा हरिम् ॥ एकादश्यां न भुंजीत नारी दृष्टरजस्यपि ॥ श्रीविष्णुरहस्ये - असामर्थ्यात् शरीरस्य व्रते च समुपस्थिते । कारयेद्धर्मपत्नीं वा पुत्रं वा विनयान्वितम् ॥ तत्र श्राद्धं न कर्त्तव्यं अन्नाद्यस्य विगर्हणात् । दातुः प्रतिग्रहीतुश्च नित्यत्वात् त्याज्यमुच्यते ॥ इति ब्राह्मणानां सर्वेषां उपवासशास्त्रवश्यतया तत्र भोजयितव्यपात्रालाभात् । अष्टौ तान्यव्रतघ्नानि आपो मूलं घृतं पयः । हविर्ब्राह्मणकामाय गुरोर्वचनमौषधम् ॥ इति भारतवचने हविर्ब्राह्मणकामायेत्यत्र ब्राह्मणकामायेत्यस्यापि एकादशीव्यतिरिक्तविषयत्वेन रुक्मांगदचरितादिषु व्याख्यातत्वात्, गुडोदकैः इक्षुरसैः सुपक्वैः कदलीफलैः । पिष्टादिशुद्धभक्ष्यैश्च आपोमूलघृतादिभिः ॥ अष्टाव्रत्नकारीणि ये निघ्नन्ति हरेर्दिनम् । तानहं दण्डयिष्यामि समानयत किंकराः ॥ इत्यापस्तम्बस्मृतिस्थयमवचनादिभिः तदर्थस्य विवृतत्वात् । 'सूतकादौ यथा श्राद्धं सूतकान्ते विधीयते । तथैवैकादशीश्राद्धं द्वादश्यामेव कारयेत्' ॥ इत्यादिविशेषवचनबलात् । कालप्रकाशिकायां— एकादश्यां तु यः कुर्यात् श्राद्धं मोहेन पद्मज । रेतोमूत्रपुरीषादि स पितृभ्यः प्रयच्छति ॥ इति - विशिष्य निमन्त्रणनिषेधाच्च । एकादश्यादिषु श्राद्धे प्राप्ते भारद्वाजः - सर्वेष्वपि च धर्मेषु प्रधानं वैष्णवं स्मृतम् । तत्रापि प्रीणनं विष्णोः एकादश्यामुपोषणम् ॥ इति । सर्वेषामेव धर्माणां वैष्णवः परमो मतः । यस्तु विष्णुपरो धर्मः यो वा नारायणेरितः ॥ येन विष्णुरमेयात्मा प्रसादमधिगच्छति । स एव परमो धर्मः सर्वलोकपरायणः ॥ इति । वासिष्ठसंहितायां-एकादश्युपवासश्च शंखचक्रादिधारणम् । तुलस्यारोपणं विष्णोः त्रयं वैष्णवलक्षणम् ॥ इत्याद्युक्तरीत्या शुद्धोपवासात्मक वैष्णवधर्मप्राबल्याश्रयणेन तद्विरुद्धां वसुरुद्रादित्यस्वरूपराजसतामसदेवतान्तरात्मकपितृक्रियालक्षणां श्राद्धचर्यामेव लुम्पन्ति न तु स्मार्तादिवत् वैष्णवधर्मचर्याम्, वस्तुतस्तु श्राद्धचर्यां न लुम्पन्ति-अनन्तकाल कृतस्य

श्राद्धस्य लोपासंभवात्। न चैवं - पित्रोर्मृततिथिं ज्ञात्वा यो न कुर्वीत पैतृकम्। पापमक्षयमाप्नोति पितृहा चोपजायते ॥ इति, मृतदिनमतिक्रम्य चण्डालः कोटिजन्मसु। इति प्रत्यवायप्रसंगः। तथा सति-सूतकादावपि श्राद्धानुष्ठानप्रसंगात्, तत्र कर्त्तुः अशुचित्वान्न दोषः इति चेत् शान्तं पापं, सूतकाद्यशुचेः प्रत्यवायनिवारकत्वं ब्रूषे, भगवदाराधनलक्षणोपवासात्मकपरमधर्मस्य प्रत्यवायापादकत्वं मनुषे - वृहद्धारीतः - सूतकादौ यथा श्राद्धं सूतकान्ते विधीयते। तद्वदेकादशीश्राद्धं द्वादश्यामेव कारयेत् ॥ भविष्यत्पुराणे - भुंक्ष्व भुंक्ष्वेति यो ब्रूयात् यो भुंक्ते हरिवासरे। तावुभौ पतितौ स्यातां तस्मात् श्राद्धं परेऽहनि ॥ इत्यादि-वचनजातं चात्र जागर्ति। अंगिराः - एकादशाहो यदि शुक्रवारो रोहिण्यथाप्यच्युतवासरश्च। प्रेताय दद्यादथ पिण्डमेकं श्राद्धं तु कुर्यादपरेद्युरेव ॥ गोभिलः - देवे प्रत्याब्दिके श्राद्धे त्वन्तरा मृतसूतके। आशौचानन्तरं कार्यं तद्वदेकादशीदिने ॥ स्मृत्यन्तरे - यदाहिताग्निर्विप्रःस्यात् नाग्नौ होमं समाचरेत्। विष्णोर्दिने मुनिश्रेष्ठ यदि तत्प्रीतिमिच्छति ॥ नैवन्तु कर्मलोपःस्यात् विधिरेषः सनातनः॥ शातातपः—एकादशी तु संप्राप्ता मातापित्रोर्मृतेऽहनि। द्वादश्यां तत्प्रदातव्यं नोपवासदिने क्वचित् ॥ भविष्योत्तरे—एकादश्यां हूयमाने आत्मनो नरकावहम्। द्वादश्यां हूयमाने तु तदानन्त्याय कल्पते ॥ औपासनं ब्रह्मयज्ञं तस्मात् श्राद्धं परेऽहनि। स्कान्दे - न होतव्यं न होतव्यं एकादश्यां कदाचन। जुहुयाद्यदि मूढात्मा रौरवं नरकं व्रजेत् ॥ एकादश्यान्तु मूढात्मा जुहुयाद्यदि भूसुरः। निष्फलस्स भवेत् होमः स्वयं च नरकं व्रजेत ॥ वाराहे पार्वतीरुद्रसंवादे - एकादश्यां जयन्त्यां वा दशाहोऽपि प्रवर्त्तते। यदि चेत्पुरतः पूर्वयामे कुर्यान्नगात्मजे ॥ तत्र द्वितीययामे तु कर्त्तव्यं षोडशक्रमम् ॥ एकादशाहे वपनं व्रतोत्सर्जनमादिकम्। एकादश्यां च यच्चान्नं यच्चान्नं राहुदर्शने॥ सूतके मृतके चान्नं

स्याज्यं हरिदिनोत्सुकैः ॥ तद्वासरातिक्रमणे केचिद्दोषं वदन्तु वा। अन्नाश्रिताहन्निर्दग्धा जन्महेतुव्रतोत्सवाः ॥ भुंजन्तः स्वामिकार्याणि मज्जन्ति नरके शिवे ॥ स्कन्दपुराणे–एकादश्यां न तत्कुर्यात् कुर्यात्तद्-द्वादशीदिने। एकादश्यन्नकामश्च दाता भोक्ता च षण्मुख ॥ आत्मानं पितृभिस्सार्धं पातयेन्नरके सदा ॥ इति। पुराणान्तरे—

औपासनं नित्यकर्म यदि कुर्यात् हरेर्दिने।
यदि तेन हुतं चाग्नौ विफलं वदति श्रुतिः ॥
नाग्निहोत्रं न च श्राद्धं न चौपासनमेव च।
एकादश्यां तु कर्त्तव्य द्वादश्यामेव कारयेत् ॥

इति। श्रीपांचरात्रे शेषसंहितायां

एकादश्यां न भुञ्जीत भक्ष्यादींश्च न भक्षयेत्।
फलमूलजलेक्ष्वादि वर्जयेत्सर्वदाऽब्जज ! ॥
मृतेऽहनि यथा संध्या यथा विष्ण्वादिपूजनम्।
तद्वदेकादशीश्राद्धं तत्कुर्यात्तदनन्तरम् ॥

कपिलसंहितायां—

एकादश्यां प्रयत्नेन पैतृकं नैव कारयेत्।
गर्हितान्नेन पितरस्तृप्तिं नायान्ति केवलम् ॥

दत्तात्रेयसंहितायां—

देवानां च पितृणां च ऋषीणां च विशेषतः।
अन्नं न दद्यात्कृच्छ्रेण भगवन्तं हरिं विना ॥

खगेश्वरसंहितायां—

ये प्रयच्छन्ति मोहेन श्राद्धमेकादशीदिने।
नष्टात्मानस्तु ते मूढाः पतन्ति नरके ध्रुवम् ॥

वैखानससंग्रहे—एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेत्। श्राद्धं कुर्याद्विमोहेन सद्यः कर्ता विनश्यति॥ इति। धर्मसेतुनिबन्धनग्रन्थे-एकादश्यां यदा भूप मृताहःस्यात्कदाचन। तद्दिनन्तु परित्यज्य द्वादश्यामेव कारयेत्॥ इत्यादिवचनानि यथाचारं वैष्णवपराणीति। श्रीवैष्णवसमयाचारनिष्कर्षेऽपि - एकादशीश्राद्धकरणेनापि अवैष्णवत्वं सिद्धमित्यवादि - इत्यादि प्रमाणमत्रानुसन्धेयम्। न च कतिपय-वचनान्येव अवैष्णवविषयत्वं बोधयन्ति - न सर्ववचनानीति वाच्यम्, निषेधत्वावच्छिन्नवचनानि स्थालीपुलाकन्यायेन अवैष्णवविषयत्वमेव एकादशीश्राद्धवचनानां बोधयन्ति - तन्न्यायश्च पूर्वतन्त्रे - सप्तमाध्याये चतुर्थपादे "यथा स्थालीपुलाकेनेति" सूत्रेण पाकाधिकरण-कस्थालीगतानां पुलाकद्रव्याणां मध्ये एकस्य पुलाकद्रव्यस्य विक्लप्तिरूपं पाकं दृष्ट्वा - सर्वेषां पुलाकद्रव्याणां स्थालीगतानां पाक-परिज्ञानवत् - एकस्यां विकृतौ दर्शपूर्णमासतः धर्मातिदेशसूचकं 'प्रयाजे प्रयाजे कृष्णलं जुहोति' इति लिंगं दृष्ट्वा - तत्सजातीयानां सर्वासां विकृतीनां विकृतित्वसाजात्यात् अतिदेशः इति स्वीकृतः तद्वत् अत्रापि एकादशीश्राद्धनिषेधत्वसाजात्यात् निषेधवचनानां वैष्णव-विषयत्वं स्पष्टमेव। अपि च एकादशीश्राद्धनिषेधवचनानां बहुत्वात् तान्येव ग्राह्याणि, तदुक्तं जैमिनिना पूर्वतन्त्रे - विप्रतिषिद्ध-धर्माणां समवाये भूयसां स्यात् स्वधर्मत्वं इत्यधिकरणे - तत्र हि कस्मिंश्चित् काम्येष्टिविशेषेषु ऐन्द्राग्नमेकादशकपालं प्राजापत्यं दधि, मधु, घृत, माषः इति पंचानां हविषां आद्ययोः ऐन्द्राग्न—सान्नाय्ययोः विकारत्वेन - अमावास्याविध्यन्तप्राप्तौ - उपांशुयाज-विकाराणां मधूदकघृतानां भूयस्तया - तदनुग्रहाय पौर्णमासविध्यन्त इति निरणायि। उत्तरतन्त्रेऽपि - अन्तर उपपत्तेः इत्यधिकरणे-य एषो-ऽक्षिणि पुरुषो दृश्यत इति एकं जीवलिंगं बाधित्वा एष आत्मेति होवाच

एतदमृतं - एतदभयं एतद् ब्रह्मेति अनेकब्रह्मलिंगयुक्तत्वात् - अक्षिपुरुषः परमात्मेति राद्धान्तितं श्रीभाष्ये। पठन्ति वृद्धाः–धर्मद्वयविरोधे तु निश्चित्य गुरुलाघवम्। यतो भूयस्ततो विद्वान् धर्मनिर्णयमाचरेत्॥ इति। श्राद्धविघ्ने समुत्पन्ने न विज्ञाते मृतेऽहनि। एकादश्यां तु कर्तव्यं दर्शे वाथ विचक्षणः। इत्यविज्ञाते मृताहे-सामान्यतः एकादश्यां तत्कर्त्तव्यत्वोक्तिस्तु विद्धैकादशीपरैव। पित्रोः श्राद्धं न कुर्वीतेत्यारभ्य "नोपवासदिने क्वचित्" इति हारीतादिवचनैः व्रतैकादश्यां तस्य निषिद्धत्वात् - निषेधाश्च बलीयांसः इति "न लुमतांगस्येत्यादिसूत्रेषु महाभाष्ये उक्तत्वात्। सामान्यस्य विशेष उपसंहारः पूर्वतंत्रे षष्ठान्त्याधिकरणे - "छागो वा मंत्रवर्णात्" इति सूत्रेण अग्नीषोमीयं पशुमालभेतेति श्रुतिघटकपशुशब्दस्य - चतुष्पादः पशवः इति श्रुत्या सामान्यतः चतुष्पात्त्वावच्छेदे यागीयत्वे प्राप्ते - अग्नये "छागस्य वपाया मेदसः" इति याज्यापुरोनुवाक्यामंत्रगतलिंगात् विशेषेण पशुशब्दः छागपरः इति निर्णीतः। केचित् - उपवासो यदा नित्यःश्राद्धं नैमित्तिकं भवेत्। उपवासं तदा कुर्यादाघ्राय पितृसेवितम्॥इत्यत्र अनित्य इति पदच्छेदसम्भवात् अनित्योपवासविषये श्राद्धकरणपूर्वकाघ्राणं न नित्योपवासविषयं इति आहुः - तन्न - "एकादशी सदोपोष्या पक्षयोः शुक्लकृष्णयोः" इत्यनेन व्रतान्यन्यानि सुश्रोणि काम्यान्याहुर्मनीषिणः। एकादशीव्रतं पुण्यं संध्योपासनवत्स्मृतम्। इति मार्कण्डेयपुराणगतशिववचनेन तस्य नित्यत्वावगतेः। एकादशीश्राद्धं श्रीवैष्णवैर्न कर्त्तव्यं इत्युक्तं वेदान्ताचार्यैः हरिदिनतिलके। किं च निगमान्तगुरुप्रणीतहरिदिनतिलकग्रन्थे आतिष्ठेताभियुक्तेति श्लोकस्य प्राचीनपाठतद्व्याख्यानपङ्क्तिः इत्थं दरीदृश्यते - आतिष्ठेताभियुक्तः स्मृतिषु विधिबलात् श्राद्धमन्यैर्निषिद्धं प्राक्सामान्यापवादात् ऋतुगतिनियतिः सन्ततिस्थापनार्था। एकैकात्यन्तवृत्त्या त्विह तु नृषु चतुर्भुक्तिवर्जं त्रिहोक्तं श्रेयस्सिध्यै स्वतः

श्रीहरिदिनतिलके वेङ्कटेशेन कृतम् ॥ आतिष्ठेनेति- अभियुक्तानां अभि-निवेशवतां अर्थात् श्राद्धे इति लभ्यते, श्राद्धेऽभिनिविष्टानां कात्याय-नादीनां स्मृतिषु विधिबलात् विधानसामर्थ्यात् श्राद्धमातिष्ठेत अनुतिष्ठेत्, प्राक्सामान्यापवादात् प्राचीनस्य सामान्यस्य कात्यायन-वचनादेः सात्त्विकवृद्धहारीतस्मृति, गारुडपुराण, पाद्मोत्तरादिषु वैष्णवान् प्रति विशिष्यापवादात्, अन्यैः श्राद्धं निषिद्धं - अन्यै-रित्युक्त्या इदं परमतमिति न भ्रमितव्यं। "आद्यायां उत्तरत्र व्रतविधि-रुभयोः स्यात् व्यवस्थाऽथ षट्सु प्राच्यां द्वन्द्वे सतुर्ये परमतनियतिः स्यात्त्रिकेऽत्यत्रिके प्राक्" इति विद्धैकादशीष्वपि उपवासं विहाय, 'कति-चन कृतिनः सर्वथोज्झन्ति विद्धां' इत्युक्तौ विद्धापरित्यागस्यैव स्वाभिम-तत्वदर्शनात् - अत एव श्रीरामानुजसिद्धान्तसारसंग्रहे श्रीरंगरामानुज-स्वामिभिः श्राद्धे अभिनिवेशवद्भिः कैश्चिन्महर्षिभिः एकादश्यां श्राद्धं विहितं उपवासेऽभिनिवेशवद्भिर्महर्षिभिः तत्प्रतिषेध उक्तः, वैष्णवानां एकादश्यां प्राप्तं श्राद्धं द्वादश्यामेवानुष्ठेयं इति स्थितमिति निषेधपक्ष-सिद्धान्तीकरणं संगच्छते। यदि विधिपक्ष एव आचार्यैरभिप्रायिष्यत तदा आतिष्ठताभियुक्तः स्मृतिषु विधिबलात् श्राद्धमाद्याय शेषमिति निर-देक्ष्यत। धर्मद्वयविरोधे तु निश्चित्य गुरुलाघवम्। यतो भूयस्ततो विद्वान् धर्मनिर्णयमाचरेत् ॥ सर्वेषामेव धर्माणां वैष्णवः परमो विधिः। यस्तु विष्णुपरो धर्मो यो वा नारायणेरितः। येन विष्णुर्मेयात्मा प्रसादमधिग-च्छति। स एव परमो धर्मः सर्वलोकपरायणः॥ वासिष्ठं चैव हारीतं व्यासं पाराशरं तथा। भारद्वाजं काश्यपीयं स्मृतिषट्कम् तु सात्त्विकम्। मानवं याज्ञवल्क्यं च आत्रेयं दाक्षमेव च। कात्यायनं वैष्णवं च राजसा-स्स्वर्गदायिनः॥ सात्त्विकानेव गृह्णीयात्सात्त्विको नैव राजसान्। इति व्यवस्थावचनैरपि - वैष्णवानां निषेधपक्ष एव ग्राह्यः इति सिद्धं भवति। ऋतुगतिनियतिः सन्ततिस्थापनार्थेति। अत्र दृष्टान्तदार्ष्टान्तिक-

भावोऽभिप्रेतः - यथा – स्त्रीणान्तु प्रेक्षणात्संगात्ताभिस्संकथनादपि । निष्पन्दते ब्रह्मचर्यं न दारेष्वृतुसंगमात् ॥ इति कात्यायनवचनं सन्ततिकामविषयं स्त्रीगमनमुपक्रम्य उपवासश्राद्धदिनयोः वृद्धहारीत-स्मृतौ तन्निषेधो निष्कामविषयः, तथा प्रकृतेऽपि विधिनिषेधयोः व्यवस्थानुसन्धातव्येति । अथ चतुर्भुक्तिवर्जनं नित्यव्रतांगमपीति चन्द्रिकाकारादयः काम्यव्रतांगमेवेति कालादर्शकारादयः । अत्र चन्द्रिकाकारमतमेव युक्तं, अभितश्चोपवासस्स्यान्न कुर्यान्निशि भोजनमिति शौनकवचनेन फलश्रवणाभावात् । नारदीये - प्रातर्हरिदिनं लोकास्तिष्ठध्वं चैव भोजनाः । अक्षारलवणास्सर्वे हविष्यान्त-निवेशनाः ॥ इति दर्शनाच्च । यत्तु उपवासफलप्रेप्सुः जह्यात् भुक्ति-चतुष्टयं - इत्यत्र फलग्रहणात् - नित्येषु फलाभावात् - काम्यव्रतांगमेव तदिति, नित्येष्वपि उपात्तदुरितक्षयस्य फलस्य सद्भावात् - उक्तं हि सर्वशक्त्यधिकरणे वार्त्तिककारैः - तत्वमुक्ताकलापे - मन्दस्यापि प्रवृत्तिः किमपि फलमनुद्दिश्य कस्यापि न स्यात् - नित्येऽनर्थोपरोधप्रभृति फलमतः काम्यतैवेति चेन्न । नित्येऽनर्थोपरोधः इत्यत्र सर्वार्थसिद्धौ पापेभ्यो रक्षन्तामिति प्राप्तदुरितक्षयसंग्रहः, अतः कर्त्रभीष्टफलव-त्त्वादित्यर्थः, काम्यतेति - नित्यनैमित्तिकयोरिति शेषः । सफलत्वा-विशेषेऽपि-नित्ये तावत्फलविशेषापेक्षया विभाग[।भिप्राय]माह-नित्ये स्पष्ट इति अनर्थपरिहारः सर्वेषां सर्वाभीष्टत्वात् - तदर्थे कर्मण्यकरणे अनर्हतया नित्यत्वेन विभागः इत्यनुगृहीतं - अतः दर्भहीना तु या संध्या सा संध्या निष्फला भवेत् । इत्यादिकमिव इदमपि नित्यव्रतांगं भवत्येव । तदिदमभिसन्धाय द्विर्बद्धं सुबद्धमिति न्यायेन पुनरनुगृह्णाति- आद्यन्ता-द्द्विरात्र्योः इति (द्वि अ)[ह्य]हनि इत्यर्थः, चकारेण रात्रौ चेति विवक्षितं, एवमाद्यन्तयोः अह्नोः सायं प्रातश्च मध्यमे । उपवासफलं प्रेप्सुः जह्यात् भुक्तिचतुष्टयम् ॥ इत्यादिकमिहाभिप्रेतं-यथोक्तमित्यनेन पूर्वोक्त-

नियमवैशिष्ट्यं विवक्षितं - वेङ्कटेशेनेति स्वनामनिर्देशः अन्यकर्तृक-भ्रमनिरासार्थः, एतेन श्लोकरूपस्य हरिदिनतिलकस्य वेदान्तदेशिक-कृतत्वे प्रमाणाभावः इति केषांचिदुक्तिः अश्रद्धेयेति सिद्धं, अतिप्राचीनैः श्रीमन्नारायणस्वामिभिः एकादशीश्राद्धनिर्णये - उक्तं हरिदिनतिलके वेदान्ताचार्यैरित्यारभ्य प्रोक्ता नाड्यश्चतस्रस्त्वरुण-समुदये - इत्यस्य श्लोकस्य - पौराणिकथा तु रुक्मांगदचरितेति श्लोकस्य च साकल्येन श्लोकरूपस्यैव तत्कृतत्वसिद्धेः प्रसिद्धेश्चेति । अन्यथा एतच्छ्लोकतदर्थवर्णने श्रीवैष्णववर्यदेशिककृते श्लोके, सामान्याप-वादन्यायप्रदर्शनस्यासांगत्यापत्तेः, पूर्वोक्तश्रुत्यादिविरोधाच्च । एकादशी श्राद्धनिषेधस्य श्रीपांचरात्रनिष्ठश्रीवैष्णवविषयत्वं निर्णीतम् । वैद्यनाथीय-स्मृतिमुक्ताफलेऽपि श्राद्धकाण्डे कात्यायनोऽपि - उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत् । उपवासन्तदा कुर्यादाघ्राय पितृसे-वितम् इति, यत्तु पुराणवचनं—ये कुर्वन्ति महीदेवाः श्राद्धमेकादशीदिने । त्रयस्ते नरकं यान्ति दाता भोक्ता पिता तथा ॥ यथाऽऽशौचगतं श्राद्धमाशौचान्ते विधीयते । तथैवैकादशीं मुक्त्वा द्वादश्यामेव कारयेत् ॥ इति - तत्तांत्रिकविषयं अन्यथा कात्यायनादिस्मृति-विरोधप्रसंगात् इति । अत्र तांत्रिकशब्दः श्रीपांचरात्रनिष्ठश्रीवैष्णवपरः । निर्णयसिंधौ उदयवेधस्तु परिशेषात् स्मार्त्तगोचरः, तथाह माधवः-अरुणोदयवेधोऽत्र वेधस्सूर्योदये तथा । उक्तौ द्वौ दशमीवेधौ वैष्णव-स्मार्त्तयोः क्रमात् ॥ माधवीये स्कान्दे च - परमापदमापन्नो हर्षे वा समुपस्थितः । नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी ॥ विष्णवर्पिताखिलाचारः स हि वैष्णव उच्यते । अन्येषां अतिप्रसक्त्या व्यभिचारात् - वैष्णवदीक्षावत्त्वमेव वैष्णवत्वं, यद्यपि पित्रादेः आगमदीक्षायां तन्मात्रस्य वैष्णवत्वं न तत्पुत्रादेरपि तथापि स्वपारम्पर्यप्रसिद्धमेव वैष्णवत्वमित्युक्तत्वात् । भविष्यत्पुराणे—वैखान-

साद्यागमोक्तदीक्षां प्राप्ता हि वैष्णवाः । नैकादशीं यजेयुस्ते महापत्तौ भयेऽपि च ॥ एकादश्यां न भुंजीयान्न दद्यादन्नकांक्षितः ॥ इत्युक्तत्वात् । रामानुजार्यदिव्यचरिता तथैवायां-वैद्यनाथदीक्षितेन तत्रैव एतत्पूर्वत्र प्रह्लादसहितायां ' तुलसीकाष्ठमिश्रा तु यावत्प्रज्वलिता चितिः । दह्यन्ते तस्य पापानि कल्पकोटिकृतान्यपि ॥" इति तंत्रप्रोक्तत्वात् एतत्तांत्रिकविषयं-न तु वैदिकविषय, न दद्यात्तृणपं विप्र तुलसीकाष्ठवह्निना । यदि दद्याद्विमोहेन स विष्णोर्दाहको भवेत् ॥ इति विष्णुधर्मोत्तरे निषिद्धत्वात् इति । तथैव, वैद्यनाथदीक्षितेन - तत्रैव द्वितीयपरिच्छेदे - आह्निककाण्डे-यत्तु पुराणवचनं "अर्पणेन महाविष्णोर्वैश्वदेवं करोति यः । प्राणाग्निहवनं चैव तेन लोका जितास्त्रयः ॥" इति । तत्तान्त्रिकविषयं, अत एव महाभारते-पाञ्चरात्रविदो मुख्यास्तस्य गेहे महात्मनः।=प्रापणं भगवद्भुक्तं भुंजते चास्य भोजनम् । प्राणाग्निहोत्रं यच्चान्यत् सर्वं कुर्वन्ति तेन तु ॥ इत्यनेन वाक्येन व्याख्यातत्वात् - आगमप्रामाण्य श्रीपांचरात्ररक्षादौ तंत्रसिद्धपञ्चसंस्कारदीक्षितस्य श्रीवैष्णवत्वप्रतिपादनाच्च । श्रुतौ - वाजसनेयके शतपथब्राह्मणे - अशीतितमेऽध्याये— अयं पवते तमेवत्स्यन्ति - संवत्सराय दीक्षन्तेन गृहपतिः प्रथमो दीक्षते अयं वै लोको गृहपतिः । तस्मिन्वै लोके इदमिदं सर्वं प्रतिष्ठितम् - प्रियमेव तत्प्रतिष्ठा दीक्षन्ते । तं पौर्णमास्यामन्वारभन्ते । तस्मात् अमावास्यायामेवाग्नीनादधीत। यो वैशाखामावास्यायां दीक्षेत। अथ श्रोत्रियो-विप्रोऽयं च उपेते। संस्कार एकादश्यां पक्षे पक्षे चोपवसेत्। तस्मिन्न होतव्यं न पित्र्यं न स्वाहाकारो न स्वधा न स्वपेत । न व्रजेत् । न पिबेत् । एतदेव ऋषयस्सिद्धा भूपालाश्च । तस्मात् श्रेयस्कामः समुपोषयेत । गार्हपत्यमेवाभिनन्दीत । देवाः स्वर्गं लोकमगमन् ते देवा रुद्रमब्रजन । केन वै मानुषास्तरन्तीति। स होवाच। ज्ञानकर्मणस्तरन्तीति ते हि तमूचुः। कथं भगवः इति। दिशत् कैर्मं व्याख्यास्यामेति । अथैतस्मिन् ब्रह्मदिवसे

न श्राद्धं कुर्यात् । न स्वाध्यायं विना देवपितॄन् तर्पयेत् । यदि वा अस्मिन्दिवसे श्राद्धन्तर्पयेत् । स ब्रह्महा गोघ्नः पितृहा मातृहा भवति । न सायुज्यं सलोकतां गच्छेत् । य एवं वेद इति । बोधायनः - आब्दिकं यस्तु कुरुते संप्राप्ते हरिवासरे । तच्छ्राद्धं रक्षसां भोज्यं श्राद्धशुद्धिर्न विद्यते ॥ इति, स्मृत्यन्तरे–ग्रस्तास्तमित आदित्ये यथा श्राद्धं परेऽहनि । तथैवैकादशीश्राद्धं द्वादश्यामेव कारयेत् ॥ इति, परमवैदिकसिद्धान्त–तत्त्वरत्नाकरे - पाद्मे - मृताहो न परित्यज्य इति वाक्यबलान्नराः । एकादश्यां च ये दद्युः कव्यं ते पापभाजिनः ॥ एकोद्दिष्टं न कुर्याच्च सपिण्डीकरणं तथा । यदि कुर्वन्ति मोहेन पतेयुस्ते न संशयः ॥ तृप्त्यर्थं पितृदेवानां एकादश्यां कथंचन । अग्नावपि न होतव्यं पक्वान्नेन मुमुक्षुणा ॥ इति । मनुः–होमं तिलोदकं पिण्डं न कुर्यात् हरिवासरे । पित्रोः श्राद्धं न कुर्वीत एकादश्यां द्विजोत्तमः ॥ द्वादश्यामेव कुर्वीत प्रातरेव द्विजोत्तमः । अन्यत्रापि—जाताशौचमृताशौचग्रहणै-कादशीं विना । मृताहानि परित्यज्य चण्डालः कोटिजन्मसु ॥ इति । बृहत्प्रचेताः–आद्यश्राद्धं हरिदिने यदि स्यात्तन्न कारयेत् । पिण्डमेकं प्रदायाथ द्वादश्यां श्राद्धमाचरेत् ॥ द्वादश्यामुपवासश्चेत् श्राद्धन्तत्र विवर्जयेत् । परेऽहनि च कर्त्तव्यं तच्चाशौचान्तवत् स्मृतम् ॥ इति । स्मृतिसंग्रहे - नित्यश्राद्धं न कुर्वीत संप्राप्ते हरिवासरे । अपरेऽहनि तन्त्रेण श्राद्धद्वितयमाचरेत् ॥ इति । इतिहासोत्तमे - गृणन्तीह पुराणानि श्रुतयः स्मृतिभिस्सह । न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवासरे ॥ इति । पाद्मोत्तरपुराणे चत्वारिंशाध्याये - एकादशेन्द्रियैः पापं यत्कृतं भवति प्रिये । एकादश्युपवासेन तत्सर्वं विलयं व्रजेत् ॥ एकादशीपरित्यागात् गुरूणामपि निन्दनात् । श्रुतीनामवमानाच्च पतेद्देवि न संशयः ॥ स ब्रह्महा स गोघ्नश्च स्तेयी च गुरुतल्पगः ।

एकादश्यां तु यो भुङ्क्ते पक्षयोरुभयोरपि ।
एकादश्यां तु संप्राप्ते मातापित्रोर्मृतेऽहनि ।
द्वादश्यां तत्र दातव्यं नोपवासदिने क्वचित् ॥
गर्हितान्नं न चाश्नन्ति पितरश्च दिवौकसः ।
एकादश्यां न भुञ्जीत न सुराश्च पिबेत क्वचित् ॥
ब्राह्मणो नैव हन्तव्य इत्येका वैदिकी श्रुतिः ।
तस्मादेकादशीं शुद्धामुपवासं समाचरेत् ॥
महादोषमयं चान्नमेकादश्यां भवेदिति ॥
न दातव्यं न भोक्तव्यं न घ्रातव्यं विशेषतः ॥ इति ।

सनत्कुमारसंहितायाम्—

न कुर्याद्वैष्णवः श्राद्धं दिने विष्णोर्जगत्पतेः । कृतं चेत्सद्य एवैतत्कर्तुर्भोक्तुश्च पातकम् ॥ इति । कपिञ्जलसंहितायां - एकादशीतिथौ प्राप्ते मातापित्रोः मृतेऽहनि । कृत्वोपवासं पूर्वेद्युः अपरेऽहनि पैतृकम् ॥ गर्हितान्नप्रदानेन कर्ता भोक्ता तथा पिता । प्रयान्ति नरकं घोरं कालसूत्रमवाङ्मुखम् ॥ आमेन वा हिरण्येन श्राद्धमेकादशीदिने । कुर्वन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥ विहगेन्द्रसंहितायां–पितुर्दशाहमध्ये वा संप्राप्ते हरिवासरे । पिण्डदानं न कुर्वीत न तिलोदकसंस्क्रियाम् ॥ इति । परिशिष्टे षड्विंशेऽध्याये–एकादश्यां तिथौ प्राप्ते मातापित्रोः क्षयो यदि । द्वादश्यामेव तु श्राद्धं वैष्णवस्य विधीयते ॥ एकादशीं परित्यज्य द्वादश्यां विहितं विभो । नारायणस्य प्रीत्यर्थं स्यात् श्राद्धं तद्धि वैष्णवम् ॥ अनन्यगतिको नाथं शरणत्वेन संगतः । कुर्वीत पित्रोर्न श्राद्धं उपवासदिने हरेः ॥ इत्यादि श्रुति स्मृति इतिहास पुराण पांचरात्र वैखानस वचनानि वर्तन्ते, उदाहृतवचनेषु वैष्णवशब्दप्रयोगमहिम्ना श्रीवैष्णवैः एकादश्यां व्रते सति - तत्र प्राप्तं श्राद्धात्मकतदीयाराधनं द्वादश्यां कर्तव्यं द्वादश्यां

व्रते सति तत्र प्राप्तं श्राद्धात्मकृतदीयाराधनं त्रयोदश्यां कर्तव्यमिति सिद्धम् । देवलस्मृतौ-मातापित्रोर्मृताहे च भवेदेकादशी यदा । संभाव्य पितृदेवांश्च ह्याजिघ्रेत्पितृसेवितम् ॥ स्मृत्यन्तरे - उपवासो यदा नित्यं श्राद्धं च प्रकृतं भवेत् । उपवासं तदा कुर्यात् आघ्राय पितृसेवितम् ॥ यमस्मृतौ— आब्दिके समनुप्राप्ते एकादश्यां द्विजोत्तम । भुंजीयात् भुक्तशेषान्नं नारकी स्यादुपोषणे ॥ कात्यायनस्मृतौ - उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत् । उपवासं तदा कुर्यात् आघ्राय पितृसेवितम् ॥ इत्यादिकं, सकामाधिकारिविषयं वेदितव्यम् । वृद्धपाद्मे - सकामो यदि कुर्वीत श्राद्धं हरिदिने द्विजः । द्वादश्यामेव कर्तव्यं निष्कामः प्रीतये हरेः ॥ इत्यादि वचनसद्भावात् - तथोक्तं सच्चरित्रपरित्राणे - सुधीविलोचने, क्वचित्पुराणे तु द्वादश्यां तु श्राद्धं कार्यं नैकादश्यामित्युक्तं - तदनादरणीयं पुराणात् स्मृतेः बलीयस्त्वादित्युक्तं - तदयुक्तं - तत्रायं पूर्वेषां संग्रहः— प्राबल्यात्स्मृतितः पुराणवचसां स्मृत्यैककण्ठ्यात्तथा कालादर्शमुख-व्यवस्थिततया प्राचीनवाचामपि । तस्यागादपि सूतकेऽन्नविहतेः पित्राद्यभुक्तिस्मृतेः पात्रासंभवतश्च पारणदिने पित्र्यं पवित्रं विदुः ॥ इति - अस्यार्थः - अनधिकृतशास्त्रात् अधिकृतशास्त्रं प्रबलं - सर्गाद्यधिकृतात्पुराणात् आचाराधिकृता स्मृतिः आचारांशे प्रबला - आचाराधिकृतस्मृत्यपेक्षया सर्गाद्यंशे पुराणं प्रबलं - आचारसामान्याधिकृतस्मृत्य-पेक्षया अनन्यभजनपरविशिष्टाधिकारिणां आचारेऽधिकृतं पुराणं तदंशे प्रबलम् । स्मृतिषु पुराणेषु राजसाद्यपेक्षया सात्त्विकं प्रबलं, इदं च स्मृत्यपेक्षया विशिष्टाधिकारिणां - आचारे पुराणे प्राबल्यं श्रीविष्णु-चित्तीयेऽभिहितं = यथैवं, वेदादित्रयोदशविद्यास्थानाभिज्ञः सोऽहं जगज्जन्मादिपुराणार्थं श्रोतुमित्यर्थः— तथा धर्मांश्चेत्यर्थे - तदाराधन-स्वरूपफलविशेषौ पृष्टवानिति - अत्र च विशिष्टाधिकारिकर्तव्यभगवदा-राधनात्मकाचारप्रश्नोक्तिः धर्मशास्त्रेण तदनवगमाभिप्रायमूलिकेति

तदनधिकृतधर्मशास्त्रापेक्षया - तदधिकृतपुराणस्य प्राबल्यं स्फुटमभिहितम् । श्रीमन्निगमान्तमहादेशिकैः पुराणस्य :स्मृतित्वमुक्तं न्यायपरिशुद्धौ शब्दाध्याये द्वितीये आह्निके - ततश्च वेदमूलाः स्मृतयः त्रिविधाः धर्मशास्त्र, इतिहास, पुराण भेदादिति । तैरेव, हरिदिनतिलके च – "पौराणिक्या तु रुक्मांगदचरितमुखप्राप्तगत्या पदव्या, शुद्धां सिद्धान्तयन्तः कतिचन कृतिनः सर्वथोज्झन्ति विद्धाम् । इति सर्वविधवेधत्यागे पुराणस्य – विद्धोपवासविधिपरस्मृत्यपेक्षया प्राबल्यमुक्तम् । दशनिर्णये च - श्रीजयन्तीविषये, श्रीवैष्णवानां सर्वप्रकारवेधत्यागरूपविशिष्टाचारे विद्धोपवासपरस्मृत्यपेक्षया प्राबल्यं स्वीकृतं, मतान्तरस्थैरपि श्रीधरादिभिः स्मृत्यपेक्षया पुराणानां प्राबल्यं स्फुटं प्रतिपादितम् । तथा नारदीयेऽपि - वेदार्थादधिकं मन्ये पुराणार्थं वरानने । वेदः प्रतिष्ठितो देवि पुराणे नात्र संशयः ॥ इति । एवंच सति-आचारेषु धर्मशास्त्रं-सर्गप्रतिसर्गौ पुराणानीति वचनमौत्सर्गिकं क्वचित्तावन्मात्रपर्यवसितपरमिति वा सात्विकपुराणानुयायिस्मृतीनां सदाचारेऽधिकृतत्वेन पुराणान्तरापेक्षया प्राबल्यपरमिति वा - अतः पुराणात्प्राबल्यरूपहेतुः असिद्धः । स्मृतावपि, एकादश्यां प्राप्तस्य पैतृकस्य द्वादश्यां कर्तव्यत्वं उपदिश्यते । वृद्धहारीतस्मृतौ - सूतकादौ यथाश्राद्धं सूतकान्ते विधीयते । तथैवैकादशीश्राद्धं द्वादश्यामेव कारयेत् । हारीतस्मृतौ - पित्रोः श्राद्धं न कुर्वीत एकादश्यां द्विजोत्तमः । द्वादश्यां तत्र कुर्वीत नोपवासदिने क्वचित् ॥ एकादशीदिने प्राप्ते मातापित्रोर्मृतेऽहनि । तद्दिनन्तु परित्यज्य द्वादश्यामेव कारयेत् ॥ इत्यादि - तथा विज्ञानेश्वरचन्द्रिकाद्युदाहृतानां, एकादश्यां श्राद्धकर्तव्यत्वपरवचनानां - तत्र तदकर्तव्यत्वपरवचनानां च स्मार्तवैष्णवरूपाधिकारिभेदेन व्यवस्थापनं कालादर्शखण्डादर्श स्मृतिसारसमुच्चय — चतुर्वर्गचिन्तामणिपुरुषार्थसुधानिधि धर्मसेतुनिबन्ध

वैखानससंग्रहादिषु कृतम् । अतः वैष्णवानां द्वादश्यामेव तत्कर्तव्यम्, सूतकवच्चैकादश्यां श्राद्धत्यागो विहितः, अन्नं चैकादश्यां पापाश्रयत्वेन विहन्यते । यथा ब्रह्मवैवर्त्ते-स केवलमघं भुङ्क्ते यो भुङ्क्ते हरिवासरे । दिनेऽत्र सर्वपापानि भवन्त्यन्नस्थितानि तु ॥ यानि कानि च पापानि ब्रह्महत्यासमानि च । अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे ॥ इत्यादि, एकादश्यां पित्रादीनां भुक्त्यभावः स्मर्यते। मातृभर्तृपितृणान्तदन्नं दुर्गतिःसाधनम्। गर्हितान्नं नचाश्नन्ति पितरश्च दिवौकसः॥ मद्यपानं नरश्रेष्ठ पीत्वैको नरकं व्रजेत् । एकादश्यन्नकामस्तु पितृभिस्सह मज्जति ॥ इति । पात्रं च न संभवति । भुंक्ष्व भुङ्क्ष्वेति यो ब्रूयात्तमाहुर्ब्रह्मघातकम् । इत्यादिकं द्रष्टव्यम् । अष्टौ तान्यव्रतघ्नानीत्यत्र ब्राह्मणकामायेत्येतदेकादशीव्यतिरिक्तविषयं, अतः एकादश्यां प्राप्तं मातापित्रादिश्राद्धं पारणदिन एव कर्तव्यमिति प्रामाणिका उपगच्छन्तीति। विस्तारस्तु एतद्व्याख्यानग्रन्थे पूर्वैरेव कृतोऽनुसन्धेयः । सूतकदृष्टान्ते - एकादश्यां एकोद्दिष्टप्रसंगस्तु पूर्वैरेव परिहृतः । तथाहि भरद्वाजः आद्यश्राद्धं हरिदिने यदि कुर्याद्विमोहितः । कर्ता प्रतिग्रहीता चाप्युभौ निरयपातिनौ ॥ इति । बोधायनः-आद्यश्राद्धं हरिदिने यदि स्यात्तन्न कारयेत् । पिण्डमेकं प्रदायाथ द्वादश्यां श्राद्धमाचरेत् ॥ बृहत्प्रचेताः - आद्यश्राद्धमपि त्याज्यं संप्राप्ते हरिवासरे । प्रदायैकं तदा पिण्डं परेऽह्नि श्राद्धमाचरेत् ॥ एकादशे द्वादशे वा श्राद्धमाद्यं समाचरेत् । एकादशद्वादशयोः विशेषो न हि विद्यते ॥ इत्यादि । आमश्राद्धादिकमप्येकादश्यां निषिद्धम् । तथाच भगवच्छास्त्रे–आमेन वा हिरण्येन श्राद्धमेकादशीदिने । कुर्वन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥ ग्रस्तास्तमित आदित्ये यथा श्राद्धं परेऽहनि । तथैवैकादशीश्राद्धं द्वादश्यामेव कारयेत् ॥ इति । पूर्विकोक्तदशनिर्णयग्रन्थे एकादशीश्राद्धनिषेधग्रन्थे - प्राबल्यात् श्रुतितः पुराणवचसामितिश्लोकविस्तरव्याख्याने-

वेदोपबृंहणभूतेषु धर्मशास्त्रेषु इतिहासपुराणेषु धर्मशास्त्राणि पूर्वभागोप- बृंहणानि - इतिहासपुराणानि उपरितनभागोपबृंहणपराणीति विवेकः । स्मृत्यपेक्षयान्तरंगत्वेन ब्रह्मविदाचाररूपार्थनिष्कर्षे पुराणस्याधिक्यं स्पष्टं - पुराणन्यायमीमांसेत्यादिना पुराणादीनामपि धर्मस्थानत्वोक्तेश्च अन्तरंगत्वाच्च । एवं श्रीवैष्णवसदाचारविषये स्मृत्यपेक्षया पुराण- प्राबल्यमभिसन्धायैव वेदान्ताचार्यैः हरिदिनतिलकेऽभिहितं पौराणिकया तु रुक्मांगदचरितमुखैरिति । तत्रैव स्थलान्तरे— आब्दिकादौ तु भुंजीयादुपवासदिनं प्रति । अन्यत्रोपोषणं कुर्यात् आघ्राय पितृसे- वितम् ॥ इत्यादिस्मृतिपुराणविरोधः स्यादिति चेन्न । उपवासो यदा नित्यः इति वचनानां अवैष्णवविषयत्वेन श्रीमन्नारायणमुनिप्रणीत- पुरुषार्थसुधानिधिप्रभृतिषु प्रतिपादनादित्याह — कालादर्शेति । तत्र तत्रावैष्णवपरत्वेनैव योजितं, उपवासो यदा नित्यः इत्यादि हरिदिने श्राद्धपरवचनमिति भावः । तिथिदर्पणेऽपि - एकादश्यां न भुजीत पक्षयोरुभयोरपि । अनेन विधिवाक्येन तत्र श्राद्धं परेऽहनि ॥ महादोषमयं चान्नं एकादश्यां भवेद्यदि । न दातव्यं न भोक्तव्यं नाघ्रातव्यं विशेषतः ॥ इति । वैखानससंग्रहेऽपि श्रीवैष्णवैकादशीनिर्णयः इत्यारभ्य, शौनकः - कपालवेध इत्याहुराचार्या ये हरिप्रियाः । अरुणोदयवेधस्य नावकाशोऽस्ति किं चन ॥ इत्यादिना वेधादिकं सम्यगुपपादितम् । गारुडपुराणे अरुणोदयवेलायां दशमी दृश्यते कला । एकादशीं त्यजेयुस्ते मद्भक्ताः पांचरात्रकाः ॥ अर्धरात्रात्परा यत्र दशमी विध्यते कला । वैखानसविदो विप्रा मद्भक्तास्तामुपोषणम् ॥ दशमीवेध- संयुक्तो यदि स्यादरुणोदयः । नैवोपोष्यं वैष्णवेन तद्धि नैकादशीव्रतम् ॥ इत्याद्युक्त्वा भविष्यत्पुराणे - वैखानसाद्यागमोक्तदीक्षां प्राप्ता हि वैष्णवाः । नैकादशीं त्यजेयुस्ते महापत्तौ भयेऽपि च ॥ एकादश्यां न भुंजीयान्न दद्यात्

अन्नकांक्षितः । भुंक्ष्व भुंक्ष्वेति यो ब्रूयात् यो भुङ्क्ते हरिवासरे ॥ तावुभौ-पतितौ स्यातां तस्मात् श्राद्धं परेऽहनि। यथाऽऽशौचादिके श्राद्धमाशौचान्ते विधीयते ॥ तथैवैकादशीश्राद्धं द्वादश्यामेव कारयेत् । इत्याद्यप्युक्त्वा, इति श्रीवैष्णवैकादशीति परिसमाप्य, वैखानसाद्यागमोक्तदीक्षया न हि दीक्षिताः । श्रौतस्मार्तैकनिष्ठाश्च स्मार्त्तास्ते वैदिकाः स्मृताः ॥ इत्यारभ्य, अतिवेधमहावेधा येचान्ये तिथिषु स्मृताः । सर्वेऽप्यवेधा विज्ञेया वेधस्सूर्योद-मतः । इत्यादि सर्वं प्रतिपाद्य स्कान्दपुराणे - श्राद्धं प्रतिदिनं कृष्ण कर्तव्यं गृहिणीयुतैः। उपोषणं न कर्त्तव्यं एकादश्यां सितेऽपिच ॥ आब्दिकादौ तु भुंजीयात् उपवासव्रतं प्रति । श्राद्धं कृत्वा तु यो विप्रो न भुङ्क्ते पितृसे-वितम् ॥ देवा हविर्न गृह्णन्ति कव्यं च पितरस्तथा । यमः—आब्दिके समनुप्राप्ते एकादश्यां द्विजोत्तमः । भुंजीयात् भुक्तशेषान्नं नारकी स्यादु-पोषणे । अत्र कात्यायनः—उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत् । उपवासन्तदा कुर्यात् आघ्राय पितृसेवितम् ॥ बृहस्पतिः - आब्दिकादौ तु भुंजीयादुपवासदिनं प्रति । अन्यत्रोपोषणं कुर्यात् आघ्राय पितृसेवितम् ॥ देवलः—मातापित्रोः क्षये प्राप्ते भवेदेकादशी यदा । अभ्यर्च्य पितृदेवांश्च आजिघ्रेत्पितृसेवितम् ॥ पितरस्तस्य तुष्यन्ति कामितं च प्रसिध्यति । इत्यादि स्मार्तविषयमपि प्रकरणं प्रपञ्चितमिति । तत्रैव-कृष्णे त्विन्दुक्षये वापि कुर्यादन्नेन वार्षिकम् । इति मरीच्यादिवचनैः कृष्णैकादश्यां विघ्नितादिप्रत्याब्दिकं श्राद्धं कथं स्यादित्याशंकनीयं [न भवति] तेषां वचनानां स्मार्तविषयत्वात् - तथाहि, वैष्णवानामविदिते प्रत्याब्दिकश्राद्धं कुत्रेति चेत् द्वादश्यामनुष्ठेयमिति । तथा हारीतः - यस्मिन्मासि तिथिर्नश्येत् श्राद्धं कार्यं कथं भवेत् । तन्मासि श्रवणर्क्षे वा द्वादश्यां वा विधीयते ॥ उपरागसहस्राणि व्यतीपातशतानि च । अमालक्षं तु द्वादश्याः कलां नार्हन्ति षोडशीम् । इति स्मृत्यन्तरवचनादिति । अत्र स्मृतित्वावा-

न्तरभेदत्वादिकथनात्-सकलधर्मशास्त्रमूलतया निष्कृष्टस्य श्रीपांचरा-त्रस्य तदुक्तार्थस्य उदाहृतवराहादिपुराणवचनसिद्धत्वादित्युक्तेः। तत्रैव-दशनिर्णये श्रीजयन्तीनिर्णयप्रकरणे - तैरेव श्रीपांचरात्रप्रामाण्यसमर्थन-मुखेन अस्मत्प्रतिपादितप्रकारेणैव प्रपंचितं प्रतीयते - तथाहि नन्वयं संहितोक्तपक्षः इति चेत् किं तेन कृतो जयन्तीनिर्णयः स एव कथमिति चेत् - श्रुतिस्तु वेदो विख्यातः धर्मशास्त्रं तु वै स्मृतिः। ते सर्वार्थेषु मीमांस्ये ताभ्यां धर्मो हि निर्बभौ इति मनुस्मरणात् - तत्रापि पुराणोक्तं ग्राह्यमेव प्रत्यक्षानुमानाभ्यां, स्मृतेश्च - स्मरन्ति चेत्यादिषु सूत्रेषु स्मृतिप्रसंगे - स्मृतित्वेन विष्णुपुराणात् - इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। इति वेदोपबृंहणत्वेन उक्तपुराणस्थाने - दुर्बोधा वैदिकाश्शब्दाः प्रकीर्णत्वाच्च ये खिलाः। तज्ज्ञैस्त एव शास्त्रार्थाः स्मृतितन्त्रे प्रतिष्ठिताः॥ इति स्मृतिशब्दप्रयोगाच्च। पुराणन्यायमीमांसेति धर्मस्थानत्वस्मृतेश्च तदुक्तं प्रमाणमिति। तत्रैव - अत्र स्मृतिपुराणवचनानां अन्योन्यविरोधे पुराणवचनमनादरणीयमिति सुधीविलोचनकृद्वादः प्रौढवाद एवेति। तत्रैव - श्राद्धादेस्तु पित्रादितृप्त्यर्थतयान्यत्र क्लृप्तावपि मुक्तविषये पुत्रत्वाद्युपाधित एव अवश्यकर्तव्यत्वात् - तस्य च भगवन्मुखोल्लासकारणत्वस्यापि प्रमाणसिद्धत्वात् - तथा च श्रीभरद्वाजसंहितायां-अथेह बान्धवास्तस्य गतस्य परमां गतिम्। वैष्णवास्त्वभिनन्देयुः पुण्यामवभृथक्रियाम्॥ क्रियते चास्य पुत्राद्यैः यत्किमप्यौर्ध्वदेहिकम्। तत्सर्वं प्रियभक्तस्य विष्णोः प्रीतिकरं वरम्॥ इति। तथा च लक्ष्मीतंत्रे-अविप्लवाय धर्माणां पालनाय कुलस्य च। संग्रहाय च लोकानां मर्यादास्थापनाय च॥ प्रियाय मम विष्णोश्च देवदेवस्य शार्ङ्गिणः। मनीषी वैदिकाचारं मनसापि न लंघयेत्॥ इत्यलम्। तत्रैव - तादृशभगवन्मुखोल्लासदर्शनेन मुक्तानां पित्रादीनामपि मुखोल्लास

संभवादिति। तत्रैव - इयांस्तु विशेषः—भक्तानां विशिष्टप्रतिष्ठानन्तरं, प्रसादोन्मुखैश्वरसंकल्पाधीनमप्राकृतत्वमनुसंधेयं - इति न्यायसिद्धांज - नोक्तन्यायेन - भक्तानां मुक्तानां पूर्वरूपविशिष्टत्वेन - विशिष्टप्रतिष्ठा - नन्तरं - अप्राकृतपूर्वरूपविशिष्टतयोद्देश्यत्वे - पित्रादीनां मुक्तानां तु तादृशविशिष्टप्रतिष्ठाभावात् श्राद्धादिषु यथोचितपूर्वरूपविशिष्टतया उद्देश्यत्वमेव युक्तं - एवं च श्राद्धमपि पूर्वरूपविशिष्टतयैव पित्रादीनां मुक्तानामुद्देश्यत्वे - तादृशानां च तेषां एकादश्यनुष्ठानस्यापि युक्तत्वात्, कथं तदुद्देशेन भोजनाद्यात्मकश्राद्धानुष्ठानमेकादश्यामिति। तत्र च एतानि विशेषवचनानि अनुसन्धेयानि - तथाहि, श्रीपाद्मे पुराणे उत्तरखण्डे - उमामहेश्वरसंवादे षट्त्रिंशेऽध्याये - एकादश्यां तु शुद्धायां - मथ्यमाने महांबुधौ। उपोष्य ऋषयस्सर्वे जगुः श्रीमन्त्रमुत्तमम्॥ कांक्षमाणाः श्रियो जन्म लक्ष्मीनारायणं हरिम्। ध्यात्वा समर्चयामासुः द्विजाग्र्या मुनिसत्तमाः॥ इति - तत्रैव - अद्य प्रभृति ये लोकाः एकादश्यां सुरोत्तमाः। भुंजते तेऽपि नरकं प्राप्नुवन्ति न संशयः॥ एवमुक्त्वा सुरगणान् देवदेवो जनार्दनः। संस्तूयमानो मुनिभिः प्रययौ स्वकमालयम्॥ तदा प्रभृति वै सर्वे देवा ब्रह्मपुरोगमाः। ऋषयो मानुषाश्चैव योगिनो मुनिसत्तमाः॥ विष्णोराज्ञां पुरस्कृत्य भक्त्या च परया युताः एकादश्यां तु शुद्धायामुपोष्यैव जनार्दने॥ द्वादश्यामर्चयामासुः विधिना वरवर्णिनि। इति। तत्रैव संवर्तः। न ब्राह्मणं परीक्षेत दैवे कर्मणि धर्मवित्। पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः॥ इत्युक्तलक्षणानां परमास्तिकानां पात्राणां एकादश्यां भोक्तृत्वासंभवात्, सुतरां तत्र श्राद्धे भोक्तृत्वासंभवीति पात्रासंभवत इत्युक्तमिति। तत्रैव एवं च अष्टौ तान्यव्रतघ्नानि आपो मूलं घृतं पयः। हविर्ब्राह्मणकामाय गुरोर्वचनमौषधम्॥ चतुर्विंशेऽध्याये - तत्रैव

एवं उपवासे अशक्तौ विवशानां - एकभक्ताद्यभ्यनुज्ञाने - तादृशानां तेषां अशक्तानां कथं श्राद्धभोजने शक्तिरिति तत्रैव प्रतिनियतधियां भगवदनन्यभक्तानां मुक्तलक्षणानां श्रीवैष्णवानां सतां यत्यादीनां गृहस्थानां च निष्कामत्वाविशेषेण उपवासपारणदिने पात्रत्वमप्रतिहतं, तेषां तादृशपरान्नस्य भगवत्प्रापणरूपस्य परमपावनस्य तादृशेभ्यः प्रार्थ्यत्वेन तत्स्वीकृतेरेव अभ्यर्हितत्वात् - तथाहि सच्चरित्ररक्षादौ मात्स्ये श्रीकृष्णार्जुनसंवादे - मच्चक्रांकितदेहो यो मद्भक्तो भुवि दुर्लभः । नैवाप्नोति वशं मृत्योः अप्याज्ञाभङ्गकृन्नरः ॥ इति, तत्रैव श्रीपौष्करे शयनाध्याये - कृतोपवासा येऽश्नन्ति प्रापणं पारमेश्वरम् । संप्रदानावशिष्टं च पूतदेहा नरास्तु ते ॥ इति, तत्रैव - प्रार्थयेद्वैष्णवादन्नं तदभावे जलं पिबेत् । कायशुद्धिकरं प्रोक्तं प्रायश्चित्तं परं हि तत् ॥ तथाहि - भिक्षेत वैष्णवेष्वेव ब्रह्मचारी यतिस्तथा । इत्यादि । एवं च परान्ननिषेधः परान्नविषय एव । अत एव श्रीपांचरात्ररक्षायां - भगवदर्चावताररहितस्य गृहस्य पुरुषस्याभोज्यान्नत्वमन्यत्रोच्यते । केशवार्चा गृहे यस्य न तिष्ठति महीपते । तस्यान्नं नैव भोक्तव्यं अभक्ष्येण समं हि तत् ॥ श्रीभरद्वाजसंहितायां - विष्ण्वर्चारहिते ग्रामे विष्ण्वर्चारहिते गृहे । न कुर्यादन्नपानादि न तत्र दिवसं वसेत् ॥ न किंचित्प्रतिगृह्णीयात् विष्णुभक्तिविवर्जितात् । पानीयं पक्वमन्नं च विशेषेण विवर्जयेत् ॥ नन्वेवं तत्रापि भगवत्प्रापणस्य उपवासदिनेऽपि परमपावनत्वेन प्रार्थनीयत्वाविशेषात् तत्रापि भोक्तृत्वप्रसंगः इति चेत् मैवं, उपवासशास्त्रेणैव तत्स्वीकरणस्यापि निषिद्धत्वेन तत्रान्नभोक्तृत्वायोगात् - अन्यथा उपवासशास्त्रानर्थक्यप्रसंगात् । तथोक्तं हरिदिनतिलके — अष्टांगेज्यावतामप्युपवसनदिने लुप्तमन्यन्निषेधात् - एवं प्राणाग्निहोत्रं प्रथममुपगते ह्येतदन्ते प्रयोज्यम् । इति । यत्र तु भगवत्प्रापणस्य तत्कृपया यदृच्छया प्राप्तिः तत्र तु

प्रतिप्रसवविधानेन तावन्मात्रभोक्तृत्वम् । तथा हारीतस्मृतौ - कृपादत्तं हस्तगतं विष्णुभुक्तोज्झितन्तु यः । उपवासछलान्नात्ति तेन भुक्तं सुरासमम् ॥ विष्णोः प्रसादं तुलसीं तीर्थं वापि द्विजोत्तमः । उपवास-दिने वापि प्राश्नीयादविचारयन् ॥ धात्रीमात्रेऽथवा बिल्वमात्रे वा विन्यसेद्धरेः । नाचामो नाग्निकरणं तत्सर्वं स्यात्ततः परम् । एका-दश्युपवासदिने पित्र्यकरणे प्रागुक्तदोषाणां पारणदिने प्रसंगाभावं गुणान्तरं चानुसन्धायाह - पारणदिने पित्र्यं पवित्रं विदुः–अत्र पवित्र-शब्देन तादृशपित्र्यस्य बहुमुखं पावित्र्यमभिसंहितम् । तत्र कालान्न पात्राणां पावित्र्यं प्रकटीकृतम् । पितृकर्तृक्रियाणां च तत्पावित्र्यं परि-स्फुटम् ॥ इति । अत्र ग्रन्थे एकादश्यां श्राद्धनिषेधः संग्रहेण प्रतिपादितः। दिङ्मात्रमिह दर्शितं विस्तरस्तु कुन्नूरु अय्यनिति द्राविडनामक वरदा-चार्यविरचितानंदनिलयनामकाचार्यविरचितदशनिर्णयद्वयादौ दास-कृतहरिदिनकृत्यविवेके च द्रष्टव्यः । अतः प्रपन्नैः प्रमाणबलात् एकादशीव्रतदिनप्राप्तश्राद्धात्मकतदीयाराधनं परदिन एव कार्यम् ॥

इति श्रीसदनुष्ठानदर्पणे एकादश्यां
श्राद्धाकर्तव्यविषयो नाम एकविंश
प्रतिफलनम् ॥
श्रीरस्तु ।

॥ श्रीः श्रियै नमः श्रीरस्तु ॥

सदनुष्ठानदर्पणे
श्रीजयन्त्यां श्राद्धाकर्तव्यत्वविषयो नाम
(द्वाविंशप्रतिफलनम्)

श्रीवैष्णवैः जयन्त्यां प्राप्तम् श्राद्धात्मक तदीयाराधनम् परदिनएव कर्तव्यम् – तथावचनसद्भावात् – सर्वत्र त्रैविध शुद्ध शिष्टाचाराच्च तथाहि, संग्रहे भगवच्छास्त्रे 'एकादश्यां जयन्त्यां-वायच्छ्राद्धम्कुरुतेद्विजः । श्वमांसं कुरुतेश्राद्धे, सपितृभ्यः प्रयच्छति । एकादश्यां जयन्त्यांवा यो भुङ्क्तेमूढचेतनः कबले कबले भुक्तं श्वमांसंतेनवैस्मृतम् इति स्मृतिसंग्रहे - एकादश्यां वा प्रसक्तम् यदि चाब्दिकम्, तद्वासरे न कर्तव्यम् प्रकुर्वीत परेऽहनि । एकादश्यां जयन्त्यां वा मृताहोयस्य कस्यचित्, क्षुरकर्म नकुर्याच्च पिण्डदानं परेऽहनि - इति, गारुडे - एकादश्यां जयन्त्यां च देवर्षिपितृतर्पणं-करोति यदि यत्नेन वैष्णवोपि पृथक्जनः - निमज्जत्यत्यन्धतमसे रौरवे तप्तसैकते - कुम्भीपाके महाघोरे सर्वन्नरकमश्नुते - तस्मादे-काद्शीश्राद्धम् नोपवासेसमाचरेत् - दातृ भोक्तृ पितृणाम् तदन्नम् दुर्गतिसाधनम् इति - विहगेन्द्रसंहितायां परिशिष्टे षड्विंशाध्याये— "एकादश्यांतिथौ प्राप्तेमातापित्रोः क्षयोयदि द्वादश्यामेवतु श्राद्धम् वैष्णवस्यविधीयते - एकादशीं परित्यज्य द्वादश्यां विहितम्विभो - नारायणस्य प्रीत्यर्थंस्यात् श्राद्धन्तद्धिवैष्णवम् - अनन्यगतिकोनाथम् शरणत्वेनसंगतः वीतपित्रोर्नश्राद्धम् उपवासदिनेहरेरिति अत्रभगवन्नि

मित्तकोपवासदिने जयन्त्यादौ श्राद्धम् परार्थपर प्रपन्न श्रीवैष्णवस्य निषिद्धमित्युक्तम् अनन्यगतिकोनाथं शरणत्वेनसंगतः इत्युक्तत्वात् भरद्वाजसंहितायां – "देवानांच ऋषीणांच पितृणांच विशेषतः – अन्नंनदद्यात् कृष्णाहे भगवन्तम् हरिंविना - नौपासनं तथा श्राद्धं ब्रह्म यज्ञादिपंचकं - न तत्रविधिलोपस्स्यात् जयन्त्यां हरिवासरे इति संग्रहे - सूतकादौ यथा श्राद्धम् सूतकान्तेविधीयते - तथाजयन्ती श्राद्धं च परेहनि समाचरेत् इति, पूर्विकाह्निक निबन्धने हरिदिन शततुल्य च्यच्युत श्रीजयन्त्यां पितृदिनमनुगच्छेत्पिण्डदानम् न कार्यं, अपरदिवस एवह्याचरेत् श्राद्धकर्ता पितृविबुधजनानां प्रीतिरत्यन्तमासी-दिति - ननुजयन्त्यां अनिरुद्धसंहितायां "जयन्तीनां तुसर्वासामुत्सवान्ते चपारणम्। कर्तव्यमैहिकासंगैः पश्चकालपरायणैः इत्युक्तरीत्या - रात्रौपारणाकालस्य प्राप्तत्वेन, रात्रावेव श्राद्धात्मकाराधनम् कार्यमिति चेत् उच्यते आश्चर्यपर्वणि शेषधर्मे जयन्तीमाहात्म्यनामकैत्रिंशाध्याये- जयन्त्यां नैव भुंजीत धर्मे बुद्धिर्यदिस्थिता भुक्तंयदिसपापीस्यात् रौरवम् नरकम् व्रजेत्-महापातक संयुक्तः युक्तोवा सर्वपातकैः। जयन्त्यां तुनिराहारः स्थित्वा यातिहरेः पदं इति, जयन्त्यां उपवास विधानात्- "नोपवासदिनेकचित्" इति उपवास दिने श्राद्ध निषेधात — शातातपस्मृतौ - रात्रौश्राद्धम् नकुर्वीत राहोरन्यत्रदर्शनात् - सूर्योदय- मुहूर्तत्रासंध्ययोरुभयोस्तथा - शंखस्मृतौ ग्रहणे निशिवाकुर्यान्नरात्रै पैतृकम् पुनरिति रात्रौ श्राद्धकरण निषेधात - कथंचिद्रात्रि श्राद्ध करणांगीकारेपि - देवलः पितृकर्माणिसर्वाणिप्रेतकर्माणियानिच रात्रा- वपिचकर्तव्यान्यत्र भुक्तयादिनाचरेदिति। मनुः पितृणांतु दिवाभावे यदिरात्रावपीरितम्। पैतृकम् कर्ममुनिभिः ग्राह्यमेतच्चसंकटे। श्राद्धकर्मनिशाकाले कर्तव्यम् मनुजैर्भुवि। मध्यपिण्डाशनम् पत्न्याः स्वभुक्तिं च नकारयेत् इत्यादिवचनैः श्राद्धकर्तुरपि भोजननिषेधात्

तिथ्यृक्षयोर्यथाच्छेदः नक्षत्रान्तमथापिवा अर्धरात्रेऽथवा कुर्यात्पारणम् तत्परेहनि इति परदिनपारणस्यापि प्रतिपादनात् - मरीचिः श्राद्ध विघ्नेद्विजातीनां आमश्राद्धंप्रकीर्तितम् अमावास्यादि नियतम् मास-संवत्सराहते इति स्मृतिसंग्रहे - उच्छिष्टोच्छिष्टसंसर्गे श्वान शूद्रादि दर्शने वमने पिण्डसंभेदे काकपिण्ड श्वभोजने स्वधापात्रेविनिक्षिप्ते रक्षोघ्नम् नपठेद्यदि उपोष्यकर्ता विधिवत्परेद्युः श्राद्धमाचरेदित्यादि वचनैः उपहतश्राद्धस्य तद्दिनोपवासपूर्वक परदिनकर्तव्यत्वप्रति पादनात् - तन्यायेन मृताहातिक्रमदोषासंभवात् - जयन्त्यांरात्रौ कर्तव्यमितिविशिष्यवचनाभात्वात् - रात्रौ श्राद्धात्मकाराधनकरणे लोकोपक्रोशसंभवात् उपवास दिने यस्तु तीथवातुलसीमपि नप्राशयेत् विमूढात्मारौरवं नरकम् व्रजेत् (तीर्थवापि द्विजोत्तमः) उपवासदिने चैव प्राश्नीयादविचारयन्—उपवासछलान्नात्ति तेन भुक्तंसुरासमम् इतिहारीतस्मृत्याद्युक्तरीत्या रात्रौ श्रीभगवदाराधनानन्तरंभगवत्तीर्थं श्रीपादतीर्थमात्र स्वीकारेण - श्रुतौ "अपोश्नाति - तन्नेवाशितम् नेवानशितम् - इति - देवलस्मृतौ - संकटे विषये प्राप्ते द्वादश्यां पारयेत्कथम्। अद्भिस्तुपारणंकुर्यात् पुनर्भुक्तान्नदोषकृत् इति श्रीभागवते नवमस्कन्धे चतुर्थाध्याये अम्बरीषोपाख्याने ब्राह्मणातिक्रमे दोषात् तदनधिकृतधर्मशास्त्रापेक्षया - तदधिकृतपुराणस्य प्राबल्यं स्फुटमभि-हितम्। श्रीमन्निगमान्तमहादेशिकैः पुराणस्य स्मृतित्वमुक्तं न्याय-परिशुद्धौ शब्दाध्याये द्वितीये आह्निके - ततश्च वेदमूलाः स्मृतयः त्रिविधाः धर्मशास्त्र, इतिहास, पुराण भेदादिति। तैरेव, हरिदिनतिलके च — द्वादश्यामप्यपारणे यत्कृत्वासाधुमेभूयात् अधर्मोवानमांस्पृशेत् अंभसा केवलेनाथकरिष्येव्रतपारणां आहुरभक्षणंविप्रा अशितानशितंचयत् इत्यपः प्राश्य राजर्षिः चिन्तयन्मनसाच्युतं प्रत्याचष्टकुरुश्रेष्ठ द्विजा-गमनमेवसः इत्युक्तरीत्या, द्वादशीपारणातीर्थग्रहणवत् - तन्त्रेणपारणाया

अपिसंभवात् - श्राद्धदिनेपि मृत्स्नाद्यापिसमायुक्त पेटिकायांविनि— क्षिपेत् - नित्यंतद्घटकं सम्यक् पूर्वोक्तविधिनापिबेत् इति - अहरहः संध्यामुपासीतेति - आचमेदिति — पराशरसंहिता तृतीयाध्याय, श्राद्धलोपाभावात् एकादश्यां जयन्त्यांवा एकादश्यां जयन्त्यां च इति श्रीवैखानसे - एकादशी चतुर्विंशत्समानत्वाष्टमीव्रते - तस्मा-त्सर्वप्रयत्नेन जयन्तीं समुपोषयेत् इति पृष्ठितन्त्रे एतदुक्तं जयन्त्यांवै - एकादश्यान्तु सर्वदा - अन्नं गोमांससदृशं भवेत् श्राद्धो न संशयः - इति वाररुचे श्रीजयन्ती निर्धारणप्रघट्टके उपरागादिसर्वेषु चोपवासदिने तथा एकादश्यां न कुर्यात्पैतृकं नरः एकादशी चतुर्विंशत्समा श्रीकृष्णजन्यभमिति श्राद्धविषये एकादशी तुल्ययोगक्षेमत्वप्रतिपादनात् एकादशी जयन्तीवा यदिस्यात्तादृशेदिने स्नानदानादिकं कर्म परेद्युश्चोदितं खलु - इति गौतमाद्युक्तरीत्या - द्वादश मासोत्सवे, भृगुः श्रुतिस्मृत्यादि विहितोर्ध्वपुण्ड्रधारणसमये श्रीपादतीर्थ स्वीकरण, संध्यावन्दन, आचमनादाविव - परस्मिन्दिने - एकादश्यु-पहतश्राद्धकरण पूर्वक पारणानुष्ठानवत् - पारिशेष्यात् - जयन्त्या-मुपोष्य - रात्रौ भगवदाराधनं कृत्वा - गोष्ठीतीर्थविनियोगानन्तरं - भगवत्तीर्थ श्रीपादतीर्थमात्रस्वीकारं कृत्वा परस्मिन्दिने — श्राद्धात्मकतदीयाराधनं कृत्वा प्रसाद प्रतिपत्त्या, पारणे कृते — न कोपिदोषगन्धः इति चिरोपासित त्रैविद्यवृद्धा महान्तः वदन्ति। श्रीपांचरात्रोक्तरीत्या श्रीवैष्णवानां कृष्णाष्टम्यां उपवासो नानुष्ठेयः अतः कृष्णाष्टम्यां श्राद्धात्मकतदीयाराधन करणे न दोषः श्रवण द्वादशी व्रतोपवासः श्रीवैष्णवैः काम्यत्वान्नानुष्ठेयः-तत्र प्राप्त श्राद्धात्मक तदीयाराधनकरणे नदोषः - एतत्प्रमाणानि क्रमेण निरूप्यन्ते - जयन्तीश्राद्धखण्डनग्रन्थे - श्रीकृष्णजयन्त्यां श्रीकृष्णाष्टम्यां च पित्रादि श्राद्धप्राप्तौ - श्रीवैष्णवानां कथमनुष्ठानं तत्तत्संहितोक्तारा-

धनादिक्रमेषु तत्तत्स्थानेषु तत्तत्संहितानुसारेण तत्रतत्र स्थितैः श्रीवैष्णवैः तयोरुभयोरपि यथोचितं व्यवस्थयोपोष्यत्वात् — उपवासाकरणे प्रत्यवाय श्रवणात् - पारणाया अपि तेषां रात्रावेव कर्तव्यत्वात् - रात्रौश्राद्धनिषेधेन तद्वेळायां च तस्याननुष्ठेयत्वात् - ग्रहणादिष्विव विशेषवचनाभावात् पितृसेविताघ्राणपूर्वकोपवासस्यापि - तत्रावचनसिद्धत्वात् - परेद्युःश्राद्धविधायकवचनाभावाच्च । अथापि परेद्युः श्राद्धकरणे, मृताहंसमतिक्रम्येत्यादि दोष प्रसंगाच्च - बुद्धिपूर्वकातिक्रमदोषश्रवणाच्च - तथाहि नारदीये - जन्माष्टमी जयन्ती च द्विविधा परिकीर्तिता - कृष्णपक्षेऽष्टमीपूर्ण श्रावणेरोहिणीयदि - जन्माष्टमीसाविज्ञेया उपोष्या कृष्णतुष्टिदा श्रावणमासि संप्राप्ते कृष्णपक्षेऽष्टमीयुता संपूर्णारोहिणीयुक्तासाजयन्तीतिकीर्त्यते एवं जन्माष्टम्यास्तिथिप्राधान्यम् । जयन्त्यां नक्षत्रप्राधान्यं चावगम्यते तत्र च श्रीवैखानस संहितानुसंहिताराधनादिक्रमे - श्रीवेङ्कटगिरौ श्रीवैखानससंहितानुसंहितानुसारेण शुद्धजन्माष्टम्यां श्रीपाद्मसंहितोक्तक्रमाराधनादिकायां कांच्यां तादृशसंहितानुसारेण जन्मरोहिण्यां - श्री पारमेश्वर संहिताभिसंहित समाराधनादिके श्रीरङ्गे–तत्संहितानुविधानेन उभयोरपि वेधराहित्यप्राधान्येन अन्यदेशेष्वपि तदनुसारेण तथैवोपवासानुष्ठानं दृश्यते - तथाजन्माष्टम्यां उपवासाकरणे प्रत्यवायश्च स्मर्यते - येनकुर्वन्तिजानन्तः कृष्णजन्माष्टमीव्रते तेभवन्तिनराःपार्थ व्याळाव्याघ्राश्चकानने - तथा गृध्रं मत्स्यंखगं काकं श्येनश्चमुनिसत्तम - मांसंवाद्विपदां भुङ्क्ते–कृष्णजन्माष्टमीदिने । प्राप्ते येन भुक्तं द्विजोत्तम त्रैलोक्यसंभवंपापम् तेनभुक्तं द्विजोत्तम भविष्योत्तरे । श्रावणी बहुळे पक्षे कृष्णजन्माष्टमीव्रते - न करोति नरोयस्तु भवन्तिक्रूर राक्षसाः- कृष्णजन्माष्टमींत्यक्त्वा योन्यत् व्रतमुपासयेत् - नाप्नोति सुकृतं किंचित् इष्टापूर्त्तमथापिवा ।

तथा-वर्षे वर्षे तु यानारी कृष्णजन्माष्टमीव्रतम् । न करोति नरोयस्तु व्याळी भवति कानने। पटन्तीह पुराणानि भूयो भूयो महामुने। अतीतेऽनागते काले वर्षमेकोत्तरंशतम् पतन्ति नरके घोरे भुंजानाः कृष्णवासरे-इत्यादिभिः तथा जयन्तीमधि कृत्यकस्मिंश्चित्पुराणे-अकुर्वन् याति नरकं यावदिन्द्रश्चतुदशेति-स्कान्दपुराणेऽपि शूद्रान्नेनतुयत्पापं - शवहस्तस्थभोजने तत्पापम् लभतेकुन्ति जयन्त्यां भोजनेकृते। ब्रह्मघ्नश्च सुरापश्च गोवधेस्त्री-वधेपिवा न लोकौ द्विजशार्दूल जयन्तीविमुखस्य च-तथा न करोतियदाविष्णोर्जयन्तीसम्भवव्रतम् यमस्यवशमापन्नस्सहते नारकी व्यथां जयन्तीवासरेप्राप्ते करोत्युदरपूरणम् सपीडयतेऽतिमात्रन्तुयमदूतैः कळेवरम् जयन्तीवासरेप्राप्ते करोत्युदरपूरणं भिद्यते, तिलशः कुक्षिः यमदूतैस्सहस्रशः। योभुंजीतविमूढात्मा जयन्तीवासरे नृपेति—तथा कृष्णावतारकाले तु व्याप्तां- सर्वाघनाशिनीं जयन्तींयस्त्यजेत् मोहात् सर्वाभीष्टफलप्रदां तस्यायुः श्रीश्चपुत्रश्च विनश्यन्तिन संशयः न संशयः इत्यादि, तथा उपवासदिने श्राद्धं निषिध्यते-यथा एकादश्यान्तु संप्राप्ते मातापित्रोर्मृतेऽहनि द्वादश्यान्तत्प्रदातव्यम्, नोपवासदिने क्वचित् इति तथा एकादश्यां यथा भूप मृताहो यदि तत्पुनः द्वादश्यान्तत्प्रदातव्यम् नोपवासदिने क्वचित्-अत्रएकादश्यां मृताह-प्राप्तौ तत्श्राद्धं द्वादश्यां प्रदातव्यमित्यनेनैव-एकादश्यां न दातव्यमित्यर्थतस्सिद्धेऽपि श्राद्धाकरणे प्रयोजकशिक्षणाय नोपवास दिने क्वचिदित्युक्त-ततश्च एकादश्यां प्राप्त पित्र्याकरणे-एका-दशीत्वमात्रं न प्रयोजकम् तथासति विद्धैकादश्याः परेद्युर्वृद्धि-गामिन्याः शुद्धैकादश्यामपि पित्र्याकरणे प्रयोजकत्वप्रसंगात् अतः उपवासदिनत्वमेव तत्रपित्र्याकरणप्रयोजकम्-द्वादश्यामित्यपि पारण दिनोपलक्षकम्-तदेवोक्तम्-धर्मसेतुनिबन्धे-एकादशी, द्वादशी–

शब्दौ - एकादशीव्रतसंबन्ध्युपवसादिन, पारणदिनोपलक्षकावित्या - दिना - नन्वेवं अजहल्लक्षणया - एकादश्युपवास तत्पारणदिनमात्रो पलक्षकस्यात् नस्यात् क्वचिदित्युक्तः- क्वचित् - क्वचित् अप्यु - पवासदिने नदातव्यमित्यर्थः- किञ्च एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि अनेन विधिवाक्येन - तत्र श्राद्धं परेहनीत्यत्र- अनेन विधिवाक्येन - इतिहेतुकरणात् - यत्र उपवासविधिः तत्र सर्व-ः अनेनैवन्यायेन श्राद्धं न कर्तव्यमितिव्यज्यते अतएव, बृहत्प्रचेताश्र द्वादश्यामुपवासश्चेत् श्राद्धन्तत्र विसर्जयेत्, परेहनितु कर्तव्यम्- तच्चाशौचान्तवत् स्मृतम् - तत्रश्राद्धन्नकर्त्तव्यं अन्नाद्यस्यविगर्हणात् - दातुः प्रतिग्रहीतुश्च निन्द्यत्वात्याज्यमुच्यते - इति इदन्तु वचनम् द्वादश्यामेकादश्युपवासे द्वादशि श्राद्ध निषेधपरमपि - उपवास दिनान्तरेपि तन्निषेधोपलक्षकम् - एकादश्यां श्राद्धनिषेधस्य द्वादश्या मपि संचारात् - अतः श्रीजयन्त्याअपि श्रीवैष्णवानां उपवासदिन- त्वात् तत्रपित्र्यम् न कर्तव्यम् इति ।

न चात्र तत्र श्राद्धं परेहनि - परेहनि तु कर्तव्यम् इत्याद्यनुसारेण अत्रापि परेद्युः श्राद्ध कर्तव्यता उपवासश्चेत् श्राद्धं तत्र विसर्जयेत् इत्युपवासस्यैव - श्राद्धविसर्जने प्रयोजकत्वोक्त रात्रौ पारणाभ्यनुज्ञाने च उपवासपरिसमाप्त्या तन्निवृत्तेः— पारयतेः कर्मसमाप्त्यर्थकत्वात् - पारतीर कमससमाप्ताविति धातुः-- तथा तेषां रात्रौपारणा च दशनिर्णयादिषुविशदं स्थापिता इति तत्रैव । तथा च रात्रौ श्राद्धं निषिध्यते । ग्रहणादिव्यतिरेकेण - व्याघ्रपादः - विधिज्ञः श्रद्धयोपेतः सम्यक्पात्रे नियोजकः— रात्रेरन्यत्रकुर्वाणः श्रेयः प्राप्नोत्यनुत्तमम् शंखः - पूर्वाह्णेदैविकंकार्यं अपराह्णे पितृक्रिया ग्रहणे निशिवाकुर्यात् न रात्रौ पैतृकंपुनः

शातातपः - रात्रौ श्राद्धं न कुर्वीत राहोरन्यत्र दर्शनात् - सूर्योदय-मुहूर्तेवा संध्ययोरुभयोस्तथा मनुश्च रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिताहिसा संध्ययोरुभयोश्चैवसूर्येचैवाचिरोदिते संध्यारात्र्योर्न कर्तव्यम् श्राद्धं खलु विचक्षणैः तयोरपि च कर्तव्यं यदिस्या-द्राहुदर्शनम् - इत्यादि तथा पितृ सेविताघ्राणपूर्वक उपवास - परेद्यु श्राद्ध कर्तव्यतापरवचनन्नात्रदृश्यते - तथा च - मृताह समतिक्रम दोषाच्च - यथा कालनिर्णये आब्दिक श्राद्धपरित्यागे प्रत्यवाय बाहुल्यस्मरणात् तथा भविष्यत्पुराणे प्रवासखण्डयोः पठ्यते मृतेऽहनि पितुर्यस्तु न कुर्यात् श्राद्धमादरात् - मातुश्चैव वरारोहे - वत्सरान्ते मृतेहनि - अन्यत्रापि सयाति नरकंघोरं तामिस्रं नाम नामतः - हारीतः प्रत्यब्दम् पार्वण श्राद्धं कुर्यात्पित्रोर्मृतेहनि — अन्यथा वैष्णवो याति ब्रह्महत्याम् न समृशयः। अन्यत्रापि - पण्डिता ज्ञानिनोवापि - मूर्खा योषितएववा मृताहम् समतिक्रम्य चण्डालः कोटिजन्मसु अज्ञानादथवा ज्ञानात् मृताहं यस्त्वतिक्रमेत् शूद्रोवापि द्विजोवास्यात् चण्डालः कोटिजन्मसु तथा भोजको यस्तुवैश्राद्धं न करोतिखगाधिप माता पितृभ्यांसततम् वर्षेवर्षेमृतेहनि मृताहम् समतिक्रम्य चण्डालेष्वभिजायते इत्यादिबुद्धि - पूर्वातिक्रमेमहान्दोषः पित्रोर्मृततिथिंज्ञात्वायोनकुर्वीतपैतृकम् पापोच्च-यमवाप्नोति पितृहाचोपजायते - कार्ष्णाजनिः — ऊषरेतुयथाक्षिप्तं - बीजन्तु न प्ररोहति - तथाचतद्भवे तेषां यन्नदत्तम् मृतेहनि — इत्यादि अतोजयन्त्यां रजनी पारणेन निषेधतः परेद्युर्विधे श्राद्धं वैष्णवेष्विहविप्लुतम् - परेद्यु श्राद्धकरणाद्रात्रावप्यनिषेधतः श्रीवैष्णवेषु श्राद्धस्य - नेहकाचन विप्लुतिः - तथाहि - अत्र उपवास वेलायां - रात्रौ पारणवेलायां च श्राद्ध निषेधे - पारिशेष्यात् — परेद्युः श्राद्धं कर्तव्यं इति प्राप्तम् - न च उपवासकर्मसमाप्तिरूप

पारणायांसत्यां उपवासविरुद्धकालशेषेऽपि श्राद्धकरणे मृतेहनीत्यादि प्रत्यवायप्रसंगः ऐच्छिकातिक्रमे . तेषांवचनानां प्रत्यवायपरत्वेन विधितोतिक्रमे तत्प्रसंगाभावात्। अन्यथा - आशौचादावपि, विधित-श्राद्धातिक्रमे तादृश प्रत्यवाय प्रसंगेन तत्रापि पित्र्य कर्तव्यताप्रसंगात्। न चात्र परेद्युः श्राद्धकर्तव्यतापरवचनाभावः। श्राद्धं तत्र विवर्जयेत्। परेऽहनि तु कर्तव्यं तच्चाशौचान्तवत् स्मृतमित्यादि वचनस्यैव तत्परत्वात्। अत्रहि यत्रोपवास प्रयुक्तं वचनान्तर प्रयुक्तं वा श्राद्ध-विवर्जनम्। तत्रस्थ कालातिक्रमेण कर्तव्य श्राद्ध लोप प्रसक्ते यत् परिहाराय परेऽहनि तु कर्तव्यमित्यभ्यधायि। अत एव तच्चाशौ-चान्तवत् स्मृतमित्युच्युत इति।

अत्र ग्रन्थेः - जन्माष्टमि जयन्ति लक्षण तदनुष्ठात् विभाग तदुपवास पारणा कालनिर्णय तदधिकार्यादि निरूपणपूर्वकं शङ्का - समाधान पूर्वकं जयन्तीव्रतदिनप्राप्त श्राद्धात्मक तदीयाराधनस्य परस्मिन् दिने कर्तव्यत्वं तदनन्तरं पारणा कर्तव्यत्वं च मुख्यतया-सिद्धान्तितम्। निबद्धान्तरे रात्रिश्राद्धाकरणाभ्यनुज्ञानं सुधीभिः तत्पूर्वोक्त वचनानुगुण्येन यथायोग्यं नेतव्यं। तत्रैवग्रन्थे श्रीवैष्णवैः श्री-कृष्णाष्टम्या अर्धरात्रव्याप्तनियमनाङ्गीकारत्वात्। अतोऽत्र श्रीरामनवमी श्रीनृसिंहजयन्त्योरेकादशी श्रीजयन्त्यादिष्विव वैष्णवावैष्णवाधि-कारि भेदेन उपवास प्रकार दर्शनाभावात्। वैष्णवेतराधिकारलिङ्ग भूयस्त्वाच्च अधिकार्यन्तर विषयत्वमिति स्फुटम्। अतोऽत्रापि प्राप्तं पित्र्यकरणमविरुद्धमिति।

अत्र कृष्णाष्टम्यां - अधिकार्यन्तर विषयत्वम्। तत्र प्राप्त-श्राद्धात्मक तदीयाराधन कर्तव्यत्वं च प्रतिपादितं॥ सच्चरित्र परित्राणे श्रवण द्वादश्याः काम्यत्वं पूर्वरुक्तं। इतिहासोत्तमे-भानुवार-

समोपेता तथा संक्रान्ति संवृता। श्रवणद्वादशीचैव क्रतुकोटिफलं भवेदित्युपक्रम्य फल विशेषश्रवणात् काम्यत्वं स्फुटमित्यादिना। अतः तत्रोपवासाभावात् श्राद्धकरणं युक्तं। इति अत्र श्रवण द्वादश्याः काम्यत्वं तत्र प्राप्त श्राद्धात्मक तदीयाराधन करणीयत्वं च प्रतिपादितं। अतः श्रीवैष्णवैः जयन्ती व्रत दिन प्राप्तं श्राद्धात्मक-तदीयाराधनं परदिन एव करणीयमिति सिद्धम्॥ इति सदनुष्टान दर्पणे जयन्त्यां श्राद्धाकर्तव्यत्व विषयो नाम द्वाविंश प्रतिफलनम्॥

तीर्थ दिवसव्यवहार तद्दिन कर्तव्य प्रकार विषये प्रमाणम्।

प्रपन्नाः श्राद्धं तदीयाराधनमिति व्यवहृत्य द्राविड वेद-पारायण पूर्वकं निमन्त्रित श्रीवैष्णव श्रीपादद्वय तीर्थग्रहण पूर्वकं तीर्थ प्रसादादीन् प्रतिपत्त्या स्वीकुर्वन्ति। तदुपपन्नमेव वचना-च्छिष्टाचाराच्च। तदुक्तं सच्चरित्र परित्राणे। तदीयाराधनं नित्यमेव कर्तव्यं तस्यवैष्णव लक्षणत्वात्। तदाह भरद्वाजः विष्णोर्दास्यैक फलतेत्यारभ्य। तदीयाराधने रतिरित्याद्युक्त्वा। इत्येतैः लक्षणैर्युक्ता वैष्णवा इति। वासिष्ठसंहितायां। शङ्खचक्रोर्ध्व पुण्ड्रादि-धारणमित्युपक्रम्य। तदीयाराधनश्चेति। गुणैरेतैर्विहीनस्तु न विप्रो न च वैष्णवः। इति च। अतिथि पोष्यवर्ग पितृप्रीणनमपि तदीयाराधानात्मकत्वेनैव कर्तव्यं। उत्तमाश्रमिणामपि परमैकान्तिनां लक्षणभूतत्वात् तदीयाराधनं अवश्य कर्तव्यं। तच्च गृहस्थोपानीतैर्वस्तुभिश्चातुर्मास्यादि ब्राह्मणभोजनादिवदविरुद्धम्। अनुयागश्च तदनुबन्धेनैवकार्यः। तदीयाराधनार्थं कृतेन नान्तरीयकतया स्वदेह-धारण सिद्धेः। गुरुवचनेनचैकान्नभोजनमपि शास्त्रानुमतम्। धर्म-वृद्धये एकत्र नियत वासानुज्ञानवत्। विष्णुधर्माभिवृद्धये माठपत्यादिकं शास्त्रानुमतम्। यथा - पराशरसंहितायां माठापत्यं यतिः कुर्याद्विष्णु-

धर्माभिवृद्धय इत्यादि एवञ्च । अपि चास्य कुतो दानं दत्वा चास्य कुतः फलं । दाता प्रतिग्रहीता च प्रेत्यैव नरकं व्रजेत् । यत्पत्रं यद्पिात्रस्थमित्यादिकं अवैष्णव यति विषयं तदीयारधनेनविना भिक्षितान्नस्य कामतो दानविषयं चेति लब्धम् । अतो यथा संप्रदाय-मुत्तमाश्रमिणां अपि तदीयाराधनमुपपन्नम् । ब्रह्मचारिणोप्याचार्य-त्वावहनीयार्थे इत्यादिना विहितो नित्य यज्ञः परमैकान्तिनः तदी-याराधन रूपत एव कार्यः । अवैष्णवाद्वेदोपयोगस्तु विद्यार्थस्संप्रयो-गोपीत्यादिना भरद्वाजेन निषिद्धः । अतो ब्रह्मचारिणः नित्ययज्ञस्तदी-याराधनं भवति । इदं च तदीयाराधनं भगवद्याग प्रतिपत्तिरूपमपि भवतीति । तत्रैव - प्रतिपत्तिरूप युक्तस्य संस्कारः । कृतार्थमपि तु द्रव्यमाकीर्णकरं इस्यतः । प्रतिपत्तिमपेक्षेत तद्विधानमतोवरमित्युपयुक्त-संस्कार कर्मणि मीमांसकानां प्रतिपत्तित्वव्यवहारात् । मितभोजनस्य भगवद्याग शिष्टान्नप्रतिपत्तिसंस्कारत्वञ्च । भगवद्भुक्तशेषं यद्भुक्तं भागवतेन यत् । तदेवभोज्यं उद्दिष्टं भगवद्याग सेविभिरिति । शाण्डिल्य-वचने भुक्तशेष प्रातिपदिक कर्म प्रत्ययाभ्यामवगतं । प्रयाज शेषेण हवींष्यभिधारयतीत्यत्र प्रयाज शेषप्रातिपदिकानुरोधेन तृतीया-श्रुति मप्यनादृत्य अभिधारणस्य प्रतिपत्तित्वमाश्रितं । अक्रतुकर्मप्रत्ययोर्षिकं इति प्रतिपत्तित्वमविवादम् ॥ अविदुषो भोजनमग्निहोत्रवत् फलार्थं । उपवासकस्य भोजनं वैश्वानरविद्यादि ब्रह्म विद्याङ्गम् । परमैकान्तिनां देहधारणमात्रार्थमितभोजनं तु भगवद्यागप्रतिपत्तिरिति तत्तद्विधिभिरव-गम्यते । प्रसाद प्रतिपत्तिरनुयागश्च नार्थान्तरम् । तस्य भगवदाराधन समाप्तित्वञ्च अनुयाज वैमृधवदनुशब्देनावगतः । अष्टाङ्गस्य च भगवद्यागस्य अनुयागोऽष्टममङ्गमित्युक्तम् जयाख्य संहितायां । प्राणाग्नीहवनं नाम्नात्वनुयागं तदष्टममिति । आसनाद्यनुयागान्तमर्चनं यत्कृतं मयेति जितन्तावचानाच्चानुयागस्य

चरमाङ्गत्वमुक्तम्। चरमाङ्गमेवहि समाप्तिः। बुद्धि विशेषश्च शाण्डिल्येनोक्तः। आचार्यस्य पितुश्चैव स्वामिनो द्रव्यमेव च। शिष्यः पुत्रस्तथादास इति तद्भोक्तुमर्हतीति।

अत्रेदमवधेयम्। भुक्तशेषमिति प्रतिपदिकम् भुक्तमिति कमबोधक प्रत्ययः। प्रयाज शेषेणहवींष्यभिघारयतीत्यत्र प्रयाज शेषं हविष्षु अभिघारयेदित्यर्थः। भागवत भुक्तमिति कर्मप्रत्ययः अधिकः। अनुयाजं उत्तराङ्गम्। तद्वत् तदीयाराधनमुत्तराङ्गम्। वैमृधं इष्टिः। संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपेदित्यत्र वाक्ये अनुइत्यनेन वैमृधेष्टेः उत्तराङ्गत्वं प्रतीयते इति। तथा श्रीमल्लोक गुरुभिः श्रीवचनभूषणमीमांसायां - देहधारण परमात्म समाराधन समाप्ति-प्रतिपत्तित्व बुद्धि विशेषः इत्यनुगृहीतम्। सच्चरित्रपरित्राणे अनेन श्रीवैष्णव तदीयाराधनेन भगवानित्यादि व्यपदेशोपपत्ति निरूपणस्थले-तदीयाराधनस्य नित्यत्वात् तेन श्राद्धं तन्त्रं भवति। तदीयाराधनस्य नित्यत्वम् पराशरेणोक्तम्। तदीयाराधनं पुण्यं वक्ष्यामि मुनि सत्तम। इत्युपक्रम्य विस्तरणोक्त्वा। एवं संपूजयेन्नित्यं यावज्जीवमतन्द्रितः इति। अत्रच-अहन्यहनियच्छ्राद्धं श्राद्धं यच्च कृतेऽहनि। तन्नित्यमुदितं श्राद्धं श्राद्धं यच्च महाळये। इत्युक्त नित्यश्राद्धस्य नित्यत्वं प्रायिकं दृष्टमिति तद्वत् प्रायिक नित्यत्व व्युदासाय यावज्जीवमिति। तथा च विध्यनुसारेण संकल्पादौ निर्देष्टव्यत्वेन विध्युद्देशगतः तदीयाराधन शब्दनिर्देशः। क्वचित् श्राद्ध शब्देनापि विधिदर्शनात् अद्यास्मिन् प्रत्याब्दिक श्राद्ध इत्यपि निर्देशः। नित्यतदीयाराधन श्राद्धयोस्तन्त्रत्वेन संकल्पादावुभयनिर्देशस्य न्याय्यत्वात्। तत्रचादौ श्राद्धशब्देन अन्ते तदीयाराधनशब्देनच निर्देशः क्रियते। विशेषतश्च - गुरूणामन्तिमतिथौ जन्मभे श्रवणेऽपिवा। हरिमभ्यर्चयेद्भक्त्यातद्भक्तांश्च विशेषत

इत्यन्तिमतिथौ तद्भक्तानर्चयेदितिविधानात् प्रत्याब्दिकादौ तदीयाराधन शब्दनिर्देशः । एवं प्रत्याब्दिकस्य विशेष विधिविहितस्य अनुष्ठानेन ज्ञानिनोऽज्ञानिनोवापि मूर्खः पण्डित एववा। मृताऽहंसमतिक्रम्य चण्डाळ कोटिजन्मस्वितिविध्यतिक्रमस्याप्यनवकाशः इति । तस्यैवं विदुषोयज्ञस्यात्मारभ्य यन्मरणं तदवभृथ इतिश्रुतौ भागवत चरम विग्रह विमोकस्य अवभृथत्वं प्रतिपादितम् । क्षणकृत्यमान आत्मसमर्पण यागக்குக்கு भगवत्संकल्पसाध्यமான देहावसानमे अवभृथं इति । आत्मसमर्पणरूप यागस्य देहावसानं अवभृथम् भवतीति श्रीमन्निगमान्त गुरुभिः रहस्य रत्नावल्यां अनुगृहीतम् । कुर्यादवभृथ-क्रियामिति वचनम् । अथावभृथेऽष्टिं व्याख्यास्यामइति सुधीविलोचनम् । अवभृथत्वादिकमुक्तं सच्चरित परित्राणे भागवतानां प्रयाण समये विशिष्ट देशाद्यनपेक्षत्वादि विषय निरूपण प्रकरणे - तदाह भरद्वाजः नखल्वपि दशा देशकालहेतु विपर्ययैः । प्रवक्तुस्त्यक्त देहस्य परायात्राविहन्यत इति । दशा विपर्ययः शुद्धि विरहादिः । देश विपर्ययः चण्डाळ वाटिकादिः । कालविपर्ययः दक्षिणायनादिः हेतुविपर्ययः विषशस्त्रोद्बन्धनादिः । परायात्रा श्रीवैकुण्ठयात्रा । न विहन्यते न प्रतिबध्यते । अनेन दुर्मरणदोषः प्रपन्नस्य व्यावर्त्यते । तदेव च प्रपन्नस्यौर्ध्वदेहिकं कार्यं । तदाह भरद्वाजः - अथेह बान्धवास्तस्यगतस्य परमाङ्गतिम् । वैष्णवा-स्त्वभिनन्देयुः पुण्यामवभृथक्रियामिति । अत्राथ शब्देन दुर्मरण प्रयुक्तं भासत्रयादि व्यवधानं व्यावर्त्यते पुण्यामिति परम पावनत्व-मुच्यते । अवभृथ शब्देन च तद्विषयस्नानस्य अपस्नानत्वं व्यावर्त्यते । चण्डाळ शव धूमादि स्पृष्टेत्यविशेषेण शवस्पर्शे दोष उक्तः । तथापि यत्तु ब्रह्मविदात्यक्तमपि तन्मङ्गळं वपुः दृष्ट्वास्पृष्ट्वाऽपिमुच्येत ब्रह्महा ब्रह्महत्ययेति ब्रह्मविद्विषये तदपवादात् । तद्विग्रहस्य पावनत्व-

मुच्यते। अत एव सुधीविलोचने प्रेतोपस्पर्शने दशरात्रमित्यादिना-शवस्पर्शदर्शनादौ गौणमादिभिर्दोषस्मरणेऽपि पूरुषविशेषस्य देह-त्यागस्य अवभृथत्व श्रुतेरित्यादिकमुक्तम्। अत एव च क्षौमादिषु गैरिकाऽनुलिप्त तत्पादद्वयप्रतिकृतिं तद्दशायां गृहीत्वा नित्यमेव शिरसाधारयन्तिशिष्टाः। अभिनन्देयुरित्यनेन अश्रुपातादिकं प्रतिषिद्धम्। स्मर्यते च-तनुत्यजं न शोचेत स्वजनं वैष्णवोजनः इत्यादि। क्रियतेचास्य पुत्राद्यैर्यत् किमप्यौर्ध्वदेहिकं। तत्सर्वं प्रियभक्तस्य विष्णोः प्रीतिकरं भवेदिति। भरद्वाजेन प्रपन्नविषयौर्ध्वदेहिककरणस्य-कर्तृणां भगवन्मुखोल्लासार्थत्वमुक्तम्। नह्यनेनप्रपन्नस्य कश्चिदति-शयोऽस्ति। प्रपत्तेः क्वचिदप्येवंपरापेक्षा न विद्यत इति स्मृतेः। यदुचैवास्मिन्छव्यं कुर्वन्ति यदु चनतेर्चिषमेवाभिसम्भवन्तीति श्रुतेश्च तदनपेक्षावगमात्। एवश्चैतद्विषये संस्करिष्यामीत्यप्रपन्न विषय संस्कार साम्यात् गौणम्। शुद्धागमोऽपि मुख्य प्रयोग प्राप्तो गौणेऽपि न निवर्तते। यथा गङ्गायांघोष इत्यत्र तीरलक्षणाया-मपि स्त्रीत्वम्। पुत्रादिभि क्रियमाणस्य और्ध्वदेहिककरणरूप-भगवत्कैङ्कर्यस्य केवलभगवदर्थत्व निष्कर्षात् फलस्य कर्तृगामित्वा-भावेन। अहं सर्वं करिष्यामीतिवत् परस्मैपदमुपपन्नम्। वैष्णवस्याङ्क-शय्यायां वैष्णवस्य गृहेऽपि वा देशे वा तद्विचरिते संस्थितायान्ति सद्गतिमिति भरद्वाज परिशिष्टवचनं त्वकृतप्रपत्तिकानामपि वैष्णवाङ्का-द्यनुबन्धेन मोक्ष प्राप्ति परं ननु प्रपन्नस्य विशिष्ट देशापेक्षत्वपरमिति न खल्वपि दशा देशेत्यादि पूर्वानुसाराद्वगम्यते। मरण निमित्तं-त्वाशौचक्षौरकर्मतिलोदकदानादिकं जात्यादीनामपवादकाभावादाव-श्यकम्। न तु मृतस्य तेन प्रयोजनं किञ्चिदस्ति। कर्त्रादीनान्तु भगवन् मुखोल्लासार्थत्वादावश्यकम्। अत एव ब्रह्माण्डपुराणेऽपि अशुभान्ते विशेषेण द्रामिडीब्रह्मसंहिता। अध्येतव्या द्विजवरैराशौचाद्यविनाशिनी-

स्याशौचादिकं व्यञ्जितमिति । पूर्वोक्ताह्निकग्रन्थे:- विष्णु याग மான த்வஜாரோஹண उत्सव த்தில் चरम दिन த்தில் अनुष्ठेय மான अवभृथ த்துக்கு தீர்த்தமென்று பேராணப் போலே तस्यैवं विदुषो यज्ञस्यात्मा यजमान: என்று தொடங்கி यन्मरणं तदवभृथ: என்னுமளவாக श्रुतिसिद्धमान आत्म யாகத்தைப்பண்ணியிருக்கும் न्यास ब्रह्म विद्यानिष्ठனுடைய उत्क्रमण दिवस த்துக்கு अवभृथं என்று श्रुति சொல்லுகையாலே இந்த चरमदिन த்துக்கு தீர்த்தமென்று பெரியோர்கள் அருளிச் செய்யுமர்த்த விசேஷமிருக்கும்படி.

अत: तदीयाराधनात्मक श्राद्धं तीर्थदिनमिति वक्तव्यम् । किञ्च श्राद्ध पूर्वदिनरात्रौ श्राद्धदिने च द्राविडवेदाध्ययनारम्भ पूर्वकं तत्समापनं द्राविडवेदाध्येतृणां श्रीपादतीर्थग्रहणमपि कर्तव्यम् । अतएव श्रीमदध्ययन दिवसमिति शिष्टव्यवहार: । तत्र प्रात:काले गुर्वादीनां तीर्थदिनं भवद्भि: श्रीपादतीर्थं दातव्यं अनुग्रह: कर्तव्य: इति वरणं कर्तव्यम् । श्रीपादतीर्थग्रहणादिकमुक्तं सच्चरित्र-परित्राणे । देवो यदि पिता जात इत्यादि मात्स्योक्त वचनन्तु प्रमीतस्य स्वकर्मानुगुणं देवपशुनागादि भावेश्राद्धान्नस्यामृततृण वाय्वादि रूपत्वमधिष्ठात्र वस्वादि प्रीणत्वंच मुमुक्षु विषये न सम्भवति तस्य मुक्तत्वात् । अत एवहि भरद्वाज: - क्रियतेचास्य पुत्राद्यैर्यत् किमप्यौर्ध्व देहिकम् । तत्सर्वं प्रियभक्तस्यविष्णो: प्रीतिकरंभवेत् ॥ गुरूणामन्तिमतिथौजन्मभे श्रवणेऽपिवाहरिमभ्यर्चयेत् भक्त्या तद्भक्तांश्च-विशेषत: इति । गुरुशब्द: पितॄणां आचार्याणां च वाचक: । पुत्राद्यैरित्यादिशब्द:शिष्यादिपर: । अन्तिमतिथि: प्रत्याब्दिकमृत-तिथि: । जन्मभं गुरूणां अवतार नक्षत्रम् । तद्भक्तार्चनं तदीया-राधनम् । विश्वेदेवादि शब्दैर्वरणं च लोकानुगत्यर्थं क्रियते । प्रपन्नकर्तृक श्राद्धे विश्वेदेवादि शब्दानामव्यवधानेन भगवत्

परत्वाश्चपारमैकान्त्यहानिः। अत्र च निमन्त्रितानां पादोदकग्रहणमपि तस्य नित्यत्वात् श्राद्धेतन्त्रं भवति। यथाह भरद्वाजः—नित्यमच्युत भक्तानां कुर्यात् पादावनेजनं। तत्तीर्थमुवयुञ्जीतमहापातक नाशनमिति। तदीयाराधने पराशरः-तत्तीर्थमुपयुञ्जीत पुत्रदार सुहृज्जनैरिति। भृगुसंहितायां:—श्राद्धे निमन्त्रयेद्विप्रान् विष्णुचक्राङ्कितान् शुचीन्। पञ्चकालरतान् सम्यक् भूषणाद्युपचारकैः। संपूज्य विधिवत्तांस्तु श्राद्धकर्ता भुजेत्परम्। विसर्जनात्प्राग्विधिवत् तान् प्रणम्याभिवाद्यच। तेषां पादोदकं प्रार्थ्यगृह्णीयात् पितृपूर्वकम्। सौवर्णे राजते ताम्रे मृण्मये नारिकेळके। पात्रेतु पत्र पुटके गृह्णीयान्नेतरेजलम्। अङ्गुष्ठंक्षाळयेदादावित्यादिना श्राद्धे श्रीपादतीर्थग्रहणमुक्तम्। भगवच्छास्त्रेः - मातापित्रोर्मृताहेच गुरूणां जन्मभे तथा। श्रीपादतीर्थंगृह्णीयाद्भुक्त्यनन्तरमेव हि। भुक्तेः पूर्वन्तु गृह्णीयादिति। अत्र च मातापित्रोर्मृताहे भुक्त्यनन्तरं गुरुणां जन्म नक्षत्रे भुक्तेः पूर्वमितिक्रमान्वयोऽनुसंधेयो यथा संख्यन्यायात्। तथा च नित्यतीर्थस्य श्राद्धीयतीर्थस्य च तन्त्रं भवति। तदीय भुक्त शिष्टान्नभोजनस्य नित्यत्वात्। तदपि श्राद्धशिष्टभोजने तन्त्रं भवति। तस्य च नित्यत्वं भवति। तस्य च नित्यत्वं श्रीविष्णुधर्मोत्तरे भोगैरिष्टैश्च शास्त्रीयैस्तोषयेद्वैष्णवान् गृहे। त्रिविधत्यागपूर्वन्तु शेषत्व ज्ञानवृद्धये। भुक्तवत्सु तथा तेषु शेषं भुञ्जीत सात्त्विक इत्युक्तम्। शेषमिह भाण्डस्थं। अन्यदा तु भुक्तिपात्रस्थमितिविशेषतः। अतः प्रदक्षिणमनुव्रज्य भुञ्जीत पितृसेवितमित्युक्तम्। पितृशेष भोजनं भागवतभुक्तशेषभोजनं च श्राद्धे तन्त्रं भवतीति।

तत्रैव आब्दिकान्तं वैष्णवेतर विषये सपिण्डीकरणादूर्ध्वं प्रेतत्वस्य निवृत्तितइत्यादिना विशेष दर्शन विरहिणां तत् दृष्ट्या वैष्णव विषयेऽपि तदनुवृत्तिबुद्ध्यातेषामेषु समुदाचार विचिकित्सा-

माभूदिति एकोद्दिष्टप्रभृतिषु आब्दिकपर्यन्तेषु श्राद्धेषु निमन्त्रितानां पादोदकग्रहणं वर्जयन्तिशिष्टाः इति। अतः निमन्त्रितानां भागवतानां श्रीपादतीर्थग्रहणमनुष्ठेयमेव। तत्तीर्थ स्वीकरणमपि सर्वैः कार्यमेव। तदनन्तरंतदीयाराधनं कृत्वा प्रसादप्रतिपत्त्या स्वीकुर्यात्। नात्र प्रमाणाभावश्शङ्कनीयः। ब्रह्माण्डपुराणे शुभादौ द्विजवर्यैश्च सर्वसंपच्छुभावहम्! सहस्रशाखाध्ययनं कारयेद्वैदिकोत्तमः अशुभान्ते विशेषेण द्रामिडी ब्रह्मसंहिता। अध्येतव्याद्विजवरैराशौचाघविनाशिनी। इति। वृद्धावादौ क्षयेचान्ते द्रामिडब्रह्मसंहिता। अध्येतव्या द्विजश्रेष्ठैः आद्या गीतासहस्रका। इति भविष्यत्पुराणेः स्मृति सारसंग्रहाध्याये - अपर विधान प्रकरणे - पितृकार्यमिदं राजन् वक्ष्याम्यवहित श्रुणु। पित्रादीनाञ्चमरणे सपुत्रः पर्युपस्थिते। द्रमिडोपनिषद्गाथा गुम्भाध्ययनतोदृढम्। चूर्णयित्त्वावघातेन हरिद्रारेणुकदम्बकं। ब्रह्ममेधादिसंस्कारं कृत्वा पिण्डोदकक्रियाम्। सपिण्डीकरणान्तं च द्वादशाहान्तमादरात्। रात्रौ तद्दिवसेगन्धपुष्पाद्यैः वैष्णवान् बहून्। अलङ्कृत्यविशेषेण द्रामिडाम्नायपारगान्। कारयित्वाध्ययनं परम द्रामिडश्रुतेः। दत्वा परदिनेचेक्षु खण्डांस्तेषां च पाणिषु। संचारयित्वा रथ्यायां मण्डितायां सुतोरणैः। पूजयित्वाप्रतिगृहं पटास्तरण पूर्वकम्। प्रवेशयित्वास्वगृहंनानालंकार भूषितम्। तेषां भक्तयैव वित्तादि दत्वाशक्त्यनुसारतः। संपूजयेदिदं कार्यं पुत्रस्येति सुनिश्चितमिति। आदित्यपुराणे विशेष श्राद्ध विधान प्रकरणे पितुर्मृताहात् पूर्वेद्यूरात्रावध्ययनाद्विजैः। कार्याद्रामिड वेदस्य पितृ तृप्तिर्नचान्यथा। तदा तदनुसन्धानं कुर्वतामादरं सताम्। तेषां पादाङ्गुळिस्पर्शत्रिकपूर्वकमादरात्।

पारणायांसत्यां उपवासविरुद्धकालशेषेऽपि श्राद्धकरणे मृतेहनीत्यादि प्रत्यवायप्रसंगः ऐच्छिकातिक्रमे तेषांवचनानां प्रत्यवायपरत्वेन विधितोतिक्रमे तत्प्रसंगाभावात् । अन्यथा - आशौचादावपि, विधित- श्राद्धातिक्रमे तादृश प्रत्यवाय प्रसंगेन तत्रापि पित्र्य कर्तव्यताप्रसंगात् ।

बाहुभ्यां स्त्राहृतं पात्रे किंचित्कारपुरस्सरं ।
तीर्थं सुपावनं भोग्यं आद्यन्तनतिपूर्वकं ॥
त्रिवारं स्वीकृतंगोष्ठीनिष्ठैरार्यैर्महात्मभिः ।
पश्चात् त्रिवारं स्वीकृत्य स्वयं चाचार्यहस्ततः ॥
परेद्युस्तान् समाहूय श्राद्धकर्ताथवैष्णवः ।
शिष्टप्रबन्धाध्ययनं कारयित्वार्यकैर्मुदा ॥
तत्पादतीर्थमाहृत्य पात्रेनिक्षिप्य भक्तितः ।
निमन्त्रितानांविप्राणां भोजनानन्तरंद्विज ॥
तेषां पादोदकंपात्रे स्वयमाहृत्य तद्द्वयं ।
मिळित्वा विधिवत्पीत्वाकृतकृत्योभविष्यती"ति ।

ईश्वरसंहितायां —

"यस्तुद्रमिडवेदार्थवेत्तातस्यपदद्वयं ।
संक्षाळयित्वापादाम्बु पेयं मोक्षफलार्थिभिः" इति ॥

आदित्यपुराणे—

"नियुक्ते श्राद्धकालेतु द्राविडाम्नायपारगं ।
पितरस्तस्यपरमं विष्णोर्यान्तिपदंमहत ॥
श्राद्धभोजनकालेतु स्वशाखाद्रमिडश्रुती ।
पठनीयंद्विजैः विष्णुभक्तैः पितृमुदे दृढा" इति ।

वासिष्ठसंहितायां पंचमाध्याये—

"श्राद्धकर्म विधिवक्ष्ये श्रृणुध्वं सुसमाहिताः" इत्यारभ्य,

श्राद्धेऽहनितुसंप्राप्ते प्रातः स्नात्वाविधानतः ।
धृत्वावस्त्रद्वयंशुद्धं सकौपीनं ससूत्रकं ॥

धृत्वोर्ध्वपुण्ड्र विधिवत्संध्यावन्दनमाचरेत् ।
निमन्त्रयेत् श्राद्धकर्ता शुचीन् ब्रह्मविदोमलान् ॥

अर्थपंचकतत्वज्ञान् आकारत्रयसंयुतान् ।
विष्णुचक्रांकितान्विप्रान् श्रोत्रियान् सत्कुलोद्भवान् ॥

जितेन्द्रियान् जितक्रोधान् डंभासूयादिवर्जितान् ।
एतादृशगुणैर्युक्तान् वरयेत् श्राद्धकर्मणि ॥

प्रणम्यपादयोस्तेषां वैष्णवानां द्विजन्मनां ।
अद्यश्राद्धं ममपितुर्भविता तत्रकर्मणि ॥

भवद्भिः श्रीपादतीर्थं दातव्यमघनाशनं ।
इतिसंप्राप्यविधिवत् तत्र श्राद्धंसमारभेत् ॥

मध्याह्नेतान्समभ्यज्य संस्नाप्योष्णेनवारिणा ।
स्नात्वाशुचिः प्रसन्नात्मा सोत्तरीयोर्ध्वपुण्ड्रकः ॥

अन्नादिसर्वशाकानि निवेद्यैव श्रियः पतेः ।
निमन्त्रितेभ्यो विप्रेभ्यो दातव्यानि नसंशयः ॥

तत आवाहनाद्यैश्च गन्धपुष्पादिभूषणैः ।
तैरनुज्ञाप्यकुर्वीत होमं गृह्योक्तमार्गतः ॥

भोजयेदन्नपाकाद्यैः दधिमध्वाज्यसंयुतैः ।
तेभ्योयथाक्रमेणैव दद्यात्तांबूलदक्षिणां ॥

ततः प्रणम्यतान्विप्रान् प्रार्थ्यपादोदकं द्विजः ।
तेषांतुचरणौ मूर्ध्नि हृदये नेत्रयोर्मुखे ॥
संस्पृश्यगन्धपुष्पाद्यैः अर्चयित्वाप्रसन्नधीः ।
शुद्धोदकं समानीय सांगुष्ठौचरणंपितुः ॥
पूर्वं प्रक्षाळ्य देवानां पश्चात्प्रक्षाळयेत् द्विजः ।
ततोविष्णोस्तुचरणौसांगुष्ठौक्षालयेज्जलैः ॥
एवं प्रक्षाळ्यविप्राणां चरणौ श्राद्धकर्मणि ।
पुनः प्रणम्यगन्धाद्यैः अर्चयित्वा यथाविधि ॥
पुनस्तेभ्योहिदातव्या दक्षिणावस्त्रसंयुता ।
विसर्जयित्वातान्विप्रान आसीमान्तमनुव्रजेत् ॥
गृहमागत्यपिण्डांश्चदद्यात्कर्ता विधानतः ॥
तत आचम्य विधिवदुपस्थायहुताशनं ।
भार्यापुत्रादिसहितः पिबेत्पादोदकं पितुः ॥

वैष्णवाय विशिष्टाय श्राद्धशेषं प्रदापयेत्" इति । शौनकस्मृतौ - विष्णुचक्रांकितं विप्रं श्राद्धे यत्नेन भोजयेत् । तत्पादोदक-पानेन ब्रह्महत्यां व्यपोहति ॥" इति । भारद्वाजस्मृतौ श्राद्धे निमन्त्रयेद्विप्रं विष्णुचक्रांकितं शुचिं तं भोजयित्वाविधिना तस्यपादोदकं पिबेत् । इति; कात्यायनस्मृतौ - विष्णुचक्रांकिता-न्विप्रान् शुचीन्मन्त्रविदोमलान् - श्रोत्रियान् एतान् संपूजयेन्नित्यं उत्सवेषु विशेषतः। गुरूणां अन्तिमदिने तेषां जन्मदिने तथा - स्वजन्मर्क्षेवैष्णवर्क्षे हरेर्जन्मदिने तथा - मातापित्रोर्मृताहे च तयो र्जन्मदिनेतथा। पूर्वोक्तगुणसंपन्नान् आहूयाभ्यज्यवैस्वयं - स्नापयित्वा स्वयं स्नात्वा वस्त्राद्यैः तान् समर्चयेत् । अर्चयित्वा विधानेन भोजनाद्यैः सुपूजयेत् - तेषां भुक्तवतांपादान् गंधपुष्पादिभिः यजेत् -

ततः प्रणम्य प्रक्षाळ्य पद्मपत्रपुटेस्स्वयं पुनरभ्यर्च्यगन्धाद्यैः दक्षिणाभिस्सुतोषयेत् ॥'' इति। वासिष्ठस्मृतौ - श्राद्धेऽहनितुसंप्राप्तेविष्णुचक्रांकितं-द्विजं। अर्थपञ्चक तत्वज्ञ पञ्चसंस्कारतत्परं ॥ तंनत्वाभोजनाद्यैस्तु पूजयित्वाविधानतः तस्य पादौहिसंक्षाल्य प्राङ्मुखः प्रयतः पिबेत् ॥ इत्यादि प्रमाणानां विद्यमानत्वात् - अत्र श्राद्धं भविता - भवद्भिः प्रसादः करणीयः - इत्येतावन्मात्र निवेदनं श्रीवैष्णवव्यतिरिक्त विषयं - भवद्भिः श्रीपादतीर्थं दातव्यमघनाशनं - इति संप्रार्थ्येत्युक्तेः निमन्त्रित प्रपन्न श्रीवैष्णव पादयोः घृतगोमयलेपनं निषिद्धमेव। आज्यं गोमय संयुक्तं - पादयोर्लेपयेद्यदि। पितरस्तस्य कल्पान्तममृते नाभिषेचिताः इति लेपस्यकरणेसति - पित्रमृताभिषेकत्वकथनेन - तदकरणे - एकोद्दिष्टसपिण्डाभ्यां - अन्य श्राद्धेषुमोहतः -पादप्रक्षाळनं कुण्डे कुलक्षयकरं भवेदितिवत् प्रत्यवायकरत्वाप्रतिपादनेन च - कर्तुः प्रपन्नस्य पूर्वोक्तरीत्या पैतृकोद्देश्यत्वाभावेन च ये यजन्ति-पितृन्देवान् - ब्राह्मणान् सहुताशनान् सर्वभूतान्तरात्मानं - विष्णुमेव यजन्तिते - इत्याद्युक्तरीत्या - भगवदाराधन रूपतया - तदन्तर्यामि प्रीणन मात्रानुसन्धानेन तदुद्देश्य पितृणांमुक्तत्वात् अर्यमादिगणस्यापि पितृलोकनिवासिनः - तत्तद्गुणानुगुण्येन, श्राद्धनिर्वाहकस्यवा जीवलोके पितृश्राद्धे - युष्मानभ्यर्चयेत् द्विजः - प्रथमं स्वपितृणांच प्रीतिंदद्यात्ति-लादिभिः - अग्नौयदाहुतिंदद्यात् आदित्यमुपतिष्ठते - आदित्याच्चन्द्र-माप्नोति - तद्देवान् बोधयेत्सुरान् इति स्मृत्याद्युक्तरीत्या लेपन फलस्य पितृपर्यवसानगत्यभावेन। श्रुतिस्मृतिममैवाज्ञा इत्युक्तरीत्या - भगवदाज्ञा रूपत्वाभावेन "आज्ञाच्छेदीममद्रोही मद्भक्तोपि - नमेप्रियः" इत्याद्युक्तरीत्या तदकरणे भगवन्निग्रहात्मक नरकप्रापक-त्वाभावात् - घृतगोमयलेपाकरणस्य "तमंश नैवकुर्वीते" त्याद्युक्तरीत्या प्रपन्नाधिकारि निषिद्धत्वाच्च - अत्र कर्तव्यं चोद्यं। सर्वं दत्तोत्तरम्।

तदीयाराधनात्मकश्राद्धे - द्राविडवेदाध्ययनं कर्तव्यमेव ।
[illegible]विशेषेण - रात्रौ मृताहात्पूर्वेद्युरित्याद्युक्तेः भाषागानं नगातव्यं
इतिनिषेधः - साधारणभाषा विषयः - हरिकीर्ति विनैवान्यत् ब्राह्मणेन
नरोत्तम भाषागानं न गातव्यं - तस्मात्पापंत्वयाकृतं इति मात्स्य-
पुराणोक्तेः गोष्ठ्यां द्राविडवेदाध्येतॄणां श्रीपादतीर्थग्रहणमपिकर्त-
व्यमेव - तेषांपादांगुळिस्पर्श त्रिकपूर्वकमादरात् - बाहुभ्यां स्वाहृतं
पात्रे इत्याद्युक्तेः कर्पूरनीराजन मंगळाशासन काले प्रबन्धनिगमना
नन्तरं गोष्ठ्यां निमन्त्रित श्रीवैष्णवानामपि, भगवद्भागवत श्रीपाद-
तीर्थस्वीकरणं आवश्यकमेव । शेषधर्मे - पुराण धर्मशास्त्रेषु भक्ति-
हीनाश्चयेद्विजाः भाषया चरितं शास्त्रमिहलोके सुखप्रदं परलोके
भयकरं - तस्मात्तत्परिवर्जयेत् इति । नारायणसारसंग्रहे पाद्मपुराणे-
नैवेद्यमन्नं तुलसीविमिश्रं - विशेषतः पादजलेन सिक्तं योश्नाति
नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुत कोटिपुण्यं इति । पराशर-
संहितायां त्रयोदशाध्याये पुरुषोत्तमस्थलमाहात्म्ये - स्वोच्छिष्टान्नादि-
तीर्थैश्च देवादीनां च पैतृके - ऋषीणां च द्विजातीनां सर्वेषां
मुक्तिदायकं - विष्णोर्निवेदितान्ने च - विष्णुपादोदकं सदा - पितॄणां
तुष्टिसिध्यर्थं देवर्षीणां सदादरात् इति । हारीतेः - गुरोः पादाब्ज-
सलिलं पिबेन्नित्यं हरेः शुचिः तत्कर्मसम्यक्कुर्वाणः सदाचार रतस्सदा
इति । भारद्वाजे - नित्यमच्युतभक्तानां कुर्यात्पादावनेजनं तत्तीर्थ-
मुपयुंजीतमहापातकनाशनं इत्याद्युक्तेः । तेषामपि तत्तीर्थयोर्नित्य-
त्वात् उद्देश्यत्वाच्च । ननु निमन्त्रित श्रीवैष्णवानां गोष्ठ्यां तीर्थविनि-
योगः अनावश्यकः - ऊर्ध्वपुण्ड्रधारणानन्तरं श्रीपादतीर्थग्रहणेन
भोजनसमये आपोशनावसरे भगवत्तीर्थग्रहणेन चारितार्थ्यादिति
चेन्न पराशर संहिता तृतीयाध्याये - पंक्तीकृत्यद्वयेनैव शुद्धास्नि-
ग्धान्तुमृत्तिकां - तर्जन्या तद्गृहीत्वाथ ललाटे धारयेद्विजः -

छायाशुष्कं शुचीकृत्वा - गुरुपादोदकंतथा—नित्यं तद्घटकंसम्यक् पूर्वोक्त विधिना पिबेत् । इत्यादिवचनेन ऊर्ध्वपुण्ड्रधारणानन्तरं-श्रीपादतीर्थग्रहणस्य प्राप्तत्वेन - सालग्रामोदकेनैव कुर्यादापोशनद्वये-हरिपादोदकेनैव कुर्यादापोशनद्वयं - इति भगवच्छास्त्र हारीतादि-वचनेन - भोजनसमये भगवत्तीर्थेन आपोशन द्वयकरणस्य प्राप्तत्वेन-परमपुरुषसंहितायां पूजान्ते स्थापकस्सम्यक् विज्ञाप्याथ जनार्दनं इत्यारभ्य - आचार्याय अर्चकोभूयः प्रददेत्तदनन्तरम् - इति मध्येचोक्ता-ततः स्यात्सेवकानां च यथावर्णाश्रमेषु च तीर्थादिकमशेषं च प्रददेत्क्रमशस्तदा - अन्यथा विपरीतं चेत्कोपमृच्छति देवराट् - तीर्थं पिबेत्तु यो मर्त्यः सर्वपापैः प्रमुच्यते - चतुर्विधफलं प्राप्य मम लोके महीयते इत्यादिवचनैः भगवदाराधनान्ते - तीर्थविनियोगस्य, करणीयत्वप्रतिपादनेन - श्रीमद्वरवरमुनिवर्य प्रणीत द्राविडाराधन-ग्रन्थे - विशिष्य मंगळाशासनपूर्वक प्रबन्धनिगमनानन्तरं गोष्ठयां तीर्थविनियोगस्य कर्तव्यत्व विधानेन - तदनुसारि पूर्वाचार्य प्रणीत वाक्याराधनक्रम ग्रन्थे - ततो दिव्यप्रबन्ध निगमनं - तीर्थविनियोगं - स्तोत्रानुसन्धानं च कृत्वा पन्नगाधीशपर्यङ्के - इत्यादिवाक्येन - तत्कर्तव्यत्व प्रतिपादनेन च - तद्वारिताध्याभावेन गोष्ठ्यां तेषां तीर्थस्वीकरणावश्यकत्वस्य वक्तुं शक्यत्वात् । ननु गृहार्चाराधने मंगळाशासनकाले - भगवत्तीर्थेन साकं श्रीपादतीर्थस्य विनियोगः अनावश्यकः - तथा कुत्राप्यनुक्तेरितिचेन्न - पूर्वाचार्यदिनचर्यादौ ततः पदपद्मगतं - तीर्थपरमपावनं - रसोत्तरं स्वशिष्येभ्यः प्रयच्छन्तं भजाम्यहं - शाययित्वाथपर्यङ्केदेवमाहूयरक्षकं - स्वयं च तीर्थं स्वीकृत्य प्रणमेतं भजाम्यहं श्रीपादतीर्थं सर्वेभ्यो विनियोज्यस्वकं मुदा अथानुयागं कुर्वाणं इष्टैशिष्टैश्चबन्धुभिः —गुरुंवरदपूर्वकं करवैध्यान-गोचरं इत्याद्युक्तेः - ननु श्राद्धदिवसे प्रातः कालाराधने - निमन्त्रित-

श्रीवैष्णवानां - तीर्थादि विनियोगस्य कृतत्वेन - मध्याह्नसमये आराधने निमन्त्रित श्रीवैष्णवानां तीर्थश्रीपादतीर्थस्वीकारः अनावश्यकः इति चेन्न - श्राद्धपूर्वदिनरात्रौ "पितुर्मृताहात्पूर्वेद्युः रात्रौ अध्ययनं द्विजैः" इति - विजयसंहितादौ विशिष्य - आराधनपूर्वकाध्ययनप्रतिपादनवत् - तदीयाराधनात्मक श्राद्धदिवसे षडासनोपचारविशिष्टाराधन द्वयविधायकवचनाभावेन - वासिष्ठसंहितायां - पंचमाध्याये - अन्नादिसर्वशाकानि निवेद्यैव श्रियः पतेः निमन्त्रितेभ्योविप्रेभ्योदातव्यानि नसंशयः— ततः आवाहनाद्यैश्च गन्धपुष्पादिभूषणैः - तैरनुज्ञाप्य कुर्वीत होमं गृह्योक्तमार्गतः इत्यादौ - सुधीविलोचने विष्णुं विधिवदाराध्य औपासन होमं हुत्वा इत्यादौ तीर्थदिवसे - आराधनैकत्वस्य प्रतीयमानत्वेन - प्रातः कालेतीर्थादिविनियोगस्य असंभावितत्वेन - पूर्वोक्तरीत्या मध्याह्नकाले - सव्यंजनमहाहविर्निवेदनानन्तरं – प्रबन्ध निगमन कालएव निमन्त्रित श्रीवैष्णवानां श्रीपादतीर्थ विनियोगस्य कार्यत्वेन तत्काले तेषां गोष्ठ्यां तीर्थ श्रीपादतीर्थ स्वीकारावश्यभावात् - ननु पैतृके निमन्त्रितत्वात्तेषां गोष्ठ्यां तीर्थादिस्वीकारः निषिद्धः इति चेन्न आश्चर्यपर्वणिहरिवंशे सालग्रामस्य तीर्थेच तथा तीर्थाभिषेचने येषांतुसततं भक्तिः - तेवैभागवतोत्तमाः इति - हारीतस्मृतौ - विशिष्ट-परमधर्मशास्त्रे - वृत्यधिकार नामकेऽष्टमाध्याये - हर्यर्पितन्तु यद्वान्नं - तीर्थं वा पितृकर्मणि - दद्यात्पितृणां यन्नक्ष्यं गयाश्राद्धायुतं लभेत् इति । भारते - वैष्णवानान्तुयोमर्त्यः पिबेत्पादोदकंसदाक्षयरोगादि कुष्ठान्ताः - सर्वेनश्यन्तिभारतेति - पराशरसंहितायां - स्वोच्छिष्टान्नादि-तीर्थैश्चदेवादीनां च पैतृकेऋषीणां च द्विजातीनां सर्वेषां मुक्तिदायके इत्यादिभिः - तेषां गोष्ठ्यां तीर्थ श्रीपादतीर्थस्वीकरणस्यावश्यकत्व-प्रतिपादनेन - कमलाकरभट्टादिभिः निर्णयसिन्ध्वंत्यभागेकमलाकरादौ, गौतमांबरीषसंवादे येषां धौतानिगात्राणिहरेः पादोदकेनवै । अंबरीष-

गृहेनेषां दासोहं वशगस्सदा । हरेः स्नानावशेषन्तु जलं यस्योदरे स्थितः । अम्बरीष प्रणम्योच्चैः पादपांसुः प्रगृह्यतां । गर्जन्ति तावदन्यानि तीर्थानिभुवनत्रये यावन्नप्राप्यते तीर्थं सालग्रामाभिषेचनं । जन्मप्रभृति पापानां प्रायश्चित्तं यदीच्छसि । सालग्रामशिलावारिपापहारि निषेव्यतां । नृसिंहपुराणे — गंगाप्रयाग गय पुष्करनैमिशानि पुण्यानि यानि कुरु जांगल यामुनानि कालेन तीर्थसलिलं विनिहन्ति पापं पादोदकं भगवतस्तु पुनातिसद्यः - ब्रह्मचारीसव्रती च आश्रमी च सदा शुचिः विष्णुपादोदकं यस्य मुखे शिरसि विग्रहे। स्मृत्यर्थसारे देहश्शुष्यतिचाप्यात्मा पीत्वाभुक्त्वा न दुष्यति । व्रतादौ विष्णुपादोदकं पीत्वा, अनन्तरं भुक्त्वा न दुष्यति कृत्वेतिपाठे - नित्येकाम्ये च - एकादशीव्रतादौ - नैमित्तिके सांवत्सरिके श्राद्धेषु - पादोदकं पीत्वा तत्कर्मकृत्वा न दुष्यति इत्यर्थः ।

ननु जलस्यापि नरश्रेष्ठ प्राशनात् भेषजाहतेः नित्यक्रिया निवर्तेत - काम्य नैमित्तिकैस्सह इति कालिकापुराणात अभुक्ते भुक्तवत्तोयं इति निषेधाच्च कथं कर्माहितेतिचेन्न। सामान्यस्य विशेषेणाबाधात् रागप्राप्तनिषेधाच्च - विष्ण्वर्चायां शिलार्चा - गुरुषु नरमतिः वैष्णवे जातिबुद्धिः विष्णोर्वैष्णवानां कलिमलमथने पादतीर्थेम्बुबुद्धिः - विष्णोस्तन्नाम्निमन्त्रे सकलकलुषहे शब्दसामान्यबुद्धिः । विष्णोः सर्वेश्वरेशे तदितरसमधीः यस्य वा नारकीसः इति दोषदर्शनाच्च । तच्चपूजान्तेपेयं - तदुत्तरांगत्वात - येतु उपवासदिने प्राक्कर्मणश्च न पिबन्ति - तेभ्रान्ताः - अशितानशिताह्यापो जलेनैवहिपारयेदिति दर्शनाच्चेति विष्णुवाजपेयिनः गरुडपुराणे । जलं न येषां तुलसी विमिश्रं पादोदकं चक्रशिलासमुद्भवं नित्यं त्रिसंध्यं प्लवते नगात्रं खगेन्द्र तेधर्मबहिष्कृता नराः - आह्निकप्रदीपे - अन्तकालेपि यस्येह

दीयते पादयोः जलं सोपिसद्गतिमाप्नोति पापाचारोबहिष्कृतः भुक्त्वा पीत्वा विशुद्धस्यात् पीत्वापादोदकंहरेः। स्कान्दे शिववचनं-दृष्टिपूतन्तु यत्तोयं-विष्णुना प्रभविष्णुना-तद्वै पापहरं पुत्र किं पुनः पादयोर्जलम्। विष्णुरहस्ये-विष्णुपादोदकं पीत्वा पश्चादशुचि शंकया-पश्चाऽचमतिसंमोहात् ब्रह्महत्यां स विन्दति। गारुडे-पादोदकं पिबेन्नित्यं नैवेद्यं भक्षयेत् हरेः शेषं च मस्तकेधार्यं इति वेदानुशासनं-सालग्राम शिलातोयमपीत्वायस्तुमस्तके-प्रक्षेपणं प्रकुर्वीत ब्रह्महा सनिगद्यते-सालग्रामशिलातोयं पिबेत् सोमकरेणतु अज्ञानादैन्दवं प्रोक्तं ज्ञानादष्टंसमाचरेत्। विष्णोः पादोदकं पीत्वा कोटिजन्माघनाशनं तदेवाष्टगुणंपापं भूमौबिन्दुनिपातनात्। भक्तिचन्द्रोदये-आयसे च तथा-कांस्ये काष्ठ्यालाबुकेतथा उद्धृत्य पादसलिलं करेकृत्वामुखेक्षिपेत्। अदत्वापि ग्रतेतोयं रौरवेनरकेवसेत्-अदत्वा विष्वक्सेनादिभ्यः इति शेषः हेमाद्रौ, माधवीये च स्कान्दे-एकादश्यामुपोष्याथ-योश्नाति द्वादशीदिनेनैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनं इत्यादिभिः शंकासमाधानपूर्वकं श्राद्धादौपूजान्ते-भगवत्तीर्थ-भागवत श्रीपादतीर्थ स्वीकरणस्य अत्यन्तपावनत्वस्य तदकरणे भ्रान्तत्वस्य च प्रतिपादनेन — மடிபிடி ரஹஸ்ய ग्रन्थे श्रीमद्भागवतार्चनं भगवतः पूजाविधेरुत्तमं श्रीविष्णोरवमाननादुगुरुतरः श्रीवैष्णवोल्लंघनं तीर्थादच्युतपादजात् शुभतरं तीर्थं तदीयांघ्रिजं तस्मान्नित्यमतन्द्रितोभव सतां तेषां समाराधने इति च-दिनचर्याव्याख्यायां-तीर्थैर्विशिष्ट सलिलैः तीर्थं शास्त्राध्वरक्षेत्रः उपाय उपाध्यायमन्त्रिषु-अवतारर्षि जुष्टांभः इतिकोशः। तरन्त्यनेन तीर्थं इति व्युत्पत्तिश्चात्रद्रष्टव्या-ऋषिजुष्टाम्भोवाचिना-तीर्थ शब्देन च ऋषयोप्येतत् श्रीपादाम्बुजुषन्ते इति लभ्यते। अनुव्रजाम्यहं नित्यं पूयेयेत्यंघ्रिरेणुभिः इति न्यायात् इति श्रीपादतीर्थमाहात्म्य प्रतिपादनेन। नकळंजंभक्षयेदिति- अभक्ष्य

11

भक्षणादिव निषिद्धत्वाभावात्। ननु निमन्त्रित श्रीवैष्णवेतरेषामपि तत्काले तीर्थादि विनियोगः कार्यः इति चेन्न। पाराशरे - तत्तीर्थमुपयुंजीत पुत्रदारसुहृज्जनैरिति। श्रीविष्णुधर्मोत्तरे-भक्तवत्सुतथातेषु शेषं भुंजीत सात्विकः इति। वासिष्ठसंहितायां पंचमाध्याये - भार्यापुत्रादि सहितो पिबेत्पादोदकं पितुः - वैष्णवाय विशिष्टाय श्राद्धशेषं प्रदापयेत् - इत्यादिभिः निमन्त्रित श्रीवैष्णवभोजनानन्तरमेव तदितरेषां - तत्तीर्थादिस्वीकरणस्य कर्तव्यत्व विधानेन निमन्त्रितश्रीवैष्णवानां उद्देश्यत्वेन - भगवद्भुक्तशेषं यत् - तदेव भोज्यमुद्दिष्टं भगवद्यागवेदिभिः इति शाण्डिल्योक्तरीत्या तद्भुक्तशिष्टतीर्थादेरेव स्वीकार्यत्वप्रतिपादनेन पारिशेष्यान्निमन्त्रितश्रीवैष्णवमात्रविषये प्रबन्धनिगमनकाले गोष्ठ्यां - तीर्थश्रीपादतीर्थविनियोगकरणस्यैव संभावितत्वेन - तथैव त्रैविद्यवृद्ध शिष्टाचारात् - तथानुष्ठाने बाधकवचना भावेन-पूर्वोक्तरीत्या - सर्वशाखाप्रत्ययन्यायेनसंभवत्यां उपपत्तौ - तत्यागेमानाभावाच्च - ननु तथाकैश्चिदकरणेन तदप्रमाणमितिचेन्न – एकादशीकर्तव्य श्राद्धस्य द्वादश्यां कैश्चिदकरणेन एकादशीश्राद्धस्य द्वादश्यां करणस्याप्रामाण्यप्रसंगात् - तत्रापि विशिष्य वक्तव्यमिति चोद्यकृते - धर्मशास्त्रे कर्मानुष्ठानादौ तत्र तत्र विशिष्य - तत्तन्निर्णायक प्रमाणस्य सार्वत्रिकत्वाभावेन-तादृशसंध्यावन्दनादि कर्मानुष्ठानोच्छेद प्रसंगात्।

तथा च मध्याह्नकाले - भगवदाराधन समये कर्पूरनीरांजनमंगळाशासनपूर्वक प्रबन्ध निगमनानन्तरं गोष्ठ्यां निमन्त्रितश्रीवैष्णवानामेव तीर्थश्रीपादतीर्थ विनियोगः कर्तव्यः इति सिद्धं। निमन्त्रित भागवतानां श्रीपादतीर्थ विनियोगः कर्तव्यः इति सिद्धं। निमन्त्रितभागवतानां श्रीपादतीर्थग्रहणमावश्यकमेव - सांगुष्ठौचरणौ-पितुः - पूर्वंप्रक्षाल्य देवानां पश्चात् प्रक्षालयेत् द्विजः - ततो

विष्णोस्तुचरणौ सांगुष्ठौक्षालयेत् जलैः - इत्याद्युक्तेः - श्रीपाद-तीर्थोद्देशेन वरणाच्च । ननु विश्वेदेवस्य पादाम्बु मूर्ध्निकुर्याद्विचक्षणः-सर्वतीर्थफलं विन्देन्नतु पित्र्यं कदाचन । पित्र्यं ब्राह्मणपादाम्बु न क्वचिन्मूर्ध्निधारयेत् - धारयेत्पितरस्य माप्राश्नन्ति च वत्सरमिति तत्पादाम्बुप्रोक्षणस्यैव अग्राह्यत्वोक्तया तदनावश्यकमिति चेन्न-तद्वचनस्य अवैष्णवविषयत्वात्— पितुः श्राद्धे तु योमोहात् पिबेत्पादोदकन्नतु-स एव पितृघातीस्याद्दारुणं नरकं व्रजेदिति वासिष्ठसंहितायां श्रीपादतीर्थस्वीकाराभावे प्रत्यवाय प्रतिपादनात् - अत्र भागवत-श्रीपादद्वयतीर्थग्रहणमेव कर्तव्यं । विष्वक्सेनसंहितायां - मण्डलंपुरतः कृत्वातदूर्ध्वन्त्वासनंन्यसेत् · तस्योपरिन्यसेत्पात्रं तच्च पुष्पैः समर्चयेत् । आगतं वैष्णवंसाक्षाद्विष्णुरित्येव चिन्तयन् · प्रणिपत्य यथान्यायं प्रार्थयेत श्रीपदद्वयं · तत्कृपादत्तचरणौ मूर्ध्नि फाले दृशो हृदि · विन्यस्य भक्तिपूर्वन्तु क्षालयेद्गन्धवारिणा · प्रथमं दक्षिणंपादं · ततोवामं यथाविधि · दौतवस्त्रेण संशोध्य - पूर्ववत्स्वांगकेन्यसेत् ताम्बूलाद्युप-हारांश्च निधायपुरतोनमेत् · तदनुज्ञां पुरस्कृत्य त्रिधातीर्थं पिबेत्सुधीः आध्यात्मिकविनाशाय - भगवद्भक्तिपूर्तये - सम्यक् ज्ञानप्रकाशाय सदाचारोयमीरितः · रौक्मेच राजते चैव ताम्रे चैवतु मृण्मये न कांस्ये क्षालयेत्पादौ कदाचिदपिवैनरः - वस्त्रन्तु द्विगुणीकृत्यपाणौ पाणिं च विन्यसेत् - तत्रतीर्थं प्रतिष्ठाप्य पिबेद्बिन्दु विवर्जिते - परमाणु-समंतीर्थं - यावत्तुपतितं भुवि - तावद्वर्षसहस्राणि नरकेपरिमज्जति इति संग्रहे · ग्राहकाद्दक्षिणे स्थातव्यस्तीर्थसेचकः यद्वातुवामभागेवातीर्थं तंतुप्र-दास्यते इति ब्रह्माण्डपुराणे व्यासजैमिनिसंवादे । திருப்பேர் நகரானிதி द्राविडनामक - श्रीनामनगरीतिसंस्कृतनामक - इन्द्रभवनक्षेत्रमाहात्म्ये दशमाध्याये - प्रणम्य पादौ प्रक्षाल्य - तत्पादाम्बुपिबेन्नरः - द्विज-माचार्यवन्मत्वागृह्णीयात् मिडश्रुतीरिति·

हारीतस्मृतौ - द्रमिडोपनिषद्भाष्यवेत्तायोविबुधोशुनिबालोऽपि-तत्पदोस्तीर्थंग्राह्मं पर्वावनुत्तये इति - चरणौपितु। - विष्णोस्तुचरणौ - विप्राणांचरणौ श्रीपदद्वयं। श्रीभागवते - कुचेलोपख्याने - अथोपवेश्य-पर्यङ्केस्वयं सख्युस्समर्हणं - उपहृत्यावनिज्यास्य - पादौ - पादावने जनीः - अग्रहीत् शिरसाराजन् भगवान् लोकपावनः इति - तत्रैवान्यत्र-नारदस्यातिथेः पादौ - सर्वासां मन्दिरे स्वयं - कृष्णः प्रक्षाळ्य पाणिभ्यां पपौ पादोदकं मुनेः इति।

तीर्थग्रहणावसरे विशिष्य श्रीपादद्वयतीर्थग्रहणस्यैव प्रतिपादितत्वात् तथासत्संप्रदाय सिद्धत्वाच्च – न च पृथिव्यानितीर्थानि तानि तीर्थानिसागरे – सागरेसर्वतीर्थानि पदेविप्रस्य दक्षिणे। इतिवचनेन दक्षिणपदस्य - सर्वतीर्थस्नानत्वप्रतिपादनेन - एकश्रीपादतीर्थग्रहणस्यापि मुख्यत्वमिति वाच्यं तद्वचनस्य - श्रोत्रे च सर्वतीर्थानि गंगा च दक्षिणेश्रोत्रे नासिकायां हुताशनः इति - उभयोः स्पर्शनंकुर्यात् प्राणायामः स उच्यते - ब्राह्मणा जंगमंतीर्थं - तीर्थभूता हि साधवः-तेषां वाक्योदकेनैव शुध्यन्तिमलिना जनाः इत्यादिवत् - अतिशय-वस्तुस्थिति परत्वेन अकिंचित्करत्वात् - तीर्थग्रहणैदंपर्यप्रवृत्तवचनेषु द्वित्वबोधनेन तदितरसंख्या व्यवच्छेदात् - श्रीपादद्वयतीर्थग्रहणस्यैव मुख्यत्वेनवक्तुं शक्यत्वाच्च।

श्रीपादतीर्थं त्रिवारमेवस्वीकर्तव्यं - तदनुज्ञांपुरस्कृत्यत्रिधा तीर्थं पिबेत्सुधीः त्रिवारंस्वीकृतंगोष्ठीनिष्ठैरार्यैर्महात्मभिः - पश्चात्त्रिवारं - स्वीकृत्यस्वयं चाचार्यहस्ततः - वस्त्रंतुद्विगुणीकृत्यपाणौपाणिंनिवेश्य च पाणौतीर्थं परिप्लाव्य त्रिः पिबेद्बिन्दुवर्जितं। इत्यादि प्रमाणैः - तीर्थ-त्रिवारस्वीकरणस्यैवोक्तत्वात् - हारीते ग्रासशेषं न चाश्नीयात्पिवच्छेषं

पिबेन्नतु इतिपितृशेषभोजन निषेधस्तु - केवलश्राद्धविषयः — इष्टैस्सह भुज्यतामित्यनुमतिदानात् - वैष्णवाय .विशिष्टाय श्राद्धशेषं प्रदापयेत् - अवैष्णवाययोदद्यात्पच्यते नरकाग्निना इति वसिष्ठोक्तेः - विस्तरस्तु सन्मार्गदर्पणादिषु द्रष्टव्यः । अतः प्रपन्नैः श्राद्धात्मकतदीयाराधनं तीर्थदिनमिति व्यवहृत्य द्राविडवेदपारायण - तदध्येतृ श्रीपादतीर्थ-तीर्थदिनमिति...

श्रीसदनुष्ठानदर्पणे - तीर्थदिवसव्यवहार -
तद्दिनकर्तव्यप्रकार - विषयोनामत्रयोविंशप्रतिफलनं

श्रीरस्तु

सदनुष्ठानदर्पणे - तदीयाराधनसमये यवनिकाकल्पनविषयो नाम

चतुर्विंशप्रतिफलनम्

प्रपन्नैः अनुयागसमये - तत्तदधिकारानुगुणं यवनिकां मध्ये कारयित्वा चतुःश्रस्थलशुद्ध्यादिपूर्वकं - व्यंजन प्रसाद परिवेषणादिकं कृत्वा तदीयाराधनं क्रियते तदुपपन्नमेव - वचनात् शिष्टाचाराच्च - महाभारते प्रादानैः पूजितोविप्रः वन्दितोवापिसत्कृतः - भावितोवापि दृष्टोवा - मद्भक्तो दिवमुन्नयेदिति ।

वाराहे यथैव भगवान्विष्णुः देवानां परमोगुरुः—तथैव च मनुष्याणां वैष्णवः परमोगुरुः - इति । शेषसंहितायां - पञ्चसंस्कार संयुक्तैर्भुञ्जीयात् विधिवद्विजः इति । स्मृत्यन्तरे विवाह - यज्ञाध्ययनस्पर्शसंवासभोजनं एकान्तिनानुकर्तव्यं तादृशैस्सहबान्धवैः इत्यादि। ननु, पराशरसंहितायां तृतीयाध्याये रुद्राक्षधारिणं विप्रं चण्डालं भस्मधारिणं श्राद्धकालेहिदृष्ट्वा चेन्निराशाः पितरोगताः - चण्डालं पतितं म्लेच्छं रुद्रार्चनपरायणं नित्यनैमित्तिके चैव वैष्णवोनावलोकयेत् । शिवभक्तैर्बौद्धभक्तैः सहसंभाषणादिकं - रुद्रार्चनादिसंयुक्तैर्वर्जयेद्वैष्णवोत्तमः । मायावाद द्विजान् सम्यक् दूरतः परिवर्जयेत् इति । मनुस्मृतौ एकशय्यासनं पङ्क्तिः भाण्डं पक्वान्न मिश्रणं - याजनाध्यापनं योनिः तथैवसहभोजनं नवधासंकरः प्रोक्तः नकर्तव्योऽधमैस्सह - इत्युक्तत्वेन इतरमतस्थैस्सह भोजनादिकं निषिद्धं - श्रीवैष्णव समयाचारनिष्कर्षे - यस्यगोत्रमजानाति कुलंचापि त्रिपूरुषं - न तेनसहचाश्नीयात् इति

ब्रह्मविदोविदुः इति - स्मृत्यन्तरे - परार्थेजपकर्तारः परार्थे देवपूजकाः - भृतकाध्यापकाश्चैव - वैद्यशास्त्रोपजीविनः - तेषामन्नं नदातव्यं - तेषां पङ्क्त्यां न भोजनं इत्युक्तत्वेन परार्थजपकर्त्रादिभिस्सह भोजनमपि निषिद्धं स्वमतस्थैस्सह भोजनं उपपन्नमेवेतिचेत् न - पराशरे श्वान-वायस, चण्डाल दृषिदोषं परित्यजेत् - प्रपन्नः परमैकान्ती भोजने पाककर्मसु । विष्णोर्नैवेद्यकालेतु चेलावरणमाचरेत् नैवेद्य पाककाले च भोजने च विशेषतः असदृष्टिं परिहरेत् अच्युतस्य निवेदने । काकं दृष्ट्वा प्रपन्नश्च - नाश्नीयाल्लोभतोपिवा - अवैष्णवानां दृष्टं च भोजनं वैष्णवस्त्यजेत् इति । भरद्वाजः— निजधर्मानुरोधेन दैवेषु वैष्णवैरेव वैष्णवः कुर्यात्सर्वाणिकर्माणिनकदाचिदवैष्णवैः । पित्र्येषु तथा-धर्मार्थेष्वितरेषु च अवैष्णवं न गृह्णीयात् पात्रं दानेषु कर्हिचित् - समित्पुष्प हविस्तोय पात्रोपनयनादिषु - अवैष्णवान्विशेषेण न कर्मसु नियोजयेत् - विशिष्टः परमैकान्ती ज्ञान वैराग्यभक्तिभिः - तादृशैरेवकुर्वीतसहसंकथनादिकमिति - हारीतः - वैष्णवानेव विप्रांस्तु सर्वकर्मसुयोजयेत् - सर्वत्रावैष्णवान्विप्रान्पतितानिव संत्यजेत् इति । हारीतस्मृतौ विशिष्टपरमधर्मशास्त्रे वृत्यधिकारनामके अष्टमाध्याये श्राद्धे दाने व्रते यज्ञे विवाहे चोपनायने चक्रांकितं विप्रमेव पूजये दितराम्न तु इति । पूर्विकग्रन्थ संग्रहे शंखचक्रोर्ध्वपुण्ड्रादि चिह्नैः प्रियतमोहरेः । अन्वितान् ब्राह्मणानेव पूजयेत्सर्वकर्मसु इति । तत्रैव वैष्णवानां प्रपन्नानां केशवाराधनात्परं यवनिका प्रभेदेन भोजनन्तु परंस्मृतं । सहपङ्क्तौ निषिद्धत्वात् भिन्नपङ्क्तिः वरास्मृता तस्मादवश्यं कर्तव्यं यवनीनान्तु भेदनं इत्युक्ततया स्वमतस्थ पंक्तावेव तत्तदधिकारानुगुणं श्रीभाष्य भगवद्विषय प्रवर्तन मन्त्रार्थप्रवर्तन ज्ञानविशेषमवलोक्य यवनिकां मध्येकारयित्वा तदीयाराधनकर्तव्य विधानात् । प्रपन्नैः अनुयागारंभे दिनचर्या गुरुपरंपरा सूक्तकादीनि

अनुसंधेयानि। सच्चरित्रपरित्राणे जयसंहितायां गुरुरेव परंब्रह्मेत्यारभ्य अर्चनीयश्च वन्द्यश्च कीर्तनीयश्च सर्वदा ध्यायेज्जपेन्नमेद्भक्त्या भजेदभ्यर्चयेन्मुदा इत्यादि। अन्यत्र गुरोर्वार्ताश्चकथयेदिति। शाण्डिल्येन आचार्यस्य पितुश्चैव स्वामिनो द्रव्यमेवच. शिष्यः पुत्रस्तथादासः इति तन्नोक्तुमर्हति इति भोजन समयेप्याचार्यानुसन्धानमुक्तं। एवं च आचार्यकीर्तन तद्वार्ताकथन तज्जपादीनां असत्यपवादके सार्वकालिकत्वात् विशिष्यैवचशाण्डिल्येन भोजनसमये तत्प्रतिसन्धानस्य विहितत्वात् कुर्वद्रूपस्य वागिन्द्रियस्य वृथालापप्रवृत्तिपरिहारार्थत्वाच्च आपोशनावधिकं आचार्यादिकं गुरुपरम्परां आचार्यदिनचर्यादिकं गुरुपरम्परांच अनुसन्दधते। अनन्तरन्तुवाचोपचारादन्यत्र मौन विधानान्न तदपेक्षं। यथाह शाण्डिल्यः नावश्यं भोजनेमौनं कुटुम्बाश्रय वासिनां वाचोपचारः कर्तव्यः भुंजतांसहभोजने। अतः यवनिका स्थापन पूर्वक दिनचर्याद्यनुसन्धानपूर्वक तदीयाराधनकरणमुपपन्नं इति।

सदनुष्ठानदर्पणे तदीयाराधन समयेयवनिकाकल्पनविषयोनाम
चतुर्विंशप्रतिफलनम्

|| श्रीः ||

|| प्रपन्नानां सकृत्प्रणामविषये प्रमाणम् ||

|| सदनुष्ठानदर्पणे सकृत्प्रणामविषयो नाम नवमं प्रतिफलनम् ||

प्रपन्नैः सकृत्प्रणामः कर्तव्यः । वचनात् शिष्टाचाराच्च ||

तथाहि– सकृत्कृतः शास्त्रार्थः, सकृदेवार्थान्निगमयति–

सकृदेव हि शास्त्रार्थः कृतोऽयं तारयेन्नरम्

सकृत्ते नमः इति श्रुतौ– श्रीनारदीये एकोनसप्ततितमेऽध्याये–

वैष्णवौ द्वौ सदा सम्यक् संगतौ तु परस्परम् ।
प्रणामं कुरुतस्तत्र तयोर्मध्यस्थितो हरिः || इति ।

श्रीभागवते भगवद्वचनम् –

एकेन पाणिना यो वै प्रणमेद्देवमच्युतम् ।
तस्य दण्डः करच्छेदः इति वेदविदो विदुः ||
तस्मादुभाभ्यां पाणिभ्यां प्रणमेत्स्वामिनं नरः ।
तथाविधं यः कुरुते तन्मे प्रियकरं भवेत् || इति ।

ब्रह्माण्डपुराणे भृगुशौनकसंवादे खण्डनक्षेत्रमाहात्म्ये–

हरशापहरं शान्तं पद्मपत्रायतेक्षणम् ।
सकृत्प्रणम्य देवेशं स प्राप्नोति न संशयः ||

श्रीपाञ्चरात्ररक्षायाम्–

एकोऽपि कृष्णे सुकृतः प्रणामः दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ||

दुर्गसंसारकान्तारमपारमभिधावतः ।
एकः कृष्णनमस्कारः मुक्तितीरस्य देशिकः || इति ।

ईश्वरसंहितायाम्– एकेनैव प्रणामेन प्रीतो भवति केशवः ।
तस्मात् त्वमपि देवेश प्रीतये प्रणतिं कुरु ||

मुद्गलोपाख्याने–एकधा तु नमस्कृत्य प्रीतये मधुविद्विषः ।
भक्त्या परमया युक्तः प्राप्तश्च कृतकृत्यताम् || इति ।

प्रपन्नाः यामुनाचार्यस्तोत्रे–

'यथा तथा वापि सकृत्कृतोऽञ्जलिः' इत्यादिप्रसिद्धस्वावृत्त्य सह भगवत्प्रणाममाहात्म्यनिरूपणेन तस्या असकृदावृत्तिं प्रतिषेधयन्ति न तावदत्र उत्थायोत्थाय पुनः पुनः प्रणम्येति मुक्तिदशायां, भगवद्विषयप्रीत्यतिशयहठात्कारेण पूर्वपूर्वप्रणामविस्मरणपूर्वकमनुष्ठीयमानः पुनः पुनः प्रणामः योगदशायां प्रतिसन्धीयमानतया श्रीवैकुण्ठगद्येऽनुगृहीतोऽत्र निवार्यत इति वक्तुं न शक्यते– नापि परांकुशार्यवत् भक्तिपरवशानां अत्रापि संभाव्यमाना भगवत्प्रणामावृत्तिः पूर्वपूर्वविस्मरणनिबन्धनात्र निवार्यत इति वक्तुं शक्यते। तस्य सर्वस्यापि अशास्त्रार्थत्वात्। किन्तु शास्त्रार्थत्वभ्रमेण प्रसज्यमानं पुरुषतन्त्रं हरिप्रणामप्रवर्तनमेवात्र निवार्यत इति वक्तुं शक्यते। तदावृत्तिप्रसञ्जनन्तु न तावद्वचनम्। पुनः पुनः प्रणमेदिति तदावृत्तिविधायकवचनाभावात्। तथा चानुगृहीतम्। वेदान्ताचार्यैः स्तोत्रभाष्ये सकृत्कृतोऽञ्जलिरित्यत्र सकृत्कृतश्शास्त्रार्थः इति सामान्यतः प्राप्तस्य सकृदनुष्ठानस्यात्र निरपवादत्वात् (अपवादकाभावात्) वसन्ते वसन्ते ज्योतिषा यजेतेतिवत्। आवृत्त्यपेक्षाऽप्यत्र नास्ति इत्याह– ,'सकृदिति। किन्तु अन्यत्र कर्मकाण्डेषु फलभूयस्त्वकामनया कर्मावृत्तेरवगम्यमानत्वेन। अत्रापि आवृत्त्या फलभूयस्त्वं स्यादिति भ्रम एवं। तस्मात्तदसकृत्त्ववारणं नानुपपन्नं सकृत्प्रयुज्यमानस्यापि, तस्यानन्तफलत्वात्। आवृत्तावपि तस्य फलाधिकयाभावात्। सकृदावृत्तेर्निषेधाभावात्। प्रीतिप्रयुक्तावृत्तेरपुरुषतन्त्रत्वेन निषेधासंभवाच्च। तथा च पुरुषतन्त्रस्य हरिप्रणामावर्तनस्य फलान्तराभावात् सामान्यतः प्राप्तस्य सकृदनुष्ठानस्य अपवादकाभावाच्च। सन्ध्यावन्दनावृत्तिवत् हरिप्रणामावृत्तिरपि न युक्तेति तां निवारयन्तीति मन्तव्यम्। सद्दर्शनसुदर्शने–

क्वचन वचनतो वा दृष्टसामर्थ्यतो वा
भवति तु फलभूम प्रेप्सया वाऽप्यकृत्वं
अथमिदममितेऽस्मिन् दुर्लभं स्यात्सकृत्ते
नम इति निगमोक्ते शेषता ज्ञापनार्थे ॥

असावादित्यस्तत्परमिति नमस्यन्ति विबुधाः
सकृद्वारं वेदविधिरपि सकृत्ते नम इति ।
तथा मूले मन्त्रे भवति च नमस्येकवचनं
विरुद्धः केषांचित्प्रणिपतनयुग्मत्वनियमः ॥

प्रदक्षिणेनैव सहप्रणामः प्रदक्षिणं तन्नमसा सहैव
युग्मं तदेतद्विबुधैर्विधेयं पाद्मे तु किञ्चिद्वचनं समूचे ।
बाह्यान्तरे ये तु नमस्क्रियेते प्रदक्षिणे चापि तथाविधे द्वे
सकृत्प्रयोगे सहिते विधेये वसिष्ठतन्त्रं वदति स्वतन्त्रम् ॥ इति ।

ननु एकप्रणामादिः निषिद्धः । 'प्रदक्षिणप्रणामांश्च युग्मान्कुर्याद्विचक्षणः । एकत्रिपञ्चसप्तादिगणनाविषमं च यत्' । इति । श्रीसात्वतोक्तेरिति चेन्न ॥ सच्चरित्रपरित्राणे–

प्रदक्षिणप्रणामांश्च युग्मान्कुर्याद्विचक्षणः ।
एकत्रिपञ्चसप्तादि गणनाविषयं च यत् ॥ इति ।

उत्तरार्धे कुर्यादित्यनुषङ्गः । एकेत्यादिना सकृत्ते नमः इत्यादि श्रुत्यर्थः उक्तः अत्र च युग्मत्वायुग्मत्वयोः समुच्चयासंभवेन विकल्पः अयुग्मत्वे च एकत्वत्रित्वादीनां समुच्चयासंभवेन मिथोविकल्पः त्रीन् वृणीतेत्यत्र हि संख्यायाः स्वाधिकसंख्या व्यवच्छेदकत्वनियमेन न चतुरो वृणीतेत्यादेरनुवादत्वमाश्रितम् । तद्वत् एकत्वादेः अधिकसंख्याव्यावर्तकत्वेन भावाभावयोः समावेशायोगेन सकृत्त्वे त्रित्वाभावनियमेन तदानीं त्रित्वस्य समावेशायोगेन विकल्पस्य न्याय्यत्वात् । इति श्लोकव्याख्यानं कृत्वा, ग्रन्थ-

पूर्त्यनुसारेण तु एकप्रणाम एव युक्तः इति नियमितत्वात् । अतः तत्र श्लोके एकप्रणामादेः विकल्पः उक्तः ॥

तथा वैखानसे च–प्रणामं दण्डवन्नमस्कारं पञ्च एकं वा कुर्यात् इति । वासुदेवसंहितायां न तु निषेधः । तथा भगवच्छास्त्रे–

प्रदक्षिणेन चैकेन देवदेवस्य मन्दिरे ।
कृतेन यत्फलं नृणां तत् शृणुष्व द्विजोत्तम ।
पृथ्वी प्रदक्षिणफलं यत्तत्प्राप्य हरिं व्रजेत् ' ॥ इति ।

नमस्कारविधिरुक्तो वराहपुराणे–

प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्चयेत् ।
स यां गतिमवाप्नोति न नरः क्रतुशतैरपि ।
नमस्कारेण चैकेन त्वष्टाङ्गेन हरिं व्रजेत् ॥ इति ।

अष्टाङ्गलक्षणं पुराणे दर्शितम्–

उरसा शिरसा दृष्ट्या मनसाऽपि धियापि च ।
पद्भ्यां कराभ्यां वाचा च प्रणामोऽष्टाङ्ग उच्यते ॥

अथ प्रदक्षिणविधिः, तत्राह ब्रह्मा बृहन्नारदीये–

विष्णोः विमानं यः कुर्यात्सकृत् भक्त्या प्रदक्षिणम् ।
अश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ॥ इति ।
श्रुत्या सकृत्ते नमः इत्युक्तत्वात् प्रथमं रमे ।
मत्प्रणामः सकृत्कार्यो मयि सन्यस्तमानसैः ॥
ये मत्प्रणामान् सुबहून् कुर्वन्ति भुवि मानवाः ।
मत्स्वरूपानभिज्ञास्ते मदन्यशरणाहिते ॥
अतः प्रपन्नैः सकृत्प्रणाम एव कर्तव्यः इति सिद्धम् ॥

इति श्रीसदनुष्ठानदर्पणे सकृत्प्रणामविषयो नाम
नवमं प्रतिफलनम् ॥

सदनुष्ठानदर्पणे

॥ प्रथमतो व्यञ्जनपरिवेषणविषयो नाम

॥ पञ्चविंशप्रतिफलनम् ॥

प्रपन्नैः अनुयागसमये व्यञ्जनानां अन्नपरिवेषणात्पूर्वं प्रदानं उपपन्नम् । वचनात् शिष्टाचाराच्च ॥ तथाहि सच्चरित्रपरित्राणे—

'उच्छिष्टेन घृतं दद्यात् प्राग्घुतेर्लवणान्वितम्' । इति हारीतवचनं एवं स्मृतिरत्नाकरे व्याख्यातम् । प्राणाहुतेः पश्चादेव लवणान्वितं व्यञ्जनं दद्यादित्यर्थः ॥ इति । अन्यत्र तु व्यासेन—

अमृतोपस्तरणमसीत्यापोशनक्रियां चरेत् ।
स्वाहा प्रणवसंयुक्तां प्राणायान्नाहुतिं क्षिपेत् ॥

अपानाय ततो हुत्वा व्यानाय तदनन्तरम् ।
उदानाय ततो हुत्वा समानायेति पञ्चमीम् ।
शेषमन्नं यथाकामं भुञ्जीत व्यञ्जनैर्युतम् ॥

इत्युक्तम् । प्राणाहुतेः पूर्वमेव अन्नपरिवेषणवत् । व्यञ्जनपरिवेषणमत्र प्रतीयते । श्राद्धे तु विविधव्यञ्जनम्, अन्नं हविष्यानि, पायसापूपफलानि प्राज्यमाज्यं च प्रदायेति । प्राणाहुतेः पूर्वमेव, व्यञ्जनप्रदानं सुधीविलोचनेऽभिहितम् । एतत् प्राणाहुतेः पूर्वं उत्तरं च व्यञ्जनदानं नित्यभोजने वैकल्पिकम् । गौतमेन च—

घृतसूपव्यञ्जनोपेतमित्युक्तम् । अत्र हि आम्नानक्रमात् । अन्नात्पूर्वं व्यञ्जनादेः दानं सिध्यति । श्रुत्यादिक्रमनियामकत्वाभावे हि, आम्नायस्य तन्नियामकत्वमाश्रितम् । अतो व्यञ्जनादीनां अन्नस्य

च प्रदानपौर्वापर्यं प्राणाहुतेः प्रदानपौर्वापर्यवत् वैकल्पिकम् । अतो व्यञ्जनानां अन्नात् पूर्वमपि परिवेषणं यथाचारं युक्तम् ॥

'उच्छिष्टेन घृतं दद्यात्पैतृके भोजने विना'। इति वचनात् । उच्छिष्टेऽपि पैतृकभोजने घृतदानमुपपन्नम् । अन्नं च पायसं भक्ष्यमित्यादिकन्तु श्राद्धविषयकमितीति । कश्चित् वैखानसादि श्रीवैष्णवाः बोधायन, गौतमधर्मप्रवृत्तिवचनादिकमवलम्ब्य, श्राद्धेऽपि अन्नपरिवेषणात्पूर्वमपि व्यञ्जनपरिवेषणं कुर्वन्ति ॥

सच्चरित्ररक्षायां भगवन्निवेदितोपयोगविधौ ईश्वरसंहितायां समाराधनाध्याये स्कन्दः –

त्वया निषेधः आख्यातो मन्त्रदत्तस्य वस्तुनः ।
सर्वत्र पत्रपुष्पान्न पूर्वस्य परमेश्वर ॥

तस्येदानीं प्रदानं च प्राशनं च प्रशंससि ।
किमेतदत्र मे जातः संशयः परमेश्वर ॥

ईश्वरः –प्रदानं प्राशनं पुत्र उपभोग्यत्वमेव च ।
शैव पाशुपते दुष्टं अचिरादेव पापकृत् ॥

तत्पुनः वैष्णवे मार्गे वर्तते व्यत्ययेन तु ।
अनन्तफलदं दानात् प्राशनात्कोटिशुद्धिकृत् ॥

क्षयं नयति पापानि पुण्यवृद्धिं करोति च ।

दानैर्धर्मैः कृतैः पुण्यैः तपोभिश्च न तत्फलम् ।
यत्फलं भगवद्भुक्तप्रदानं प्रापणादनात् ॥ इति ।

तत्रैव दशमाध्याये समयोपदेशमाहात्म्ये–

भगवन्निवेदितस्य सर्वस्य प्रतिपत्तिं विना संभूतैः साधारणैः केवलान्नादिशब्दैरभिधाने निर्माल्यबुध्या च दूषणे च महान् दोषः उपपादितः ॥

उपभुक्तस्य सर्वस्य गन्धपुष्पादिकस्य च ।
स्नानादावुपयुक्तस्य दधिक्षीरादिकस्य च ॥

दूषणं न प्रयोक्तव्यं शब्दैरप्रतिपत्तिजैः ।
निर्माल्यबुध्या देवीयं पावनं दूषयन्ति ये ।
ते यान्ति नरकं मूढाः तत्प्रभावापलापिनः ॥

प्रत्यक्षेण प्रमाणेन लोकदृष्टेन हेतुना ।
शिष्टैरनुष्ठिता चैव वैष्णवस्य पवित्रता ।
सिद्धा पादोदकान्तस्य महत्ता देवपूजिता ॥ इति ।

अन्यत्रापि तेषां विधिः प्रतीयते । यथा ब्रह्माण्डपुराणे—

विष्णोर्नैवेद्यकं शुद्धं मुनिभिर्भोज्यमुच्यते ।
अन्यं निवेद्यं निर्माल्यं भुक्त्वा चान्द्रायणं चरेत् ॥

इत्यादिना, श्रीमन्निगमान्तगुरुभिः विष्णुनिवेदितस्य सर्वस्य अत्यन्तपावनत्वम्, प्रतिपत्तिं विना संभूतैः साधारणैः केवलान्नादिशब्दैरभिधाने, तद्दूषणे च नरकप्राप्त्यादिकं च प्रतिपादितम् ॥ पाद्मे—

भगवद्भक्तिहीनस्य नैवेद्यं विषमुच्यते ।
भगवद्भक्तियुक्तस्य तदेवत्वमृतं भवेत् ॥ इत्युक्तम् ।

अत एव भगवन्निवेदित वैभवात् खलु व्यञ्जनादयः पारिभाषिकोक्त्या (கறியமுது, அடிசில், சாற்றமுது, திருக்கண்ணலமுது, உப்பமுது) इति सद्भिः व्यवह्रियते । अत एव

प्रत्यक्षलवणं तथेति । अनुच्छिष्टे तु लवणमिति च । प्रत्यक्षलवणादि-निषेधकं वचनम् । स्वार्थपाकविष्णुनिवेदितलवणादिविषयं श्रीमद्भागवते दशमस्कन्धे त्रिपञ्चाशत्तमेऽध्याये रुक्मिणीकल्याणघट्टे—

विप्रस्त्रियः पतिमतीस्तथा तैरसमपूजयत् ।
लवणापूपताम्बूलकण्ठसूत्रफलेक्षुभिः ॥ इति ।

भविष्यत्पुराणे श्रीवेङ्कटेशगिरिमाहात्म्ये श्रीनिवासविवाहे एकादशाध्याये द्विचत्वारिंशश्लोकोपरि—

देववाक्यानुसारेण ह्यर्पयामास कंजजः ।
प्रदक्षिणं ततश्चक्रुरुद्रमुख्यास्सुरोत्तमाः ॥

लवणं च समारभ्य घृतान्तं ब्रह्मवादिनाम् ।
सर्वं सम्पूर्णतां जातं कृष्णार्पणमथाकरोत् ॥

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रीन् लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ॥

इत्थं कृष्णार्पणं चक्रे श्रीनिवासाय विष्णवे ।
अकुर्वन् भोजनं विप्रा ह्यन्नं तोयघृतादिकम् ॥

भोजनान्ते जगन्नाथो दक्षिणां च ददौ विधिः ।
निष्कद्वयं द्विजानां च तदर्धमृषिजातिनाम् ॥

इत्याद्युक्तेः । इति शिष्टाः प्रपन्नाः भोजनसमये प्रथमतः लवणान्वितव्यञ्जनपरिवेषणं प्रत्यक्षलवणपरिवेषणमपि कुर्वन्ति । स्वार्थपाक परार्थपाकनिरूपणम । वैश्वदेवाभावप्रतिफलने द्रष्टव्यम् । व्यञ्जनप्राथम्यग्रन्थे— ननु अनुयागे भगवन्निवेदनादतीव पूतमपि व्यञ्जनादिकम् । प्राणाग्निहोत्रात्प्राक् न देयम् । पूर्वं अलवणान्वित-

मेव देयम् । तथा प्राक् परिवेषे पात्रद्वयमपेक्षितमित्याद्युक्तौ उच्यते । भगवत्प्रभृति स्वाचार्यपर्यन्तनिवेदनवैभवात । अतीव पवित्रतमं व्यञ्जनादिकं परिषेचनप्राणाहुत्योः पूर्वमेव इति प्रबलतरपरमैकान्तिभिः अङ्गीकृतत्वात । बहुप्रमाणसिद्धत्वाच्च तथाहि– पाकयज्ञसूत्रे त्रयोदशखण्डे भोजनविधिरुच्यते । शुचौ देशे प्राङ्मुखमुपविश्य भोजनपात्रमासाद्य, अद्भिरभ्युक्ष्य, अभिघार्य, पायसं, फलं, व्यञ्जनं, लेह्यशोष्यादिसूपभक्ष्यं क्षीराज्यदधितक्रसमेतं दीयमानमन्नम्, भूर्भुवस्सुवरोमित्युपस्थाय, सावित्र्या प्रोक्ष्य, ऋतं त्वा सत्येनेति, सायं सत्यं त्वर्तेन इति प्रातः परिषिच्य, अमृतोपस्तरणमसि (अमृतापिधानमसि) इत्यपः पीत्वा, श्रद्धायां प्राणे निविष्टः इति प्राणानाहूय, श्रद्धायां प्राणेनेत्यारभ्य भोजनविधिः व्याख्यातः इति बोधायनमहर्षिणोक्तम् । गौतमसूत्रे घृतसूपव्यञ्जनोपेतमन्नं मन्त्रतो दक्षिणहस्तेनापोशनं कृत्वा, प्राणाय तर्जनीमध्यमाङ्गुष्ठैः जुहुयात इत्यादि अत्र हि आम्नातक्रमात । अन्नात्पूर्वं व्यञ्जनादेः दानं सिध्यति । सूत्रादौ क्रमनियमकाभावे हारीतवचनानुरोधेन अङ्गीकार्यता स्यात । तत्रापि उच्छिष्टेन घृतं दद्यादिति उच्छिष्टघृतदाननिषेधबोधकार्थपरवचनस्यापि प्राग्घृतदानाभावविषयपरतया अकिञ्चित्करत्वापत्तिः ॥

तथाहि वैद्यनाथीये अत्रिः –

> प्राणाहुतौ घृताभावे पश्चाद्भुञ्जीत नो घृतम् ।
> प्राग्घुतेर्घृतसद्भावे भुक्तिमध्येन दुष्यति ॥

इत्युक्तत्वात धर्मप्रवृत्तौ–

> व्यञ्जनं पुरतः कृत्वा मध्येऽन्नं परिवेषयेत ।
> परिविष्टन्तु गायत्र्या घृताक्तं अभिमन्त्रयेत् ॥

वैद्यनाथीये व्यासः –

प्राणाग्निहोत्रं शुद्धान्नैः लवणव्यञ्जनान्वितैः ।
कुर्यात्प्राणाहुतेरन्नं निगरेन्न तु चर्वयेत् ॥

इत्यादि वर्तते । यद्यपि–

पञ्च प्राणाहुतीः कुर्यात् शुद्धान्नैरभिघारितैः ।
उच्छिष्टेन घृतन्दद्यात् प्राग्घुतेर्लवणान्वितम् ॥ इति ।

हारीतवचनेन लवणरहितस्यैव प्राणाहुतिसाधनत्वं प्रतीयते । तथापि पूर्वोदाहृतबोधायनादिप्रबलतरवचननिचयानुरोधेन हुतेः प्राक् लवणान्वितं कुर्यादित्यङ्गीकार्यम् । धातूनामनेकार्थत्वात् । परिषेचनात्पूर्वमेव व्यञ्जनपरिवेषणस्यावश्यकत्वमनुगृहीतम् । मंचसालकट्टवेदान्ताचार्यैः सत्क्रियाकल्पमञ्जर्याम्– भगवन्निवेदितं हुतशिष्टं पाकपात्रस्थशेषं च हविष्यव्यञ्जनादिपरिवेष्यभिघार्येति । तदुत्तरत्र–

पर्जन्यात्मा स भगवान् सिद्धये व्यञ्जने स्थितः ।

इत्युक्तम् । श्रीमन्निगमान्तगुरुभिः आहारनियमाख्यद्राविडदिव्यप्रबन्धे– வாசலல்லா வாசலால் வந்த சோறு मित्यारभ्य त्याज्यांशप्रपञ्चनावसरे अनिषिद्धत्वात् । पञ्चदशगाथायाम्–

கரி, மோர், பால், நெய் கலந்த சோறு मित्युनुगृहीतत्वात् । अप्रतिषिद्धमनुमतमिति न्यायात् । तेषामेवमेवाभिमतत्वं स्फुटमवगम्यते । ननु अत्रोक्तद्राविडरूपवाक्ये भुक्त्यर्थमात्रार्थकत्वात् । न परिषेचनात्प्राक् दानार्हत्वमुक्तमिति चेत् उच्यते । भोजनकाले तदर्हसामान्यस्य परिषेचनादीनां नैयत्यात् द्राविडवाक्योक्तपदानां तदर्हत्वम् । तत्रैव आचार्यपात्रभुक्त्यनुज्ञावसरे द्वादशगाथायाम्– தாதநல்லாசிரியன் தமயனெச்சில் इत्यत्र

மயிர், புழு, நூலிருந்தாலும் புனிதமா मिति स्थले । கரியிருந்தாலும் புனிதமாம்मित्युक्तिस्सम्भवेदेव விழுந்தாலும் புனிதமாமிதி पाठेऽपि शुक्तिमध्ये तेषां पतनेऽपि शुक्त्यर्थत्वोक्त्या भगवन्निवेदितपूर्वस्थितव्यञ्जनादीनां सत्वे शुक्त्यनुज्ञानस्य कैमुतिकन्यायसिद्धिः किंच श्राद्धावसरे—

अन्नं च पायसं भक्ष्यं हव्यं सव्यञ्जनं कव्यं सव्यञ्जनं हुतशेषं, भुक्तशेषाच्चान्नमादाय सव्यञ्जनं तिलमिश्रं पिण्डषट्कं कृत्वेत्याद्युक्त्या सव्यञ्जनस्यैव दानाद्युक्तेः प्रत्यहं व्यञ्जनप्राथम्यं श्राद्धे त्वन्नप्राथम्यं उभयत्रापि परिषेचनात्पूर्वमेवेति स्फुटतरमवगम्यते । नोचेत् अन्नं च पायसं भक्ष्यमित्युक्तेः असंभवत्वापत्तिः । प्रत्यहवत्परिविष्येति । मित्रतातगुरुभिः ग्रन्थनिर्वाहसंभवात् । किंच श्रुतिस्मृत्योर्विरोधे तु श्रुतिरेव बलीयसी इति न्यायात् । अत्रोदाहृतबोधायनादिसूत्राणां व्यासादिस्मृतीनां च प्रबलत्वेन प्राग्घृतदानाभावविषयत्वात् । अकिञ्चित्करहारीतश्लोकस्य दुर्बलतया, तस्माद्धर्मविरोधे तु निश्चित्य गुरुलाघवं यतो भूयस्ततो विद्वान् कुर्याद्धर्मविनिर्णयं भूयसां स्याद्बलीयस्त्वं इत्यादि न्यायात् निष्पक्षपातप्रमाणशरणानां अयमेवाचारः स्वरसः ॥

धनुर्मासविधौ भगवन्निवेदितमुद्गान्नादिभिरेव प्राणाहुतिविधानस्य श्रीपाञ्चरात्रादिषु प्रसिद्धत्वात् आचाराच्च । तथाहि श्रीपाञ्चरात्रे— कोदण्डस्थे सवितरि प्रत्यूषे पूजनात् हरेः ।

सहस्रवार्षिकी पूजा दिनेनैकेन लभ्यते ॥

तुलसीकाष्ठवह्नौ यः पाकं कृत्वा निवेदयेत् ।
हरये मार्गशीर्षे तु मुद्गान्नमरुणोदये ॥
तस्य पुण्यफलं वक्तुं नाहं शक्नोमि नेतरः ॥ इति ।

आग्नेयपुराणे धनुर्मासमाहात्म्ये–

चापमासे तु संप्राप्ते सर्वकर्म विहाय वा ।
सूर्योदये समाप्याथ पश्चाद्वाप्याह्निकं चरेत् ॥

स्मृतिरत्नाकरे ज्योतिश्शास्त्रे भास्करीये–

अयनं दक्षिणं रात्रिः उत्तरन्तु दिवा भवेत् ।
दैवतं तदहोरात्रं तत्त्रिंशन्मास उच्यते ॥

तद्दिनस्य उषःकालं चापमासं विदुर्बुधाः ।
तस्मात्सर्वप्रयत्नेन चापमासे दिने दिने ।
उषःकाले तु संप्राप्ते बोधयित्वा जगत्पतिम् ॥

तमभ्यर्च्य भजेद्विष्णुं जनानां दोषशान्तये ।

आदित्यपुराणे–

चापं गते तवस्सूर्ये प्रत्यूषे स्नानमाचरेत् ।
अर्चयेच्च जगन्नाथं यावत्सूर्योदयात्पुरा ॥

ततः प्रभातसमये अर्घ्यं प्रक्षिप्य वैष्णवः ।
गायत्रीं च ततो जप्त्वा उपतिष्ठेत भास्करम् ॥

अतः प्रागुदयाद्देवार्चनं विष्ण्वर्चनानन्तरमेव सन्ध्योपासनमिति सिध्यति । स्मृतिमुक्ताफले ब्रह्माण्डे–

चापं गते दिवानाथ उत्थाप्य शयनाद्धरिम् ।
उषःकाले तु संप्राप्ते अर्चयित्वा जनार्दनम् ।
उपचारैष्षोडशिभिः मुद्गान्नं च निवेदयेत् ॥ इति ।

सच्चरित्रपरित्राणे धनुर्मासमाहात्म्ये–

यथा संकोच्य सत्कर्म भुङ्क्तेऽल्पद्वादशीदिने ।
तथा प्रातर्धनुर्मासे त्यक्त्वा कर्मार्चयेत् हरिम् ॥

अतस्त्वमपि राजेन्द्र चापस्थेऽर्केऽरुणोदये ।
जप्त्वा लक्ष्मीस्तवं विष्णोः मुद्गान्नं च निवेदय ।
द्विजान्भोजय भक्त्या च मुद्गान्नेनातिपावनान् ॥ इति ।

अरुणोदये मुद्गान्नेन यागानुयागावुक्तौ मुद्गं चरुं निर्वपेत् । श्रियै श्रीकामः इति मुद्गस्य लक्ष्मीदैवत्यश्रवणात् मुद्गान्ननिवेदनस्य लक्ष्मीस्तवजपाङ्गत्वमुक्तम् "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इतिवत् लक्ष्मीशब्देन भुवोऽभिधानात्, लक्ष्मीशब्देन भूदेव्यवतारगोदाकृत त्रिंशत्संख्याकद्राविडगाथास्तवो विवक्षितः ॥ इति ।

तथोक्तं भगवच्छास्त्रे—

कोदण्डं भास्करे प्राप्ते पूजां कुर्यात्तु वैष्णवः ।
विष्णोर्भानूदयात्पूर्वं मुद्गान्नादिनिवेदनैः ॥

सुगन्धं कुसुमैर्धूपदीपाद्यैस्तुलसीदलैः ।
गोक्षीराद्यभिषेकेन कुर्यादाराधनं हरेः ॥

निवेदयित्वा मुद्गान्नं शर्कराद्यादिसंयुतम् ।
गोदागाथाः पठित्वाऽथ सर्वाः श्रीवैष्णवैस्सह ॥

फले द्वे नैगमनिके गाथे तत्फलदे शुभे ।
ततो गाथां पठेन्नित्यं तथा भुञ्जीत वै स्वयम् ॥ इति ।

श्रीपाञ्चरात्रे कपिञ्जलसंहितायां, नारदं प्रति ब्रह्मा—

उदयात्पञ्चघटिकात्प्रागुत्थाय प्रयत्नतः ।
स्नानं कृत्वा प्रथमतो नित्यकर्म समाचरेत् ॥

कृत्वा सन्ध्यादिकं चापि वेदमातुर्जपन्तथा ।
यथोचितं कर्म कृत्वा देवपूजां समाचरेत् ॥

यथा संकोच्य तत्कर्म भुङ्क्तेऽल्पद्वादशी दिने ।
तथा प्रातर्धनुर्मासे सर्वकर्माऽल्पमाचरेत् ।
सूर्योदयात्पूर्वमेव ब्राह्मणानां तु भोजनम् ।। इति ।

आदित्यपुराणे–

चापं गते ततस्सूर्ये प्रत्यूषे स्नानमाचरेत् ।
ऊर्ध्वपुण्ड्रादिसंध्यान्तं जपकर्माणि कारयेत् ।।

अर्चयेच्च जगन्नाथं यावत्सूर्योदयात्पुरा ।
संध्यादिपञ्चयज्ञान्तं कृत्वा भोजनमाचरेत् ।।

सूर्योदयात्पूर्वमेव चापमासे तु भोजनम् ।
सूर्योदयात्परं भुक्तिर्व्यर्थमेवासुराय वै ।। इति ।

आग्नेयपुराणे–

यथा संकोच्य सत्कर्म भुङ्क्तेऽल्पद्वादशीदिने ।
तथा प्रातर्धनुर्मासे त्यक्त्वा कर्मार्चयेद्धरिम् ।।

उषःकाले द्वयं कुर्यात्प्रातर्माध्याह्निकं तथा ।
सूर्योदयात्पूर्वमेव ब्राह्मणानां तु भोजनम् ।।

उत्तमोत्तममेवेति साधुभिः कीर्त्यते सदा ।
तस्मात्सर्वप्रयत्नेन भोजनं चोदयात्पुरा ।
यागानुयागयोरङ्गं भानोरुदयतः पुरा ।। इति ।

ईश्वरसंहितायां त्रयोदशाध्याये–

कोदण्डस्थे दिनकरे तत्काले संक्रमे द्विजाः ।
संस्नाप्य देवदेवेशं अधमोत्तममार्गतः ।
अलङ्कारासनं नीत्वा ह्यर्घ्याद्यैः परिपूज्य च ।। इति ।

तत्रैव–

निवेदितान्नभक्ष्यादीन् विष्वक्सेनादिकस्य च ।
भक्तानां च निवेद्याथ देवदेवं श्रियः पतिम् ॥

प्रदक्षिणीकृत्य तथा प्रणम्य च यथाविधि ।
तोषयेद्वैष्णवैर्देवं स्तोत्रैर्नानाविधैस्तथा ॥

संस्कृतैर्द्राविडैर्वापि वेदपारम्यसूचकैः ।
ततस्तु वैष्णवाग्र्याणां वैष्णवस्तुतिगायिनाम् ॥

तीर्थं निवेदितान्नादीन् दद्याद्देवस्य सन्निधौ ।
वैष्णवा भगवद्भक्ता गृहीत्वा विनयान्विताः ॥

पीत्वा तीर्थं प्रसादं च भक्षेयुर्देवसन्निधौ ।
आरभ्य संक्रमादेवं मासान्तं मुनिपुङ्गवाः ॥

अरुणस्योदयात्पूर्वं समाराध्य यथाविधि ।
मुद्गान्नपायसान्नादीन् भक्ष्याणि विविधानि च ॥

निवेदयेच्च देवाय भक्तेभ्यश्च दिने दिने ।
भक्तप्रणीतगाथाभिः स्तुवीत पुरुषोत्तमम् ॥ इति ।

श्रीपाञ्चरात्रे–

ततो गाथां पठेन्नित्यं देवाग्रे उपसंहरेत् ।
भानोरुदयतः पूर्वं तथा भुञ्जीत वै स्वयम् ॥

स्वावनुदिते तूर्णं नित्यनैमित्तिकादिकम् ।
कृत्वा सर्वं महाभागैः स्वयं भुञ्जीत वैष्णवैः ॥

प्रातःकाले तु वै नित्यं भोजयेद्वैष्णवान् सुधीः ।
मासमेकं धनुः प्रत्यं स भवेद्विष्णुनन्दनः ॥

यो नित्यकर्मलोपोऽत्र भवेदिति भिया तदा ।
विष्णुमाराध्य विधिवत् यो न भुङ्क्ते न वैष्णवः ॥

द्वादशी शेषसंयुक्ता तिथिर्या पारणे स्मृता ।
भानोरुदय एवैवं मासे मार्गशिरे तथा ॥

तत्रोदयेऽखिलं कर्म नित्यनैमित्तिकादिकम् ।
द्वादश्यान्तु यथाकार्यं तथा कोदण्डगे रवौ ॥

मार्गशीर्षे धनुर्मासि कोदण्डं याति भास्करे ।
भास्करोदय एवैतत्सर्वकर्म समाचरेत् ॥

तत्राराध्य हृषीकेशं गोदागाथाः पठन् द्विजः ।
तदैव वैष्णवैस्साकं अद्यात्समय आदिमे ।
शेषद्वादशिकोऽपि स्यान्मासः कोदण्डनामकः ॥ इति ।

दिवा वा यदि वा रात्रौ धनुस्संक्रमते रविः ।
तत्काले पूजयेद्विष्णुमुषःकाले ततःपरम् ॥

धनुस्संक्रान्तिकाले तु पूजां लोपयते यदि ।
तन्मासपूजा व्यर्था स्यात्तस्य सर्वं निरर्थकम् ॥

धनुस्संक्रान्तिकाले तु मुद्गान्नं च निवेदयेत् ।
द्रामिडश्रुतिसूक्तिं च विज्ञाप्य पुरतो हरेः ।
तीर्थं प्रसादं स्वीकृत्य ह्युपचारान् क्षमस्व मे ॥

इति विज्ञाप्य देवेशं स्तोत्रैः स्तुत्वा प्रणम्य च ।
कवाटं बन्धयेद्भक्त्या ह्यनुयागं समाचरेत् ॥ इति ।

वैखानसे मार्गशिरोत्सवाध्याये–

मत्प्रसादं च भक्ताश्च भुञ्जन्तः प्रातरेव हि ।
गृहार्चां वैश्वदेवानां कृत्वा द्वादशिवच्चरेत् ॥

श्रीपाञ्चरात्रे नारायणसंहितायाम्–

कोदण्डाख्ये रवौ विप्रः स्नात्वा प्रत्युषसि स्वयम् ।
समाराध्य जगन्नाथं नित्यं भक्तिसमन्वितः ॥

मुद्गान्नमादरान्मह्यं विनिवेद्य गुणोत्तरम् ।
प्राबोधकीं सूक्तिमालां गोदोक्तां द्रामिडश्रुतिम् ॥

त्रिंशद्गाथात्मिकां दिव्यां स्मृतिरूपां मम प्रियाम् ।
भक्ताङ्घ्रिरेण्वभिहितप्रबोधोक्तोक्तिपूर्वकम् ॥

गाथापूर्वार्धोत्तरार्धानुसन्धानक्रमाद्रमे ।
प्रीत्यानुसंदधानैस्तैः देशिकैर्मत्परायणैः ॥

सार्धन्तामनुसन्धाय कृत्वा निगमनं ततः ।
तासु गाथासु गोदोक्ता स्वेकैकां प्रत्यहं पुनः ॥

अनुसन्धाय तत्काले तन्मासे पुरतो मम ।
मत्प्रसादं ततो भुक्त्वा कृतकृत्यो भविष्यति ॥ इति ।

ननु, सव्यञ्जनपरिषेचनप्रतिपादकं वचनं पात्रद्वयासादनपर-मिति चेन्न । पदार्थबाहुल्यपरिवेषणाय सौकर्यार्थमन्तरेण पात्रद्वयस्य कुत्राप्यनुक्तेः ॥

आह्निकग्रन्थेष्वपि विशिष्यानुक्त्या पात्रैकत्वावगमात् । प्रायश-स्तथा शिष्टाचाराच्च । क्रतुनाथार्यवंश्यैः तच्छिष्यैरद्याप्येवमेव अनु-ष्ठानस्य विद्यमानत्वाच्च । इत्थं च निष्पक्षपातिनः सन्तः प्रपन्नाः

अत्रोदाहृतप्रबलतरप्रमाणसंप्रदाय अनेकन्यायपर्यालोचनया शुभदिने व्यञ्जनप्राथम्यं तदितरदिने अन्नप्राथम्यं उभयत्रापि परिषेचनप्राणाहुत्योः प्रागेवेति विदां कुर्वीत इति निरवद्यम् । अतः प्रपन्नैः अन्नपरिवेषणात्पूर्वं व्यञ्जनपरिवेषणं कर्तव्यमेवेति सिद्धम् ॥

इति श्रीसदनुष्ठानदर्पणे प्रथमतो व्यञ्जनपरिवेषणविषयो नाम
पञ्चविंशप्रतिफलनम् ॥

श्रीसदनुष्ठानदर्पणे

(हस्तेन प्रसादादिदानविषयो नाम)

॥ षड्विंशप्रतिफलनम् ॥

प्रपन्नैः भगवन्निवेदितप्रसादादीनां हस्तेन दानमुपपन्नम् । प्रमाणसद्भावात् शिष्टाचाराच्च ॥

तथाहि सच्चरित्रपरित्राणे उपवासे हारीतः –

कृपादत्तं हस्तगतं विष्णुभुक्तोज्झितं तु यः ।
उपवासच्छलान्नात्ति तेन भुक्तं सुरासमम् ॥

विष्णोः प्रसादं तुलसीं तीर्थं वापि द्विजोत्तमः ।
उपवासदिने चैवं प्राश्नीयादविचारयन् ॥ इति ।

अत्र हस्तगतमित्यनेन–

हस्ते ददाति यः स्नेहं लवणं व्यञ्जनादिकम् ।

दाता तु नरकं यातीत्येतत् विष्णुभुक्तोज्झितव्यतिरिक्तविषयमिति लब्धम् । अतो भगवन्निवेदितस्य हस्ते दानं युज्यते । अत एव हस्तेन दानं उपपन्नम् ॥

श्रीपाञ्चरात्रे–

विष्णुभक्तकतीर्थन्तु पीत्वा धृत्वोर्ध्वपुण्ड्रकम् ।
न क्षालयेत् करं विद्वान् नैवेद्यप्राशनेऽपि च ।
क्षालयेद्यदि मोहेन पञ्चपातकमाप्नुयात् ॥ इति ।

श्रीवराहे–

पिबेत्पादोदकं यस्तु वैष्णवानां ममापि वा ।
न तत्राचमनं कुर्यात् यथा सोमे द्विजोत्तमः ॥ इति ।

वाधूलस्मृतौ–

आम्रेक्षुखण्डताम्बूलचर्वणे सोमपानके ।
विष्णवङ्घ्रितोयपाने च नाद्यन्ताचमनं स्मृतम् ॥

विष्णोः प्रसादं तत्तीर्थं गन्धं च तुलसीदलम् ।
शूद्रशेषमिति ब्रूयात्तमाहुर्ब्रह्मघातुकम् ॥ इति ।

प्रसादनिर्वचनं भगवच्छास्त्रे प्रकारं प्राणरक्षार्थं सकारं सर्वशक्तिदम्, दकारं देहशुद्ध्यर्थं प्रसादो नाम तत्स्मृतम् ॥ इति ।

श्रीपाञ्चरात्रे–

विष्णोर्नैवेद्यशेषस्य तीर्थपादोदकस्य च ।
पुरोडाशस्य सोमस्थं शेषदोषो न विद्यते ॥ इति ।

तत्रैव– मत्प्रसादे न दोषोऽस्ति करस्थान्नस्य भक्षणे ।
मदङ्घ्रितीर्थपाने च नाद्यन्ताचमनं स्मृतम् ॥ इति ।

उपवासदिने बोधायनः –

एकादश्यां तु यो विप्रो नारायणपदच्युतम् ।
तीर्थं प्रसादं नाश्नीयात् विष्णुभङ्गकरो द्विजः ॥

भगवन्मन्दिरे दत्तं कृपयैवोदनं यदि ।
तत्रामलकमात्रं तु प्राशयेत् हरिवासरे ॥
बदरीफलमात्रं वाप्यथवा तिलमात्रकम् ।
उपवासदिनेऽश्नीयात्प्रसादं विष्णुमन्दिरे ।
न तत्राचमनं कार्यं यथा सोमे नरोत्तम ॥

दत्तात्रेयः—भगवन्मन्दिरं गत्वा प्रसादं परमेष्ठिनः ।
उपवासे तु नाश्नीयात्स एव हरिकण्टकः ॥

व्यासस्मृतौ—विष्णोः श्रीपादसलिलं प्रसादमघनाशनम् ।
उपवासदिने वापि प्राशयेदविचारयन् ॥

पराशरसंहितायां त्रयोदशाध्याये पुरुषोत्तमस्थलमाहात्म्ये—
भक्षयेद्विष्णुनैवेद्यं एकादश्यां व्रतादिषु ।
एकादश्यादिसिद्ध्यर्थं विष्णुसायुज्यहेतवे ॥ इति ।

हारीतस्मृतौ—कृपादत्तं हस्तगतं विष्णुभुक्तोज्झितं तु यः ।
उपवासच्छलान्नात्ति तन भुक्तं सुरासमम् ॥ इति ।

अत्र हस्तगतमित्यनेन व्यञ्जनन्तु कराग्रेण हस्तेन हस्तयोर्दद्यात् लवणं व्यञ्जनादिकम् ॥

दाता (च) तु नरकं याति भोक्ता भुञ्जीत किल्बिषम् ।

इत्यादिकं विष्णुभुक्तशिष्टभिन्नविषयमिति प्रतीयते । आचमन, शौचदोष, परिषेचनराहित्यं उपवासदिनेऽपि स्वीकरणं च लब्धम् । निर्णयसिन्धौ, कार्ष्णाजिनिः ॥

दर्व्या देयं घृतं चान्नं समस्तव्यञ्जनानि च ।
उदकं चैव पक्वान्नं नो दर्व्या तु कदाचन ॥ इति ।

दर्व्या दानप्रतिपादकवचनं, भगवदनिवेदितविषयम्। न हि दर्व्याऽऽलयादौ कुत्रापि दर्व्या व्यञ्जनप्रसादादिविनियोगः क्रियते। यथा, वस्त्रजलस्य दुष्टत्वेऽपि श्रीधरसंहितायां द्वात्रिंशाध्याये—

श्रीपतेरभिषेकार्द्रस्नानशाटीपयश्शुभम्।
पिबेत्तेनैव चाङ्गानि प्लावयेद्वैष्णवो बुधः॥ इति।

श्रीपाञ्चरात्रे—हरेरार्द्रपटी तीर्थं एनो हन्ति पिबेत्तु यः।
अश्वमेधफलं प्राप्य विष्णुलोकं स गच्छति॥

वासश्च चन्द्रदैवत्यं हरेरार्द्रपदोदकम्।
यतो नाऽमृतपानं स्यात् स्वीकारो नो मलापहः॥ इति।

कौबेरसंहितायां चत्वारिंशाध्याये—

शाटीयुक्तेन हस्तेन गृहीत्वा तीर्थमब्जज।
परमाणुसमं तीर्थं यावत्तु पतितं भुवि।
सहस्रकोटिवर्षाणि तत्क्षणान्नरकं व्रजेत्॥ इति।

अन्यत्र—तीकारं देहशुद्ध्यर्थं र्थकारं मुक्तिसाधनम्।
अक्षरद्वयसंयुक्तं तीर्थनामाभिधीयते॥

गोकर्णाकारवत्कृत्वा माषमग्नजलं पिबेत्।
तन्न्यूनमधिकं पीत्वा सुरापानसमं भवेत्॥

वस्त्रं च द्विगुणीकृत्य पाणि पाणौ निधाय च।
पवित्रं विष्णुपादाम्बु त्रिः पिबेत् बिन्दुवर्जितम्॥

प्रथमं कायशुद्ध्यर्थं द्वितीयं धर्मवर्धनम्।
तृतीयं मोक्षदं प्रोक्तं तस्मात्तीर्थं पिबेत् त्रिधा॥

इत्युक्तत्वेन भगवदीयत्वमाहात्म्यात् । प्रपन्नैः शाटीयुक्त-हस्तेन त्रिवारं स्वीकृतदिव्यार्द्रस्नान शाटीतीर्थस्य परमपावनत्वं तद्वत् हस्तदत्तव्यञ्जन अन्नादेः निषिद्धत्वेऽपि हस्ते दत्तभगवन्निवेदितव्यञ्जन-प्रसादादेः परमपावनत्वम् । अतः भगवत्प्रसादस्य हस्ते दानमुप-पद्यते । अत एव हस्तेन दानं समीचीनम् । तत् ग्रहार्चानिवेदित-विषयेऽपि संप्रतिपन्नम् ॥

तथैव काश्यपस्मृतौ—

लवणव्यञ्जनादीनि दर्व्या देयानि नित्यशः ।
तानि सर्वाणि भोज्यानि न भोज्यान्यन्यथा यदि ॥ इति

भगवदनिवेदित सव्यञ्जनान्नादेः हस्तेन दाननिषेधमुक्त्वा तदुत्तरत्र— निवेदितमिदं सर्वं अन्नं सव्यञ्जनं हरेः ।

तस्याहारे च दाने च न शास्त्रं नैव च क्रमः ।
अन्नं सव्यञ्जनमिदं भुञ्जीत नियतश्शुचिः ॥ इति ।

काश्यपमहर्षिणा भगवन्निवेदित सव्यञ्जनान्नादेः हस्तेन दानादौ निषेधाभावप्रतिपादनात् । अतः प्रपन्नैः भगवन्निवेदितप्रसादा-दीनां हस्तेन दानं कार्यमिति सिद्धम् ॥

इति श्रीसदनुष्ठानदर्पणे हस्तेन भगवत्प्रसादादिदानविषयो नाम षड्विंशप्रतिफलनम् ॥

(सालग्रामोदकेन आपोशनद्वयकरणविषयो नाम)

॥ सप्तविंशप्रतिफलनम् ॥

प्रपन्नाः सालग्रामतीर्थादिसंमिश्र पतद्ग्रहतीर्थेन अनुयागसमये आपोशनद्वयं कुर्वन्ति तदुपपन्नमेव। वचनात् शिष्टाचाराच्च ॥

तथाहि हारीतस्मृतौ–

सालग्रामोद्भवैस्तीर्थैः कुर्यादापोशनं द्विजः ।
अन्यथा कुरुते यस्तु ब्रह्महत्यां स विन्दति ॥

वसिष्ठस्मृतौ– विष्णुपादोदकेनैव कुर्यादापोशनद्वयम् ।
अन्योदकेन यत्कुर्यात् स सुरापी न संशयः ॥ इति ।

वासिष्ठसंहितायां तृतीयाध्याये–

विष्णुपादोदकेनैव कुर्यादापोशनं ततः ।
आपोशनं न कुर्वीत विष्णुपादोदकं विना ॥ इति ।

उत्तरापोशनं कुर्यात् विष्णुपादोदकेन तु ।
तत उत्थाय संत्यज्य पात्रं चासंस्पृशन् द्विजः ॥

शोधयेन्मुखहस्तौ च मृद्भिस्सङ्घर्षणैरपि ।
द्विरष्टवारं गण्डूषं भोजनान्ते समाचरेत् ॥ इति ।

स्मृतिरत्नाकरे शाण्डिल्यः –

भोजनाद्यन्तयोर्दिव्यपादाम्भ्वेकं समन्त्रकम् ।
पिबेदवश्यं सद्भक्तो मिश्रितं वार्हणादिभिः ॥ इति ।

अर्हणतीर्थलक्षणमुक्तम् । श्रीपाञ्चरात्रे नळकूबरसंहितायाम्—

शीतलोदकसंयुक्तमेलाकर्पूरसंयुतम् ।
मन्दोष्णं वासनायुक्तमर्हणाम्भ इति स्मृतम् ॥ इति ।

तत्रैव पतद्ग्रहगतं तीर्थं ग्राह्यं दक्षिणहस्ततः ।
पिबेत्तेनैव चाङ्गानि प्लावयेद्वैष्णवश्शुचिः ॥ इति ।

नात्र उच्छिष्टदोषावकाशः कण्ठभूषणे—

मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च ।
नोच्छिष्टस्य भवेद्दोषस्त्वत्रेस्तु वचनं यथा ॥

अप्सु अमृतोपस्तरणमसीत्यादिषु प्राणाहुतीषु मन्त्रोच्चारण-दोषो नास्ति नोच्छिष्टत्वाभावादिति । अत्र आपोशनार्थं पात्रान्तरे पाद्यं निधातव्यम् ॥

हरिपादोदकेनैव कुर्यादापोशनद्वयम् ।
नाभिषेकोदकेनापोशनं कुर्यान्निषेधतः ॥

इत्युक्तेरिति चेन्न तथा शिष्टाचाराभावात् । श्रीपाञ्चरात्रे—

पतद्ग्रहं सरोजाभं सुवर्णादिविनिर्मितम् ।
वृत्तपादसमायुक्तं हस्तमानोन्नतं शुभम् ॥ इति ।

श्रीवैखानसे अर्चनानवनीते—

बिम्बाधाराधायुतं वापि सुवर्णरजतादिभिः ।
धुत्तूरकुसुमाकारं कारयेत पतद्ग्रहम् ॥ इति ।

श्रीपाञ्चरात्रे—प्रकल्पयेदुद्धरणीं तालपानां यथारुचि ।
प्रस्थार्धपूर्णसंयोग्यां नागाग्रां पङ्कजां तु वा ।
कालीयमर्दनं वापि कल्पयेच्छिल्पिवित्तमः ॥ इति ॥

श्रीपाञ्चरात्रे वासिष्ठसंहितायां द्वितीयाध्याये-

आत्मनः पुरतस्तत्र स्वास्तीर्णपीठिकोपरि ।
आग्नेयादिषु कोणेषु पाद्यार्घ्याचमनीयकम् ॥

स्नानीयपात्रमैशान्यां सर्वार्थं मध्यतो न्यसेत् ।
पञ्चपात्राण्येवमेव कल्पयित्वा विधानतः ॥

प्रतिग्रहं दक्षिणतो विन्यसेत्पात्रमुत्तमम् ।
पूजाद्रव्याणि चान्यानि विन्यसेत्स्वस्य दक्षिणे ॥ इति ।

अर्चनानवनीते-पञ्चपात्राणि चाग्रे तु त्रिपादोपरि विन्यसेत् ।
तस्योत्तरे पतद्ग्राहं धूपदीपादिकांस्तथा ॥ इति ।

तत्रैव- उद्धरण्याधिपं सोमं समभ्यर्च्य मृदाधिपम् ।
उद्धरण्यार्घ्यपाद्यादि जलपात्रेषु तज्जलम् ।
यथार्हं किञ्चिदुद्धृत्य दत्वा दद्यात्पतद्ग्रहे ॥ इति ।

श्रीमद्वरवरमुनिप्रणीतसंस्कृताराधानकारिकायाम्-

उद्धृत्य सलिलं श्रीमद्रामावरजयोगिने ।
नम इत्युच्चरन् दद्यात् त्रिचतुर्वापि तद्ग्रहे ॥ इति ।

भगवच्छास्त्रे-

पतद्ग्रहगतं तीर्थं गृहे दक्षिणहस्ततः ।
पिबेत्तेनैव चाङ्गानि प्लावयेद्वैष्णवो बुधः ॥

इत्यादिभिः आराधनकाले सर्वतीर्थं निक्षेपार्थं पतद्ग्रहपात्र, विष्णु-उद्धरणीलक्षण, तद्विन्यसनस्थानतत्तीर्थग्रहणादेरुक्तत्वात् । सालग्रामोदकस्यापि अभिषेकतीर्थत्वेन पादोदकस्यापि अभिषेकतीर्थ-

त्वेन भगवच्छास्त्रादौ श्रीरतेरभिषेकार्द्रस्नानशाटीपयश्शुभमित्यादिभिः अभिषेकसिक्तस्नानवस्त्रतीर्थादेः परिशुद्धिकरत्वेन तीर्थविनियोगस्य कर्तव्यत्वप्रतिपादनेन अभिषेकतीर्थस्य आपोशनानर्हत्वपक्षस्य प्रपन्नजनकूटस्थ श्रीशठकोपसूर्याचार्य, श्रीविष्वक्सेननिवेदिताग्रहणपक्षस्येव प्रपन्न श्रीवैष्णवानादरणीयत्वात् ॥

नारायणसारसंग्रहे–

> स्नानपादोदकं दत्वा पिबन् शिरसि धारयेत् ।
> पुण्यपापविनिर्मुक्तो वैष्णवीं गतिमाप्नुयात ॥ इति ।

विशिष्य, अभिषेकोदक, पादोदकतीर्थग्रहणस्य सर्वपापहरत्वोक्तेः । भूयसां स्यात् बलीयस्त्वमिति न्यायेन तन्त्रेण सर्वतीर्थग्रहणार्थं पतद्ग्रहपात्रस्य निक्षिप्तत्वेन पतद्ग्रहतीर्थस्य सालग्रामोदकत्वेन अभिषेकतीर्थत्वेन हरिपादोदकत्वेन भक्तपूजावशिष्टतीर्थत्वेन सर्वतीर्थस्य स्वोद्देश्यकतया मिश्रितं बार्हणादिभिः इति वचनबलेन सर्वतीर्थग्रहणस्य आवश्यकत्वप्रतिपादनेन च आपोशनद्वये तथाविधपतद्ग्रहतीर्थस्वीकारे दोषगन्धस्याप्यभावाच्च । अत एव एतत् सर्वं मनसि कृत्वा चिरोपासितत्रैविद्यवृद्धा महान्तः तथा अनुतिष्ठन्ति । क्वचिद्दिव्यालयभगवन्निवेदितप्रसादादिनां गृहार्चानिवेदनमप्युपपन्नम् ॥ भगवच्छास्त्रे–

> स्वयंव्यक्तहरेश्शेषं ग्रामदेवाय चार्पयेत् ।
> ग्रामदेवहरेश्शेषं गृहदेवाय चार्पयेत ।
> गृहदेवहरेश्शेषं अर्पयेदन्तरात्मने ॥ इति ।

ग्रामदेवः मानुषप्रतिष्ठितः भगवान् । नारायणसारसंग्रहे वसिष्ठस्मृतौ– स्वयं व्यक्तादि स्थानानि श्रीरङ्गं वेङ्कटाद्रयः ।

> यद्भुक्तशेषमानीय ग्रहबिम्बे निवेदयेत् ॥

उशनाः आह– ग्रामप्रतिष्ठा शेषं तु गृहार्चायां निवेदयेत् ।
ततोऽन्तर्यामिणे दद्यात्स्वयं भुञ्जीत वैष्णवः ॥ इति ।

सच्चरित्रपरित्राणे शाण्डिल्यः –

प्रापणं भगवद्भुक्तं लब्ध्वा भागवतेन तत् ।
पुनरिष्ट्वैव मोक्तव्यं दानं तस्य न चेष्यते ॥

मूर्त्यन्तरेण संयुक्तं अयत्नेन समागतम् ।
स्वमन्त्रमूर्त्यै संचिन्त्य मनसा तत्समर्पयेत् ॥ इति ।

एतेन श्रीनगर्यादिषु भगवत्पराङ्कुशादिभ्यो निवेदितस्यापि गृहार्चने भगवते निवेदनं पूर्वोक्तप्राणाहूतिन्यायादुपपन्नम् । यदन्नः पुरुषो भवति । तदन्नास्तस्य देवताः इति स्मरणाच्च । अतो यथा सम्प्रदायं तन्निवेदनमुपपन्नमित्याद्युक्तः । प्रापणलक्षणमुक्तं भगवच्छास्त्रे– गोधूमतण्डुलं पिष्टं शर्करामधुसंयुतम् ।
पयोभिराज्यसंयुक्तं प्रापणं समुदाहृतम् ॥ इति ।

श्रीवेङ्कटाचल ऐतिह्यमालायाम् –

देवार्पितैर्गन्धमाल्यैः हविषा च महर्षयः ।
आचरन्तोऽर्चनां विष्णोः ऊषुस्तेऽत्र महीधरे ॥

என்று ब्रह्मोत्तरத்திலே ஆறுமத்யாயத்திலே स्थलवासिகள் தங்கள் गृहाराधनங்களுக்கும க்ரியோद्यानங்களிலே पत्रपुष्पादिகளை சங்கிரகியாமல் திருவேங்கடமுடையான் சாத்தியருளின पत्रपुष्पाதிகளைக்கொண்டே திருவாராதனத்துக்குமுபயோகித்துக்கொண்டு அந்த சேஷங்கொணடே தாங்களும் ஜீவிக்கும்படிக்கும பாஷ்யகார் நியமித்தாரிதி.

क्वचित् अकस्मात्समागतस्य वस्तुनः मनसा भगवते निवेद्य तत्स्वीकरणमप्युपपन्नम् । सच्चरित्ररक्षायां अकस्मात्समागतस्यापि मनसा निवेद्यैव भोक्तव्यत्वमुक्तम् । तदकस्मात्प्रवृत्तं च भोजने मनसापि चेति अश्नीयादिति शेषः इति ॥

शाण्डिल्यस्मृतौ–शुद्धं वस्तु समायान्तं मनसा तन्निवेद्य च ।
अश्नीयान्मिश्रितं कृत्वा साक्षात्पूर्वनिवेदितैः ॥

इत्याद्युक्तेः । आशौचिनां भगवच्छास्त्रे–

सूतकाशौचिनां पुंसां मृतकाशौचिनां तथा ।
आर्तवानां तु नारीणां निवेद्यान्नं न दापयेत् ॥

दापयेद्यदि वै तेषां निवेद्यान्नं चतुर्मुख ।
दाता दापयिता भोक्ता रौरवं नरकं व्रजेत् ॥

इत्यादिभिः भगवत्प्रसादादेः अग्राह्यत्वप्रतिपादनेऽपि दाल्भ्यः–

विष्णोर्नैवेद्यमश्नीयाद्वैष्णवस्तु विशेषतः ।
शतजन्मकृतं पापं तत्क्षणादेव नश्यति ॥

परमेष्ठिसंहितायाम्–

विष्णुनैवेद्यं संत्यज्य यः कुर्यादन्नभक्षणम् ।
स याति नरकं घोरं यावच्चन्द्रदिवाकरौ ॥

इत्यादिना भगवदनिवेदितस्य सर्वथा अग्राह्यत्वप्रतिपादनेन शिष्टाः भगवत्प्रसादमात्रं स्वीकुर्वन्ति । गृहार्चाराधनकाले आराधकः मङ्गळाशासनसमये गोष्ठ्यां तीर्थविनियोगानन्तरं तीर्थं स्वीकरोति । तदुपपन्नम् ॥

विजयसंहितायाम् –

बाहुभ्यां स्वाहृतं पात्रे किंचित्कारपुरःसरम् ।
तीर्थं सुपावनं भोग्यं आद्यन्तनतिपूर्वकम् ॥

त्रिवारं स्वीकृतं गोष्ठीनिष्ठैरार्यैर्महात्मभिः ।
पश्चात्त्रिवारं स्वीकृत्य स्वयं चाचार्यहस्ततः ॥ इति ।

पूर्वदिनचर्यायाम् –

ततः पतद्ग्रहगतं तीर्थं परमपावनम् ।
रसोत्तरं स्वशिष्येभ्यः प्रयच्छन्तं भजाम्यहम् ।
शाययित्वाऽथ पर्यङ्के देवमाहूयरक्षकम् ॥

स्वयं च तीर्थं स्वीकृत्य प्रणमन्तं भजाम्यहम् ।

इत्याद्युक्तेः । सच्चरित्रपरित्राणे यद्यपि–

पूजान्ते तुलसीतीर्थं पूजकः परमं पिबेत् ।
अन्यथा विनियुक्तं चेत्तत्पूजा निष्फला भवेत् ॥

पूजकः प्रथमं पिबेदित्याराधकस्य प्रथमं तीर्थपानं तदनन्तरं अन्येषां भगवत्तीर्थपानं च स्मर्यते । तथापि आराधने स्वाचार्यस्य कर्तृत्वम् । तद्भावेन तेषां भागवतानामपि तत्र कर्तृत्वात् । तेभ्यः प्रथमं तीर्थप्रदानेऽपि पूजकः प्रथमं पिबेदिति शास्त्रार्थस्यानुष्ठितत्व-सिद्धेः । न तद्विरोधः शाण्डिल्यश्चाह–

अन्नमम्बूनि वस्त्राणि कुसुमस्रक्फलादिकम् ।
इष्टमिष्टावशिष्टं वा प्रदद्यात्पश्चकालिने ॥ इति ।

तदुत्तरमेव स्वयं भोजनं तेनोक्तम् –

कुर्वत्सु भोजनं कर्म सर्वेषु गृहमेध्यपि ।
प्रसाद्यताननुज्ञाप्य समश्नीयात्प्रसन्नधीः ॥

इतीत्युक्तेश्च । अतः प्रपन्नैः अनुयागसमये सालग्रामतीर्थादि संमिश्रपतद्ग्रहतीर्थेन अनुयागसमये आपोशनद्वयं कार्यमिति सिद्धम् ॥

इति श्रीसदनुष्ठानदर्पणे सालग्रामोदकेन आपोशनद्वयकरणो नाम सप्तविंशप्रतिफलनम् ॥

श्रीसदनुष्ठानदर्पणे

(प्राणाहुतिसमये सव्यकरेण भुक्तिपात्रस्पर्शाभावविषयो नाम)

॥ अष्टाविंशप्रतिफलनम् ॥

प्रपन्नैः अनुयागसमये भुक्तिपात्रस्पर्शो न कार्यः वचनात्, शिष्टाचाराच्च । तथाहि सच्चरित्रपरित्राणे– "नापजिहीतापजिहीत वा" इत्यापस्तम्बः – अस्य चोज्वला नापजिहीत । भोजनपात्रं सव्येन पाणिना नो भुञ्जेत् । अपजिहीत वा, भुञ्जेद्वा किमर्थमिदं यावता न प्रकारान्तरं संभवति । सत्यं प्रक्रमात्तु नियम्येत इति । य एव प्रकारः प्रथमभोजने स एवातादनुष्ठातव्यः एवमर्थमिदमिति इति । तत्रैव उज्वलायां तु प्रथमं स्पर्शे कृते सति आन्तात्कर्तव्यः । प्रथममकृते सति आन्तान्न कर्तव्यः इति सूत्रार्थोऽभिप्रेतः इत्यादिभिः भुक्तिपात्रस्पर्शस्य अनावश्यकत्वप्रतिपादनेन यत्र यत्र विकल्पः तत्र तत्र अनित्यत्वमिति न्यायेन प्रपन्नैः पात्रस्पर्शः नानुष्ठेय एव । न च यो भुङ्क्ते मुक्तभाजनः इति । गौतमीयक्रियाकाण्डे– प्राणाहुतिसमय एव हस्तेन पात्रस्पर्शः कर्तव्यः । तदूर्ध्वं न कर्तव्यः । कदाचन पात्रं स्पृष्ट्वा यो भुङ्क्ते स यात्यघोगतिमित्युक्तत्वेन पात्रस्पर्शः आवश्यकः इति वाच्यम् । तद्वचनानां प्रपन्नेतरविषयत्वात् । प्रपन्नत्वेन परिषेकादावपि सव्यकरेण पात्रस्पर्शाभावप्रसङ्गः इति । चेन्न,

मार्जने संस्पृशेत्तोयं सन्ध्यावन्दनकर्मणि ।
होमे च परिषेके च पात्रं सव्येन संस्पृशेत् ॥ इति ।

सव्यकरेण पात्रस्पर्शस्य विहितत्वात् । प्राणाहुतेरपि होमत्वा-विशेषात्, तदा भोजनपात्रस्पर्शः आवश्यकः इति न भ्रमितव्यम् ॥

यद्यागानन्तरं देवि वैश्वदेवं विना रमे ।
अनुयागस्तदा कार्यः परमैकान्तिभिर्द्विजैः ॥

प्रपन्नानां द्विजानां तु वैष्णवानां मनोरमे ।
अनुयागस्तु विहितः पात्रस्पर्शविना कृतः ॥ इति ।

वासुदेवसंहितादिवचनैः प्रपन्नानां भोजनपात्रस्पर्शस्य निषिद्ध-त्वात् । लोके हि वचनबलेन उपनयनकाले भोजनपूर्वकचौळतदनन्तर-यज्ञोपवीतधारणादिकम् । तदितरकाले भोजनराहित्येन क्षौरयज्ञोप-वीतधारणं कुर्वन्ति । शिष्टाः किमिह वचनं न कुर्यात् । वचनात्प्रवृत्तिः, वचनान्निवृत्तिरिति न्यायात् किञ्च भुक्तिपात्रस्पर्शे करस्य शुद्धौ श्रीपाञ्चरात्रे—

आजानुपादौ प्रक्षाळ्य हस्तौ चामणिबन्धनात् । इति ।

ईश्वरसंहितायां द्वितीयाध्याये— उक्तरीत्या आमणिबन्धक्षाळ-नावश्यकत्वेन तदकरणानुपपत्तेश्च । सर्वशास्त्रविदग्रेसरैः मञ्चसालकट्टै वेदान्ताचार्यैरपि सत्क्रियाकल्पमञ्जर्यां प्रपन्नानां भुक्तिपात्रस्पर्श-निषेधः प्रतिपादितः । अतः प्रपन्नैः अनुयागसमये भुक्तिपात्रस्पर्शः न कर्तव्यः इति सिद्धम् ॥

इति श्रीसदनुष्ठानदर्पणे प्राणाहुतिसमये सव्यकरेण पात्रस्पर्शाभावविषयो नाम अष्टाविंशप्रतिफलनम् ॥

श्रीरस्तु ॥

सदनुष्ठानदर्पणे

(विद्धजयन्तीग्रहणाभावविषयो नाम)

॥ एकोनत्रिंशप्रतिफलनम् ॥

प्रपन्नैः बुधवारसोमवारादि युक्तापि विद्धा श्रीजयन्ती न ग्राह्या । वचनात् शिष्टाचाराच्च । तथाहि ब्रह्मकैवर्ते–

जयन्ती या प्रयत्नेन सप्तमी संयुताष्टमी ।
सा सर्क्षापि न कर्तव्या सप्तमी संयुताष्टमी ।
अविद्धायां हि सर्क्षायां जातो देवकिनन्दनः ॥ इति ।

ख ानसे श्री श्रीनिवासदीक्षितीये–

निशीथे रोहिणी युक्ता नवमी सहिताष्टमी ।
बुधवारसमायुक्ता सोमेनापि विशेषतः ।
नभः कृष्णजयन्ती च रुद्रसंज्ञा घनाशिनी ॥

निशीथयोगस्य तामसकालयोगत्वात् रुद्रसंज्ञेति ॥

पूर्वविद्धा तिथिस्त्याज्या पूर्वपुण्यविनाशिनी ॥ इति ।

पुराणवचनाच्च, निशीथयोगप्रदोषकालयोगजन्माष्टम्यः श्रीवैखानसादिवैष्णवव्यतिरिक्तविषयः । इति च पाञ्चरात्रे च परमरहस्यसंहितायाम्–

विद्धा पि सा परिग्राह्या बुधवारादियोगतः ।
फलेप्सुभिः प्रपन्नैस्तु विद्धा ग्राह्या न योगतः ॥

खगेन्द्रसंहितायाम्–

बुधवारयुतं श्रेष्ठमन्यवारन्तु मध्यमम् ।
बुधवारयुता वापि विद्धा वर्ज्या खगेश्वर ॥ इति ।

सनत्कुमारसंहितायाम्–

> बुधवारसमायुक्ता सोमवारेण वा पुनः ।
> अष्टमी कृत्तिका युक्ता नोपोष्यैकान्तिभिर्मुने ।। इत्यादि ।
>
> चन्द्रोदयेऽष्टमी युक्ता रोहिणी बुधवारगा ।
> विद्धाविद्धाऽपि वा ग्राह्या ह्युपवासार्चनादिषु ।।

इत्यादि बुधवारयुक्तविद्धजयन्ती ग्राह्यत्वपरवचनं फलेफ्सुविषयं न प्रपन्नविषयं ईश्वरसंहितायां त्रयोदशाध्याये–

> सूर्योदयेऽपि सप्तम्या तथा कृत्तिकयाऽपि च ।
> कलयाऽपि ह्यविद्धाया रोहिणी द्विजपुङ्गवाः ।।
>
> अष्टमी सहिता वापि ह्यष्टमी रहितापि वा ।
> तथैव बुधवारेण सहिता रहिताऽपि वा ।।
>
> जयन्तीनाम संप्रोक्ता जयत्यशुभमित्यसौ ।
> अष्टम्यां वा नवम्यां वा दशम्यां वापि रोहिणी ।।
>
> अविद्धा यदि लभ्येत कलामात्रापि वैष्णवैः ।
> ग्राह्या कदापि विद्धा तत् न ग्राह्या वैष्णवोत्तमैः ।।

इत्युक्तेः अतः विद्धजयन्त्यामुपवासो न कार्यः इति सिद्धम् ।'

इति श्रीमदनुष्ठानदर्पणे जयन्तीग्रहणाभावविषयो नाम एकोनत्रिंशप्रतिफलनम् ।।

श्रीरस्तु ।।

सदनुष्ठानदर्पणे

(जयन्त्यां उत्सवान्ते पारणा कर्तव्यविषयो नाम)

॥ त्रिंशप्रतिफलनम् ॥

प्रपन्नै: जयन्त्यां उत्सवान्ते पारणा कर्तव्या । वचनात् शिष्टाचाराच्च । तथाहि अनिरुद्धसंहितायाम्–

जयन्तीनां तु सर्वासामुत्सवान्ते च पारणम् ।
कर्तव्यमैहिकासङ्गैः पञ्चकालपरायणैः ॥ इति ।

पुरुषार्थसुधानिधौ–

प्रपन्नानां मुमुक्षूणां उत्सवान्ते च पारणम् ।
विधिस्स्यात् विष्णुसायुज्यसिद्धये मन्त्रसिद्धये ।
इतरेषां व्रतान्ते तु दानान्ते पारणं भवेत् ॥ इति ।

संहितान्तरे–

तिथ्यन्ते पारणं कार्यं तत्तत्फलमभीप्सता ।
उत्सवान्ते तु तत्कार्यं न्यस्तात्मभिरथेश्वरे ॥ इति ।

अनन्तसंहितायाम्–

जयन्त्यां तु व्रती भूत्वा पूजां कुर्याद्विधूदये ।
तदैव पारणं कुर्यात् ऐहिकादिष्वसङ्गवान् ॥ इति ।

न च तिथ्यन्ते, भान्ते वा पारणमावश्यकं इति वाच्यं तत्प्रतिपादकवचनस्य उत्सर्गापवादन्यायेन फलार्थिविषयत्वात् । तथा चोक्तं जयत्सेनसंहितायां–

तिथ्यन्ते वाऽथवा भान्ते ह्युत्सवान्ते तु पारणम् ।
मुमुक्षूणामकामानामुत्सवान्ते तु पारणम् ॥

काम्यार्थिनामशेषेण परेद्युः खलु पारणम् ॥ इति।

सुमन्तुरपि–

तिथिनक्षत्रनियमे तिथिभान्ते च पारणम् ।
अतोऽन्यथा पारणया व्रतभङ्गमवाप्नुयात् ॥

पारणामुत्सवान्ते कुर्युरेकान्तिनो हि ये ।
तिथ्यन्ते पारणं कार्यं जयन्तीफलमिच्छता ॥

फलाभिसन्धिरहितैरात्रावेव तु पारणा ॥ इति।

फलाभिसन्धिरहितैः परमैकान्तिभिर्द्विजैः ।
उत्सवान्ते च कर्तव्यं पारणं कृष्णजन्मनि ॥ इति।

जयन्त्यामेव कृष्णस्य पारणा विहिता निशि ॥ इति।

ईश्वरसंहितायां षोदशाऽध्याये–

जयन्त्यां तत्र कृष्णस्य दिवोपोष्य विशेषतः ।
रात्रावभ्यर्चनं कुर्याद्यद्विधानमिहोच्यते ॥ इति।

तत्रैव–एवं हि शयनान्तं तु कृत्वा चैकदिनोत्सवम् ।

अनुयागं ततः कुर्यात् आचार्यो वैष्णवैस्सह ।
वैष्णवानामुत्सवान्ते पारणं विहितं द्विजाः ।
यद्वा फलेच्छया कार्यं पारणं तु परेऽहनि ॥ इति।

सच्चरित्रपरित्राणे वासिष्ठसंहितायाम्–

सदा सर्वजयन्त्यां वै यदा कुर्यात्स्वभक्तितः ।
पूजादिकं पारणकमुत्सवान्ते तदा भवेत् ॥ इति।

तथैवोक्तं, जयन्तीश्राद्धखण्डनग्रन्थे–

यथादशनिर्णये नन्वत्र दिवारात्रौ वा पारणम् ।
तिथ्यन्तेऽथवा भान्ते ह्युत्सवान्ते च पारणम् ।
कुर्यात्कृष्णार्चनान्ते वा न कुर्यान्निशि पारणम् ॥ इति ।

जयत्सेनसंहितायां चतुर्थां पारणावसरमुक्त्वा रात्रिपारणं निषिद्धमिति चेन्न । तिथ्यृक्षयोः अन्यतरानपगमविषयत्वाच्चस्य ॥

सांयोगिकेऽप्युपवासे यत्रैकोऽपि वियुज्यते ।
तत्रैव पारणं कुर्यादिति वेदविदो विदुः ॥ इति ।

नारदस्मृतेः–तिथ्यृक्षयोर्यथा च्छेदो नक्षत्रान्तमथापि वा ।
अर्धरात्रेऽथवा कुर्यात्पारणं तत्परेऽहनि ॥ इति ।

परदिन एव पारणविधानात् । न रात्रौ पारणमिति चेत् ।

मैवं सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते ।
अन्यथा तत्फलस्यार्धं धर्ममेवोपसर्पति ॥

धर्मः यमः,–अष्टम्यामथ रोहिण्यां न कुर्यात्पारणं निशि ।
हन्यात्पुरा कृतं धर्मं उपवासार्जितं फलम् ॥

इत्यादि रात्रिपारणनिषेधवचनानां फलहानिश्रवणेन, काम्योपवासविषयत्वावगतेः । फलाभिसन्धिविरहे रात्रावपि पारणमविरुद्धमेव तथा अनन्ताख्यसंहितायां च–

भक्तानां वैष्णवानां च शुद्धानां नियतात्मनाम् ।
विहिता सात्वताभिज्ञैः रात्रावेव तु पारणा ॥

शुद्धानां प्रयोजनान्तरगन्धरहितानां वैष्णवः —

अधृत्वा विधिना चक्रं ब्राह्मणः प्राकृतो भवेत् ।
विष्णुरेव हि येषां वै देवता वैष्णवास्तु ते ॥

अनन्यदेवता भक्ताः ये मद्भक्तजनप्रियाः ।
मामेव शरणं प्राप्ता मद्भक्तास्ते प्रकीर्तिताः ॥ इति ।

पाद्म अश्वमेधिकाद्युक्तलक्षणः —

उत्सवान्ते च तिथ्यन्ते व्रती कुर्यात्तु पारणम् ।
फलाभिसन्धिरहितो रात्रावेव तु पारणम् ॥

व्रती कामी परेद्युः उत्सवान्ते तिथ्यन्ते वा पारणं कुर्यात् । निष्कामस्तु रात्रावेव नियतं भुञ्जीत इत्यर्थः ॥

पञ्चकालरतानां च दीक्षितैकान्तिनामपि ।
भक्तैर्भागवतैस्साधं रात्रावेव तु पारणम् ॥ इति ।

तथा पुरुषार्थसुधानिधौ श्रीमन्नारायणमुनिभिरपि तथा पारणविषये अनन्ताख्यसंहितायां उत्तरभागे निवेद्य देवदेवायेत्यादिना वैष्णव अवैष्णवयोः क्रमेण रात्र्यां दिवा च पारणविधिः उक्तः । एवं वैष्णवावैष्णवयोः उपवासपारणयोः व्यवस्थितत्वेऽपीत्यादि इति । अतः प्रपन्नैः जयन्त्यां उत्सवान्ते पारणा कर्तव्या इति सिद्धम् ॥

इति सदनुष्ठानदर्पणे (जयन्त्यां उत्सवान्ते पारणा कर्तव्यविषयो नाम)

त्रिंशप्रतिफलनम् ॥

श्रीरस्तु ॥

सदनुष्ठानदर्पणे

(भागवतभुक्त्यवशिष्टप्रसादस्वीकारे प्रमाणम्)

॥ एकत्रिंशप्रतिफलनम् ॥

प्रपन्नाः भागवतभुक्त्यवशिष्टप्रसादस्वीकारं कुर्वन्ति । तदुपपन्नं वचनात् शिष्टाचाराच्च । तथाहि पराशरस्मृतौ–

कोटिजन्मार्जितं पापं ज्ञानतोऽज्ञानतः कृतम् ।
सद्यः प्रदह्यते नृणां वैष्णवोच्छिष्टभोजनात् ॥ इति ।

आचार्योच्छिष्टभोजनं कार्यं न तु भागवतोच्छिष्टभोजनमिति चेत् न தாதநல்லாசிரியன் முதல் தமயனெச்சில் इति श्रीमन्निगमान्तगुरुप्रणीताहारनियमग्रन्थोक्तरीत्या सामान्यतः पित्रुच्छिष्टभोजनाङ्गीकारे–

போனகம் செய்த சேடம் தருவரேல் புனிதமன்றே

इति द्राविडवेदानुगृहीतरीत्या परमभक्तियुक्त श्रीवैष्णवभुक्तावशिष्टस्वीकाराङ्गस्य कैमुतिकन्यायसिद्धत्वात् तथोक्तं रहस्यमञ्जर्याम्–

सुपावनं तदुच्छिष्टमित्यत्रोच्छिष्टशब्दतः ।
उच्यते देशिकोच्छिष्टं भाण्डस्थं वेति केन च ॥

उच्छिष्टमगुरोर्भुक्तेत्यादिस्मृत्यविरोधतः ।
एवमेव नियन्तव्यं अन्यथातिप्रसक्तितः ॥

गुरोर्भुञ्जीत चोच्छिष्टमित्यत्र नियतो विधिः ।
अगुरोरिति चान्यत्र निषेधान्नान्यतश्चरेत् ॥

इत्याहुर्ये मृदुप्रज्ञाः तेऽन्यथाज्ञानमोहिताः ।
गुरोरप्रस्तुतत्वेन प्राकृते तद्विरुध्यते ॥

नारायणैकनिष्ठाया गुर्वन्यत्र निवारणात् ।
अगुरोरिति वाक्स्वीयस्वीकारनिरताश्च ये ॥

तदुच्छिष्टाशने ज्ञानात्प्रायश्चित्तविधायिका ।
नारायणैकनिष्ठास्तत्कृपैकोपायवादिनः ॥

तेषां भुक्तोज्झितं भुक्तं सुपावनमिति स्मृतेः ।
नित्यं भुक्तोज्झितत्वत्कपात्रस्थान्नभुजा वयम् ॥

श्रीभट्टनाथः प्राहेत्थं मङ्गलाशासने महान् ।
यतः स्वरूपं शेषत्वं तद्भक्तप्रतियोगिकम् ॥

तद्भुक्तोज्झितभोगत्वं तन्यायेनानिवारितम् ।
गुरोरुच्छिष्टवचनं गुरुतुल्या निवारकम् ॥

अतोऽस्मद्देशिकाः श्रीशप्रसादस्वीकृतौ मिथः ।
भवद्भुक्तोज्झितमिति भावयित्वा हि भुञ्जते ॥

भावना न निषिद्धस्य विहितस्य हि भावना ।
भावना च निषिद्धस्य दोषायैवोपकल्पते ।
श्लाघ्ये श्लाघ्यस्य चारोपान्नस्माद्दृष्टिविधेर्नयः ॥

ज्ञानिनां नित्यकर्तव्ये दुरवापे च कर्मणि ।
तद्भावना वा कर्तव्या गौणोऽयं न तु मुख्यतः ॥

नारायणैकनिष्ठानां पात्रोच्छिष्टं सुपावनम् ॥
स्वामिजात्यादिदोषाणां स्वकर्तव्यं निवृत्तये ।

तद्भावनायां चेतरथा प्रायश्चित्तीयते द्विजः ॥ इति ।

तथैवोक्तं सच्चरित्रपरित्राणे—

नारायणैकनिष्ठस्य या या चेष्टा तदर्चनम् ।
यो यो जल्पस्स स जपः तद्ध्यानं यन्निरीक्षणम् ॥

तत्पादाम्बु अतुलं तीर्थं तदुच्छिष्टं सुपावनम् ।
तदुक्तिमात्रमन्त्राढ्यं तत्स्पृष्टमखिलं शुचि ॥ इति ।

पराशरस्मृतौ उक्तम् –

नेदं आचार्यविषयम् । अतच्छब्दात् अतत्प्रकरणाच्च ! न च छागपशुन्यायात् । नारायणैकनिष्ठशब्दस्य आचार्ये पर्यवसानं युक्तम् । तत्र मन्त्रस्य पाक्षिकत्वप्रसङ्गवत् । अत्रातिप्रसङ्गाभावेन सामान्यशब्दस्य संकोचायोगात् न च, उच्छिष्टमगुरोरिति गुरुव्यतिरिक्तोच्छिष्टाशननिषेधात् । नारायणैकनिष्ठशब्दस्य आचार्यपर्यवसानं युक्तम् । गुरुशब्देन आचार्यविवक्षायां पितुरसंग्रहापत्तेः पितुर्विवक्षायां आचार्यस्य असंग्रहापत्तेः । उभयविवक्षायां च एकवचनानुपपत्तेः । ज्येष्ठभ्रातुः असंग्रहापत्तेः असंग्रहापत्तेश्च अतः गुरुशब्दस्य उच्छिष्टाशने शास्त्रानुमतसर्वोपलक्षकत्वस्य आवश्यकत्वान्न निषेधस्य नारायणैकनिष्ठशब्दस्य आचार्यमात्रे युक्तम् । अगुरुशब्दस्यैव नारायणैकनिष्ठव्यतिरिक्तविषयतया संकोचसंभवाच्च निषेधोऽन्यथासिद्धः ॥

न च योऽसौ मन्त्रवरं प्रादात् संसारोच्छेदसाधनम् ।
प्रतीच्छेद्गुरुवर्यस्य तस्योच्छिष्टं सुपावनम् ॥

ये चोपकुरुते ज्ञानं किमप्यच्युतसंश्रयम् ।
विनोच्छिष्टाशनं कार्या वृत्तिस्तेष्वपि गौरवात् ॥

इत्याचार्यव्यतिरिक्तविषयेषु उच्छिष्टाशनपर्युदासात् । नारायणैकनिष्ठशब्दात् । नारायणैकनिष्ठशब्दस्य आचार्यमात्रपरतया संकोचः इति युक्तम् । नारायणैकनिष्ठस्येत्यत्र हि–एकशब्दनिष्ठाशब्दाभ्यां

काष्ठापन्न अनन्यशरणत्व अनन्यभोग्यत्वादिव्यवसाय तदनुगुण आचार-
परिपूर्ण उत्तमाधिकारिप्रतीतिस्वारस्येन किमपीति स्वल्पज्ञानोपकर्तृत्व-
सदाचरितयच्छब्दस्यैव काष्ठापन्नव्यवसायादिरहितमध्यमाधिकारिपर-
त्वावश्यंभावेन पर्युदासस्य अकिञ्चित्करत्वात् । न च उच्छिष्टशब्दस्य
भाण्डस्थभुक्तशेषपरत्वं युक्तम् । भुक्तिपात्रस्य भुक्तशेष एव तत्स्वार-
स्यात् । नापि प्रायश्चित्ततया गुरूच्छिष्टाशनं प्रशस्तमित्युच्यत इति
युक्तम् । प्रायश्चित्तस्य अप्रकृतत्वात् । न च गुरूच्छिष्टाशनस्य
प्रायश्चित्तत्वं नियतं यदुच्छिष्टं प्राश्नाति हविरुच्छिष्टमेव तत् इत्युक्तस्य
ब्रह्मचारिणो नित्ययज्ञे गुरूच्छिष्टाशनस्य प्रायश्चित्तत्वाभावात् । तद्वि-
प्रकरणात् विद्याग्रहणाङ्गं एवं भागवतोच्छिष्टाशनमपि तदुक्तिमात्रं
मन्त्रत्वाप्रयमिति व्यञ्जितस्वरूपज्ञानवृद्ध्यर्थत्वात् तदङ्गमिति न प्राय-
श्चित्तानुधावनं युक्तम् । भागवतभुक्तशेषभोजनस्य निश्शेषत्वज्ञान-
वृद्ध्यर्थत्वं स्मर्यते । यथोक्तं श्रीविष्णुधर्मोत्तरे–

भोगैरिष्टैश्च शास्त्रीयैस्तोषयेद्वैष्णवान् गृहे ।
त्रिविधज्ञानपूर्वन्तु शेषत्वज्ञानवृद्धये ।
भुक्तवत्सु तथा तेषु शेषं भुञ्जीत सात्विकः ॥ इति ।

अत्र हि भुक्तवत्सु इत्येतत्सान्निध्यात् शेषशब्देन भुक्तिपात्रस्य
भुक्तशेषमेव झटिति बुध्यते । भाण्डस्थं बुध्यते चेत् न नो हानिः ।
न च सुपावनत्वोक्त्या प्रायश्चित्तप्रसक्तलाभः इति युक्तम् । क्षेत्रज्ञस्य
ईश्वरज्ञानाद्विशुद्धिः परमामतेत्युक्तस्वरूपज्ञानबुद्धिद्वारकशुद्धिहेतुत्वपर-
तया तदुक्त्युपपत्तेः । अतः काष्ठापन्नजनन्यभोग्यत्वादिव्यवसायादि-
युक्तभागवतोच्छिष्टाशनं स्वरूपज्ञानवृद्ध्यर्थं कार्यम् । इति । अनेन
यदा भागवतोच्छिष्टाशनं स्वरूपानुरूपमेवेति निरवद्यम् श्रीः प्रातःकाले,
श्रीमन्त्रार्थ, श्रीवचनभूषण, आचार्यहृदयादिरहस्यग्रन्थ श्रीभाष्या-

दिना तदीयाराधनानन्तरं, श्रीरामायण, सहस्रगीथोपनिषद्व्याख्या, भगवद्विषयग्रन्थादिना, कालक्षेपः कर्तव्यः। रहस्यग्रन्थे – स्वज्ञानं, प्रापकज्ञानं, प्राप्यज्ञानं मुमुक्षुभिः ज्ञानत्रयमुपादेयं एतदन्यन्न किंचन इति। अत्र पूर्वाचार्यव्याख्या। स्वज्ञानं, स्वस्वरूपप्रतिपादकरहस्यमित्यर्थः। अयं मन्त्रवैभवप्रकरणाल्लभ्यते, ज्ञायते अनेनेति ज्ञानं करणेल्युट्प्रत्ययः रहस्यमित्यर्थः। यथानगन्धादयस्तथेत्यत्र ज्ञायते अनेनेति व्युत्पत्या वस्तुप्रकाशकत्वात् ज्ञानशब्दस्य इन्द्रियरूपार्थो वर्णितः तद्वदत्रापि प्रापकज्ञानमित्यत्र प्रापकज्ञानं उपायप्रतिपादकरहस्यमित्यर्थः। प्राप्यज्ञानं पुरुषार्थप्रतिपादकरहस्यमित्यर्थः। अतः मूलमेव मन्त्ररत्नचरमश्लोकरूपरहस्यत्रयस्य सार्थतया अवश्यं ज्ञातव्यमुक्तं भवतीति। वसिष्ठसंहितायां प्रथमाध्याये–

ततोऽभिगम्य देवेशं प्रणिपत्य स्ववेश्मनि।
स्वयंव्यक्तस्थलादीनां संभवे तत्र वै द्विजः।
अभिगच्छेत्तत्र देवं श्रीशं नारायणं प्रभुम्॥ इति।

तत्रैव देवस्य पुरतः पश्चात् पार्श्वयोः प्रणमेत्सदा।
एवं कृत्वाभिगमनं प्रविश्य स्वगृहन्ततः।
कुर्यादध्ययनं पश्चाद्वेदान्तपठनं तथा॥ इति।

भरद्वाजसंहितायाम्–

प्रभुं भक्तपराधीनं नित्यमालोकयेद्धरिम्।
विमानमथवा तस्य दूराद्गोपुरमेव वा॥

स्वरूपरूपविभवं गुणकर्मादिशार्ङ्गिणः।
व्याचक्षीत निबध्नीयात् शृणुयाद्विलिखेत्पठेत्॥

चतुर्भुजमुदाराङ्गं श्यामं पद्मनिभेक्षणम् ।
श्रीभूमिनीळासहितं चिन्तयेच्च सदा हृदि ॥ इति ।

तत्रैव– पुराणान्यवगाहेन सेतिहासानि यत्र च ।
केशवस्य जगत्सर्गस्थितिभङ्गादि कीर्त्यते ॥

स्तोत्राणि कल्पान्यानि कथाश्च विविधा हरेः ।
सद्भिः प्रणिहिताश्चान्यान् प्रबन्धान्परिशीलयेत् ॥

मूलस्कन्धमयो वेदः पञ्चरात्रं च यत्परम् ।
अन्यच्च तत्परं ग्राह्यं शास्त्रं नान्यादृशः पुनः ॥ इति ।

शाण्डिल्यस्मृतौ–

व्याख्यानैर्लेखनैर्वापि ग्रन्थनिर्माणकर्मणा ।
शिष्याणां शिक्षया वापि स्वाध्यायार्थोऽयमुच्यते ॥ इति ।

वासिष्ठसंहितायां अनुयागविधिनामके तृतीयाध्याये–

पठेद्रामायणं स्थाप्य प्राङ्मुखोदङ्मुखोऽपि वा ।
अभ्यर्च्य रामं गन्धाद्यैः आञ्जनेयं प्रणम्य च ॥

बालकाण्डं समारभ्य प्रत्यहं शक्तितः पठेत् ।
प्रत्यहं विंशतिस्सर्गाः पठनीया द्विजन्मनाम् ॥

विष्णवालये मठे वापि स्वगृहे वा विशेषतः ।
रामायणं द्विजवरैः पठितव्यमतन्द्रितैः ॥

राजवीथ्यां शूद्रगृहे क्षुद्रे देवालयेऽपि च ।
चतुष्पथे श्मशानान्ते न तु रामायणं पठेत् ॥

रामायणं पण्यवीथ्यां यः पठेद्धनकाङ्क्षया ।
स चण्डालत्वमाप्नोति जन्मानि नव पञ्च च ॥

यः पठेत् शूद्रवीथ्यां तु रामस्य चरितं महत् ।
स तु तेनावमानेन नरके पतति ध्रुवम् ॥

तस्माद्देवालये विष्णोः ब्राह्मणानां च सन्निधौ ।
रामायणं पठेद्विद्वान् ब्रह्मलोके महीयते ॥

यः पठेद्रामचरितं शूद्रमुद्दिश्य मानवः ।
स सर्वयातना भोगी पतत्येव न संशयः ॥

नामभिर्विष्णवैर्दिव्यैः कालक्षेपं समाचरेत् ।
नामसंकीर्तनं कुर्यादशक्तो वेदपाठने ॥

यावदस्तमपर्यन्तं तावद्रामायणं पठेत् ।
अस्तं गते दिनकरे सन्ध्यां कुर्वीत पूर्ववत् ॥ इति ।

काश्यपस्मृतौ–

द्विराचम्य ततो विद्वानासीनः प्राङ्मुखो भुवि ।
चतुरश्रं शुभं पीठं श्लक्ष्णं वस्त्रसमन्वितम् ॥

संस्थाप्य वेदिकामध्ये गन्धपुष्पाद्यलंकृते ।
तस्मिन्रामायणं ग्रन्थं निवेश्याभ्यर्च्य सन्नतः ॥

तस्मिन्रामं रमानाथं लोककारणमव्ययम् ।
ध्यात्वाऽऽसनाद्यैरभ्यर्च्य प्रणम्य विधिवत्पुनः ।
बालकाण्डं समारभ्य पठेन्नित्यमनन्यधीः ॥ इति ।

श्रीमहाभारते आश्चर्यपर्वणि हरिवंशे शेषधर्मे पुराणप्रशंसानामक-सप्तदशा-ध्याये युधिष्ठिरं प्रति भगवान्–

ममैवाज्ञेति यो राजन् पुराणानि च यो वदेत् ।
तस्यैव सर्वश्रेयांसि ददामि कुरुनन्दन ॥

एवं वाच्यं पुराणं तु शुद्धभावसमन्वितः ।
पदं पदं संविभज्य पूर्वापरविमिश्रितम् ॥

सुव्यक्तं मधुरं राजन् गम्भीरं शास्त्रगर्भितम् ।
अथवा रागसंयुक्तं श्रीरागमथवा नृप ।
मन्द्रमध्यमतारस्थ ध्वनिभिः संमितं वदेत् ॥

एवं वदन् द्विजो दक्षः श्रोतॄणामघनाशनः ।
अथवा सर्वरागैश्च वदन् स्वर्गे महीयते ॥ इति ।

पराशरसंहितायाम्–

सात्विकानि पुराणानि स्नानात्पूर्वं शृणोति यः ।
स याति नरकं घोरं तस्यायुः श्रीश्च नश्यति ॥

भोजनानन्तरं वेद वेदान्तागमसेवनम् ।
इतिहासपुराणादि विष्णुनामादिकं तथा ।
सदा शृङ्गारबीभत्सु रहितं दुःखनाशनम् ॥

श्रुतिसंकीर्तनादिं च कालक्षेपार्थमभ्यसेत् ।
कालक्षेपार्थममलं द्वयमेव चतुर्मुख ॥

कर्मणा मनसा वाचा विष्णुमेवाभ्यसेत्सदा ।
प्रपन्नः परमैकान्ती द्वयमेव सदा जपेत् ॥

इत्याद्युक्तेः इदं प्रसङ्गान्निरूपितम् ।

अतः प्रपन्नैः भागवतभुक्तावशिष्टप्रसादस्वीकारः कर्तव्य एवेति सिद्धम् ॥

इति श्रीसदनुष्ठानदर्पणे भागवतभुक्तावशिष्टस्वीकारादिविषयो नाम एकत्रिंशप्रतिफलनम् ॥

श्रीरस्तु ॥ आयुष्यमस्तु ॥

|| श्रीः ||

|| सदनुष्ठानदर्पणम् ||

प्रपन्नस्त्रीकर्तव्यविषयो नाम

|| द्वात्रिंशप्रतिफलनम् ||

परार्थपरप्रपन्नभार्या साध्वी सुवासिनी स्त्री ब्राह्मे मुहूर्ते श्रीहरिर्हरिर्हरिरित्युच्चार्य स्वभर्तुः पूर्वमुत्थाय पादौ हस्तौ च प्रक्षाळ्य द्वादशनाम्ना द्वादशाङ्गस्पर्शवर्जं अच्युताय नमः, अनन्ताय नमः, गोविन्दाय नमः इति प्राशनरूपं आचमनं कृत्वा । गुरुपरम्परापूर्वकं प्राबोधकगाथा त्रिंशद्गाथा अनुसन्धानं कृत्वा विण्मूत्रोत्सर्जनानन्तरं गृहस्थोक्तं अर्धशौचं कृत्वा गण्डूषाचमनानि कृत्वा, आम्रपत्रादिना दन्तधावनं कृत्वा गण्डूषाचमनानि कृत्वा, सदनं अन्तर्बहिश्च गोमयांबुभिः सिक्त्वा संमार्जन्या मार्जयित्वा रंगवल्या अलंकृत्य विशेषदिनेषु गोमयाम्बुभिः गृहं लेपयेत् ॥

सूर्योदयानन्तरं प्रतिदिनं शिरसि हरिद्राजलप्रोक्षणसहितं कण्ठस्नानं कुर्यात् । विशेषदिनेषु निमित्तेषु च भगवद्भागवताचार्याणां श्रीपादतीर्थमिति द्राविडभाषयोक्त्वा शिरःस्नानं कुर्यात् । ततः रक्तवर्णं, कटिवेष्टनार्थान्तर्वस्त्रबहिर्वस्त्रद्वयं धृत्वा पाणी पादौ प्रक्षाळ्य आचम्य श्रीशैलेत्यादि पद्यपञ्चकं अनुसन्दधाना मध्ये दीपरेखाकार-श्रीचूर्णसहितं श्वेतमृत्स्नया अर्धचन्द्राकृति पुण्ड्रं भ्रुवोरधः धृत्वा गुरुपरंपरापूर्वकं मूलमन्त्र, मन्त्ररत्न - चरमश्लोक स्वाचार्य मुक्तकादी-नुसन्धाय, चन्दनप्रतिबिम्बित अभयहस्त श्रीपादवस्त्रादीन् नेत्रद्वय,

अंसद्वय हृदयमूर्धस्थलेषु विन्यस्य संसेव्य भगवद्भागवताद्याराधनार्थं त्रयोदशप्रतिफलनोक्तरीत्या ताम्रादिपात्रशुद्धिं कुर्यात् ॥

भगवत्सन्निधिमागत्य मार्जनोपलेपने कृत्वा रंगवल्याद्यैः मनोहरं अलंकृत्य, पूजोपकरणानि पात्राणि निर्मलीकृत्य, भगवन्तं प्रणम्य जलाहरणरज्जुं उलूखलादिकं च शोधयित्वा पादप्रक्षाळनार्थं अम्बु; वस्त्रेण शोधितं भगवदाराधनार्थं अम्बु, पाकार्थं अम्बु चाहृत्य पृथक् पृथक् स्थापयेत् ॥

मुद्गतण्डुलव्रीह्यादीन् उपलिप्ते शुचौ देशे अभिताप्य शुद्धाभिः अवहननं कारयित्वा ताम्रकांस्यादिपात्रेषु सत्सु तेषु द्वयानुसन्धान-पूर्वकं स्वात्मानं श्रियः करणभूतां ध्यात्वा पाकं कुर्यात् । पाकोप-युक्तभाण्डानि निर्लेपनानि कृत्वा, आतपाग्निभ्यामभितप्तेषु पाकं कुर्यात् । काकादिभिस्स्पृष्टानि भिन्नानि पक्षातीतानि मासातीतानि वा भाण्डानि त्यजेत् । शास्त्रीयानि शाकादीनि सम्भृतानि तोयेन संशोध्य शस्त्रेण निकृत्य कृमिकीटदूषितानि परित्यज्य कण्टकानि निर्हृत्य शाकमुद्गतण्डुलानि चतुः प्रक्षाळ्य पचेत् । शाकानि, द्वे वा त्रीणि वा विभवे सति, अधिकं वा मुद्गान्न गुडान्न चित्रान्न पायसादीनि (अपूपादीनि) विशेषदिनेषु कुर्यात् । स्वेदाश्रूणि, खण्डवस्त्रेण परिमार्ज्य करौ प्रक्षाळयेत् । पाकभाण्डस्थितं ओदनादिकं चक्राद्यङ्कितेषु पात्रान्तरेषु निधाय पाकभाण्डादीन् विशोध्य चुल्यां अग्नौ प्रताप्य स्थलान्तरे निक्षिप्य पाकशालां च अभ्युक्ष्य मार्जयित्वा वस्त्रान्तरे धृत्वा पादौ हस्तौ च प्रक्षाळयेत् ॥

भगवद्गेहे गोमहिषघृतैः तैलमधूकघृतैः दीपमारोपयेत् । भगवत्सन्निधौ चतुरश्रमनुलिप्ते रङ्गवल्ल्याऽलंकृते स्थले प्रथमं परितः व्यञ्जनसूपपायसापूपादिकं मध्ये सुपक्वान्नं च लवणाज्यदध्यादि च

निवेदनार्थं समर्पयेत । कर्पूरनीराजनमङ्गलाशासनकाले भगवन्तं प्रणम्य तीर्थं श्रीपादतीर्थविनियोगानन्तरं स्वभर्तुः श्रीपादतीर्थं स्वीकरणानन्तरं स्वयमपि तीर्थं श्रीपादतीर्थं स्वीकुर्यात ॥

भर्त्रादीनां भुक्तिदेशे गोमयाम्बुना चतुरश्रं स्थलशुद्धिं कृत्वा, हस्तद्वयेन सोपचारं भगवन्निवेदितं शाकसूपव्यञ्जनलवणपरिवेषणपूर्वकं प्रसादं घृतादिकं च परिवेषयेत । भर्त्रादिषु भुक्तवत्सु स्वयं भुञ्ज्यात् । भोजनसमये पादप्रसारणहासरोदनबहुभाषणानि संत्यजेत । भर्त्रनुज्ञा-पुरस्सरं एकादशी जयन्त्युपवासादीनि कुर्यात । रहस्यग्रन्थदिव्य-प्रबन्धभगवद्विषय श्रीरामायणाद्यर्थश्रवणं कुर्यात ॥

सायंकाले स्वगृहे देवसन्निधौ च दीपमारोप्य देवादीन्प्रणम्य, भगवन्निवेदनार्थं पाकादिकं कुर्यात । स्वभर्तारं श्रियःपतिरूपं ध्यात्वा, तत्कैङ्कर्यबुद्धयैव पतिशुश्रूषणादिकं कुर्यात । एवंभूता पापभीता भगवद्भागवताचार्यभक्तियुक्ता परार्थपरप्रपन्ना साध्वी श्रियःपतिकटाक्ष-विषयीभूता भवेत ॥

वासिष्ठसंहितायां चतुर्थेऽध्याये— दन्तधावनमास्यादि शोध-यित्वा शुचिव्रता इति । सततं प्रातरुत्थाय कीर्तयन्ती जगत्पतिम् । शौचादिकं यथोक्तेन कृत्वाचम्य समाहिता ॥ पीत्वा नामत्रयेणाम्भः स्वाङ्गस्पर्शविवर्जितम् । स्त्रीशूद्राणां तु सर्वेषां नाम्नाऽऽचमनमेव हि ॥ इति । न कार्यो द्वादशाङ्गानां स्पर्श इत्याह वै मनुः ॥

वासिष्ठसंहितायां चतुर्थाध्याये — दन्तानां धावनं कृत्वा निम्बजम्बु, आम्रपल्लवैः । पुनः षोडशगण्डूषान कृत्वाऽऽचामे-द्विधानतः ॥ श्वश्रूश्वशुरयोः पादवन्दनं भर्तृतत्परा । कुर्याच्चतो गृहं सर्वं सेचयेद्गोमयोदकैः ॥ इति ।

तत्रैव– गृहं संमार्जयित्वाऽथ शूर्पादीनपि शोधयेत् । उलूखलादि मुसलं गृहोपकरणादिकम् ॥ प्रक्षाळ्य शोधयित्वा तु तत्तत्स्थानेषु विन्यसेत् । जलाहरणरज्ज्वादि शूद्रस्पृष्टं परित्यजेत् ॥ एवं गृहादिकं शोध्य स्नानार्थं निर्गमेद्बहिः । उदयानन्तरं कार्यं स्त्रीणां स्नानं दिने दिने ॥ शूद्राणां चान्तराणां च श्रुतिस्मृतिविदां मतम् । प्रक्षाळ्य पादौ पाणी च दन्तधावनपूर्वकम् । हरिद्रालेपनं कृत्वा कण्ठस्नानं समाचरेत् । शिरसि प्रोक्षणं कुर्यात् हरिद्राजलमात्मनः ॥ गङ्गास्नानेन सदृशं हरिद्राजलमात्मनः ॥ इति ।

तत्रैव– शिरःस्नानं तु विधवा कण्ठस्नानं सुवासिनी । कुर्वीत प्रत्यहं विप्राः शुद्ध्यर्थमिति वै स्मृतिः ॥ नैमित्तिके शिरःस्नानं कुर्वीत प्रत्यहं सती । विधवा यदि मोहेन कण्ठस्नानं समाचरेत् ॥ पतिता च पतिघ्नी च भवत्येव न संशयः ॥

तत्रैव— एवं स्नात्वा विधानेन बध्वा कबरिकां कचैः । द्विराचम्य हरिं नत्वा स्तोत्रैः स्तुत्वा गृहं व्रजेत् ॥ इति ।

नारायणसारसंग्रहे — अन्तः कच्छं बहिः कच्छं द्विविधं परिकीर्तितम् । ब्राह्मणीप्रभृतीनां तु अवश्यं मनुरब्रवीत् ॥ गृहस्थानां वनस्थानां स्त्रीणां चैव विशेषतः । कच्छहीनेन यत्कर्म कुर्यात्तन्निष्फलं भवेत् ॥ ब्राह्मणस्य तु या नारी कच्छहीना भवेद्यदि । गर्हिता सर्वकर्मभ्यः पतत्येव न संशयः ॥ ऋतुकाले तु या नारी कच्छेन सहिता यदि । रौरवे नरके घोरे पतिता सा न संशयः ॥ शूद्रादिकानां स्त्रीणां च कन्यादीनां च सर्वदा । असंस्कृतानां नारीणां अकच्छं मनुरब्रवीत् ॥ शेषसंहितायां पञ्चदशेऽध्याये– अग्रे पुच्छद्वयं बद्ध्वा द्विरावृत्त्यैककञ्चुकम् ॥ तद्वस्त्रेणैव चोत्तर्यं स्त्रीणां च विधिरञ्जज । उत्तर्यकच्छहीना या नग्नाः स्युः कर्मगर्हिताः ॥ इति ।

पराशरसंहितायां द्वितीयाध्याये— ऊर्ध्वपुण्ड्रं तथा स्त्रीणां अर्धचन्द्राकृतिर्भवेत् ॥ इति ।

वासिष्ठसंहितायां प्रथमाध्याये— अर्धचन्द्राकृति स्त्रीणां धार्यं नित्यं भ्रुवोरधः । तन्मध्ये दीपवत् धार्यं श्रीचूर्णं श्रीप्रदं शुभम् ॥ इति । तत्रैव– सुवासिनीनां कन्यानां विधवानामपि द्विजाः । श्रीचूर्णं सततं धार्यं ऊर्ध्वपुण्ड्रस्य मध्यतः ॥ इति । तत्रैव कूश्माण्ड-बीजवत् स्त्रीणां इतरेषां यथारुचि ॥

श्रीपाञ्चरात्रे खगेश्वरसंहितायां श्रीचूर्णविधिनामके चत्वारिंशेऽध्याये– कन्या भर्तन्विता वापि विधवा वा खगेश्वर । धारयेच्च ललाटे तु न दोषो मम शासनात् ॥ इति स्नात्वा ध्यात्वा जनार्दनम् । अर्धेन्दुसदृशं श्वेतमृत्पुण्ड्रं सूक्ष्मचूर्णकम् ॥ धृत्वा देवीं जगन्नाथं पूजयेन्मृतभर्तृका । इति

वसिष्ठः– विधवानां च सर्वासां प्रातः स्नानं विधीयते । अर्धचन्द्राकृतिं मृत्स्नां ललाटे धारयेत्सदा ॥ इति ।

शिष्टाः प्रपन्नविधवानां श्रीचूर्णरहितं, अर्धचन्द्राकृति श्वेत-मृदूर्ध्वपुण्ड्रं धारयन्ति– तेषामभयाशयः । श्रीचूर्णं श्रीप्रदं शुभमिति । विलोक्य दर्पणं विद्वान् ऊर्ध्वपुण्ड्रं मनोहरम् । कुर्यान्मङ्गळमाकांक्षन् हरिद्राचूर्णसंयुतम् ॥ इति । निशाचूर्णं विना यस्तु ऊर्ध्वपुण्ड्रं दधाति चेत् । तत्पुण्ड्रमशुभं प्राहुर्मुनयो ब्रह्मवादिनः ॥ इति ।

कन्यका परिणीता च विधवा पुत्रिणी यदि । श्रीचूर्णमेतैः सततं धार्यं श्रीशस्य तुष्टये ॥ इत्यादिभिः विकल्पोक्तेः अमङ्गळत्वात् प्रपन्नविधवानां श्वेतमृत्स्नोर्ध्वपुण्ड्रमात्रं धार्यमिति । अत एव शिष्टाः मृताशौचकाले श्वेतमृत्स्नोर्ध्वपुण्ड्रमात्रं धारयन्ति । तदप्युपपन्नम् ॥

वासिष्ठसंहितायां चतुर्थाध्याये— गृहमागत्य देवेशं प्रणम्य स्वपतिं ततः । जलान्याहृत्य कुम्भेषु तत्तत्स्थानेषु विन्यसेत् ॥ पाकार्थमेकपात्रे तु क्षालनार्थमथैकतः । पूजार्थमथ पानार्थं शौचार्थं च तथैकतः ॥ एवं विन्यस्य पात्राणि जलपूर्णानि वै सती । शोधयित्वा तण्डुलादीन् शाकादीनपि च क्रमात् । पाचयेद्देवदेवस्य नैवेद्यार्थं सुवासिनी । ऊर्ध्वपुण्ड्राङ्किततनुः चक्राङ्किततनूस्तथा ॥ मन्त्ररत्नानुसन्धानसहिता पाचयेत् हविः । ध्यायन्ती देवदेवस्य मनसा पादपङ्कजम् ॥ मौनव्रतं समास्थाय पाकं कुर्यात् शुचिव्रता । एवं हविः पाचयित्वा देवाय विनिवेद्य च ॥ भोजयित्वा तु भर्तारं पुत्रमित्रादिसंयुतम् । स्वयं भुञ्जीत नियता भर्तुरुच्छिष्टपूर्वकम् ॥ ततः प्रक्षाळ्य पाणी च पादौ चाचम्य वाग्यता ॥

ततः स्वाङ्गमलंकृत्य ताम्बूलं भक्षयेत्ततः । चन्दनं कुङ्कुमं पुष्पं नेत्रयोरञ्जनं तथा ॥ कञ्चुकं कबरीखण्डं कटकादिविभूषणम् । एतत्सुवासिनी नित्यं धारयेद्विधवा न तु ॥ दीपं प्रज्वाल्य सायाह्ने प्रक्षिपेद्देवतागृहे । महानसे च देहल्यां गृहे शय्यागृहे सती ॥ पूर्ववत्पाचयेदन्नं देवतार्थं यथाविधि । पाचयित्वा तु देवाय विनिवेद्य पयोऽथवा ॥ भर्तारं भोजयित्वाऽथ स्वयं भुञ्जीत वाग्यता । भर्तृपादसमीपे तु शयिता विजितेन्द्रिया ॥ साध्वीनामेव नारीणां एवं कृत्यमुदाहृतम् । आचरन्त्यः स्त्रियोऽप्येवं पूज्यन्ते दिवि दैवतैः ॥ इत्यादि । मरणानन्तरं भर्तुस्ताम्बूलादि विवर्जयेत् ॥

परार्थपरप्रपन्ना विधवा ब्राह्मे मुहूर्ते श्रीहरिर्हरिः हरिरित्युच्चार्य उत्थाय भगवन्नामसंकीर्तनं कृत्वा विण्मूत्रोत्सर्जनानन्तरं गृहस्थोक्तशौचचतुर्गुणं शौचं गुदे विंशतिमृत्शौचं वा कृत्वा, गण्डूषपादप्रक्षाळन आचमन दन्तधावन गण्डूषपादप्रक्षाळनाचमनानि कृत्वा,

उदयानन्तरं भगवद्भागवताचार्याणां श्रीपादतीर्थं इति ध्यात्वा, द्राविडभाषया उक्त्वा । प्रत्यहं शिरःस्नानं कृत्वा, श्वेतवर्णकटि-वेष्टन अन्तर्वस्त्रबहिर्वस्त्रद्वयं धृत्वा, आचम्य, श्रीशैलादिपद्यपञ्चकानु-सन्धानपूर्वकं दक्षिणहस्ताङ्गुष्ठेन श्वेतमृत्स्नया ललाटे भ्रुवोरधः अर्ध-चन्द्राकृति पुण्ड्रं धृत्वा, तिलमात्रं श्रीचूर्णं वा धृत्वा, गुरुपरंपरानु-सन्धानपूर्वकं मूलमन्त्र, मन्त्ररत्न, चरमश्लोक, स्वाचार्यमुक्तकादी-ननुसन्धाय चन्दनप्रतिबिम्बित अभयहस्त श्रीपादवस्त्रादीन् नेत्रद्वय अंस-द्वय हृदय मूर्धस्थलेषु विन्यस्य संसेव्य, नामसंकीर्तन, भगवन्मन्दिर-संमार्जन उपलेपन रङ्गवल्याद्यलंकार भगवद्भागवताचार्य श्रीपादतीर्थ-स्वीकरण एकादशी जयन्त्युपवासादीनि कुर्यात् ॥

॥ प्रपन्नविधवायाः केशधारणे प्रमाणानि ॥

परार्थं, पर प्रपन्ना एषा यावत्कालं केशधारणं कुर्यात् । न तु शिरो मुण्डयेत् । तथा, वचनात् शिष्टाचाराच्च तथाहि शिष्ट-भूषणग्रन्थे— वेदशिखेति न्यासविद्यानिष्ठानां वेदशब्दित यागांगदर्भ-मुष्टिवत् चौलसंस्कृताः केशाः पुरुषत्रियाङ्गतया धारणीया इत्याम्ना-यते ॥ 'विद्वद्विप्रनृपस्त्रीणां वपनं तु निषिध्यते'। इति च तदुपबृंहणम् । पराशरस्मृतौ प्रायश्चित्तकाण्डे—

सर्वान् केशान् समुद्धृत्य छेदयेदङ्गुलद्वयम् ।
एवं नारीकुमारीणां शिरसो मुण्डनं स्मृतम् ॥

न स्त्रियाः केशवपनं न दूरे शयनासनम् ।
न च गोष्ठे वसेत् रात्रौ न दिवा गा अनुव्रजेत् ॥ इति ।

हारीतस्मृतौ— 'विष्णुचिह्नाङ्कितनुः विधवावपनं यदि ।
कुर्यान्मोक्षविहीना सा रौरवं नरकं व्रजेत् ॥

श्रीमदष्टाक्षरीमन्त्रध्यानेन सुसमाहिता ।
विधवा यदि नारी स्याद्वपनं नैव कारयेत् ॥

सर्वदेवस्य सन्निण्याः वानप्रस्थाश्रमस्य च ।
प्रपन्नविधवानां च न कार्यं केशखण्डनम्' ॥ इति ।

पुलहः— वैकुण्ठायुधचिह्नानां विधवानां विशेषतः ।
शिरोजहीनता युक्ता नैव लोके प्रशस्यते ॥ इति ।

बृहद्भारद्वाजधर्मशास्त्रे प्रथमाध्याये—

लिङ्गग्रावधरं विप्रं यानारूढं च भिक्षुकम् ।
वैष्णवीं केशहीनां च पतितं न निरीक्षयेत् ॥

तत्रैव द्वितीयाध्याये—

कृतं विधवयान्नं च स्पृष्टं वा केशहीनया ।
दृष्टं वापि च यो भुङ्क्ते स एवावैष्णवः स्मृतः ॥ इति ।

व्यासोत्तरे षष्ठेऽध्याये—

वैष्णवी पतिना हीना न शिरक्षौरमाचरेत् ।
यदि कुर्यात्तु मोहेन रौरवं नरकं व्रजेदिति ॥

वृद्धवसिष्ठः —

या परं स्पृशते नारी मनोवाक्कायकर्मभिः ।
पतिघातापचारेण नरकं साधिगच्छति ॥

विधवायाः प्रपन्नाया वपनं न प्रशस्यते ।
ज्ञानतोऽज्ञानतो वापि नैव कुर्याच्च मुण्डनम् ।
मुमुक्षुः पतिना हीना या नारी केशधारिणी ॥

तस्यास्तद्धारणे ब्रह्मन् दोषो नास्तीति मे मतिः ।
विधवायाः प्रपन्नायाः केशानां खण्डनं त्यजेत् ।
निषिद्धमन्यथा यस्तु वदेत् स नरकी भवेत् ॥ इति ।

वृद्धमनुः —

भर्तुर्मृतौ तु भार्या च सा कुर्याद्वपनं विना ।
दाहादिपिण्डपर्यन्तं प्रेतकर्म यथाविधि ॥

येषु केषु च कार्येषु न स्त्रीक्षौरं समाचरेत् ।
भर्तृहीना तु या नारी मोहाद्वपनमाचरेत् ॥

कुलद्वयं पितॄणां तु वक्त्रे रोमाणि चार्पति ।
मुण्डयित्वा तु या नारी देवब्राह्मणघातिनी ॥

प्रेतकार्याणि कुरुते तत्सर्वं निष्फलं भवेत् ।
नाचरेद्वपनं स्त्रीणामष्टादशसु कर्मसु ॥

कन्यानां विधवानां च इत्येवं मनुरब्रवीत् ।
एकादशी दिने यद्वदन्नं दुष्टं तथा भवेत् ।
परस्पर्शाच्च विधवा वपनं नैव कारयेत् ॥ इति ।

वराहे — चण्डालनारी संवादे सूतकपादि प्रभाषणे ।
यावद्दोषो भवेत्तावदकेशालोकतो भवेत् ॥ इति ।

स्कान्दपुराणे —

पञ्चसंस्कारसंयुक्ता या सती विधवा भवेत् ।
विष्णुभक्ता च या तन्वी वपनं नैव कारयेत् ॥

तत्रैव पार्वती—

कथमेवं विधं देव द्वैविध्यं श्रूयतेऽधुना ।
काभिर्न वपनं कार्यं काभिः कार्यं वद प्रभो ॥

शम्भुः — वपनं हरिभक्तानां विधवानां निषिध्यते ;
नैव सुन्दरि तत्सिद्धं तद्भक्तानां विशेषतः ॥

अपि च – विष्णुदीक्षाभियुक्तानां वपनं नोपयुज्यते ।
शिवदीक्षाभियुक्तानां विधवानां तथा भवेत् ॥

आग्नेयादि पुराणेषु वपनं मुनिचोदितं पाञ्चरात्रादिषु, शुभे विधवानां न तद्विधिः इति ॥

अनन्तसंहितायाम्—

न कार्यं केशवपनं वैष्णव्या भर्तृहीनया ।
यद्यज्ञानात्करोत्येषा तन्मुखं नावलोकयेत् ॥

परोपदेशादथवा स्वयमेव विमोहिता ।
वपनं यदि कुर्यात्सा रौरवं नरकं व्रजेत् ॥ इति ।

पाद्मसंहितायाम्—

विधवा यदि नारी स्यात्तैलादीनपि वर्जयेत् ।
केशसंस्कारसिद्ध्यर्थं वपनं नैव कारयेत् ॥ इति ।

शौनकः —विधवायाः प्रपन्नायाः केशपक्षे हरिः स्वयम् ।
तुलसीकानन इव क्रीडतीत्याह शौनकः ॥ इति ।

गोभिलस्मृतौ —

न्यासमाश्रित्य विधवा न भवेन्मुण्डमस्तका ।
भवेद्यदि हरेर्वेश्म मेदाधं समवाप्नुयात् ॥ इति ।

व्यासः — शरणागतिनिष्ठानां विधवानां मनीषिभिः ।
निर्णीतं केशवपनं न कार्यमिति सर्वदा ॥

भगवान् — श्रीमदष्टाक्षरी मन्त्रजपतत्परमानसा ।
शरणागतिं सारज्ञा वपनं नैव कारयेत् ॥ इति ।

नारायणसारसंग्रहे विजयसंहितायाम्—

प्रपन्ना पतिना हीना या नारी केशधारिणी ।
तस्यास्तद्धारणे ब्रह्मन् दोषो नास्तीति मे मतम् ॥ इत्यादि ।

ननु 'मात्वं विकेश्युर आवधिष्टाः जीवपत्नी पतिलोके विराज पश्यन्ती प्रजां सुमनस्यमानाम्' ॥ इति श्रुतौ । विधवायाः विकेशित्व-प्रतिपादनात्केशखण्डनं मुख्यमिति चेन्न मन्त्रभाष्ये— त्वं च विकेशी विकीर्णकेशी भूत्वा । उरो मावधिष्ठाः उरस्ताडनं माकार्षीः एतन्निमित्तं जीवः पतिः यस्याः सा जीवपत्नी पतिलोके पतिगृहे, विराज-दीप्यस्व प्रजां च सुमनस्यमाना पश्यन्ती—पतिवियोगो वा पुत्रवियोगो वा ते माभूदित्यर्थः । इति हरदत्तेन भाषितत्वेन विधवायाः सकेशित्वावगमात् । विधवायास्सकेशित्वमुक्तम् ॥

निर्णयसिन्ध्वनन्तरीयकमलाकरे अत एव हारीतः—

स्त्रीशूद्रौ तु शिखां छित्वा क्रोधाद्वैराग्यतोऽपि वा ।
प्राजापत्यं प्रकुर्यातां निष्कृतिर्नान्यथा भवेत् ॥ इति ।

तच्छूद्रे प्रायश्चित्तमाह—अत एव गौडस्त्रीणां विधवानां शिखा दृश्यते इति

वृद्धवासिष्ठस्मृतौ—

मृते भर्तरि या साध्वी वापयेत्केशसन्ततिम् ।
भोगांश्च वर्जयेत्सर्वान् ब्रह्मचर्यं समाचरेत् ॥

पराशरसंहितायां तृतीयाध्याये—

स्यात् क्षौरं विधवानां तु शिरोमात्रे सदाऽब्जज ।

सत्संप्रदायदीपे शौनकः—

पत्यौ मृते उप्तकेशाः स्त्रियो ज्ञानसमन्विताः ।
ब्रह्मचर्यं चरेयुस्ताः ब्रह्मलोकमवाप्नुयुः ॥

स्मृत्यन्तरे—सकेशीं विधवां दृष्ट्वा सचेलः स्नानमाचरेत् ।

जाबालिः —शिरोजवपनं कुर्याद्या नारी मृतभर्तृका ।
ताम्बूलचन्दनादीनि वर्जयेद्व्रतमाचरेत् ॥

विष्णुसंहितायाम्—

प्रपन्नविधवास्सर्वा वापयेयुश्शिरोरुहान् ।
मोहेन चेन्न कुर्वन्ति पतिताः स्युर्न संशयः ॥

हारीतसंहितायाम्—

विधवायाः प्रपन्नायाः कर्तव्यं केशवापनम् ।
अन्यथा यदि कुर्वन्ति वेश्या तुल्याः स्त्रियस्तु ताः ॥

ब्रह्माण्डपुराणे—

विष्णुभक्तिरता यास्तु पञ्चसंस्कारसंस्कृताः ।
विधवा यदि ता नार्यः कर्तव्यं केशवापनम् ॥

पुराणान्तरे—

प्रमीतपतिकास्सर्वाः ज्ञानिन्यो ब्राह्मणस्त्रियः ।
जह्युर्भोगांश्च केशांश्च न चेद्दुष्टा भवन्ति ताः ॥

काश्यपस्मृतौ—

प्रबुद्धा वाऽप्रबुद्धा वा यदि स्त्रीमृतभर्तृका ।
त्यजेद्भोगांश्च केशांश्च विधिरेष सनातनः ॥

इत्यादिकं परार्थप्रपन्नेतरस्वार्थपरविधवापरं मन्तव्यम् ।

खगेश्वरसंहितायाम्—

प्रयोजनान्तरासक्ता विधवा वापयेत शिरः ।
मुमुक्षुर्यदि सा तस्या वपनं तु निषिध्यते ॥
पञ्चसंस्कारसंयुक्ता पातिव्रत्यं गता सती ।
तद्भक्ता केशवपनं कारयेन्नैव शोभने ॥
विष्णुभक्ता विशेषज्ञा शङ्खचक्राङ्किता यदि ।
विधवा केशवपनं नैव कुर्यात्खगेश्वर ॥

इत्यादिवचनसद्भावात् । तथैवोक्तं सच्चरित्रपरित्राणे वैकुण्ठनाथीये

व्यासः — विधवा कबरीबन्धो भर्तृबन्धाय जायते ।
शिरसो मुण्डनं तस्मात् कार्यं विधवया सदा । इति ।

शेषधर्मे — हरिसेवाविहीनाया विधवा केशधारिणी ।
उपवासविहीनाया व्रतहीना विदुःखिता ॥

नारदीये— मा सकेशानुविधवा मा विकेशा सभर्तृका ।
मा व्रती स्यात् सदा केशी मारण्यो नगराश्रयः ।
मा धनी चाप्रदः कामो राज्यें वसतु निर्घृणः ॥ इति ।

अत्र विशेषः —

विद्धद्विप्र नृपस्त्रीणां वपनं तु निषिध्यते ।
मुमुक्षुर्यदि सा तस्या वपनं नैव कारयेत् ॥ इति ।

खगेश्वरसंहितायाम् —

प्रयोजनान्तरासक्ता विधवा वापयेच्छिरः ।
मुमुक्षुर्यदि सा तस्या वपनं तु निषिध्यते ॥ इति ।

एवं विषयविभागस्य कण्ठोक्तत्वात् ।

नित्योप्तकेशा निभृताः त्यक्तसर्वपरिग्रहाः ।
स्त्रीशूद्राद्याः स्वधर्मे च वर्तेरन्वा जगद्गुरौ ॥ इति ।

भरद्वाजवचने त्यक्तसर्वपरिग्रहाः इति वचनं स्त्रियां नान्वेति किंतु शूद्राद्या इत्यत्रान्वेति । तत्र स्त्रीशब्देन प्रयोजनासक्ता, स्त्री विवक्षितेति तस्या एव नित्योप्तकेशत्वमुच्यते । वचनान्तरानुरोधेन अर्थानभ्युपगमे सभर्तृकाया अपि वपनप्रसंगात् । एवमेव पराशरसंहितावचनमपि प्रयोजनान्तरासक्तप्रपन्नविधवाया वपनपरं मन्तव्यमिति । अयं विभागो वासिष्ठसंहितायां स्त्रीधर्मकथननामकचतुर्थाध्याये कण्ठोक्तः—

शरणागतिनिष्ठा चेत्प्रपन्ना विधवा सती ।
क्षौरकर्म न कुर्यात्सा भगवद्द्रोहिणी भवेत् ॥

न करोति यदा क्षौरं केवला विधवा यदि ।
तां त्यजेत परे राष्ट्रे पतितां पापकारिणीम् ॥ इति ।

आनन्दनिलयाचार्यविरचितदशनिर्णयग्रन्थे मुमुक्षुविधवा केशधारणनिर्णये–मुमुक्षूणां सर्वासामपि विधवानां यावच्छरीरपातं केशधारणमावश्यकं इति शास्त्राणि प्रवदन्ति केवलपरपुरुषदर्शनमात्रेण पातिव्रत्यविनाशस्य, शास्त्रेषु घोषितत्वात् । जलप्रतिबिम्बितचित्रकेतुदर्शनेन हि रेणुका निधनमवाप । तदाहच्यवनः —

देवयोनिविशेषस्य जले दर्शनमात्रतः ।
पातिव्रत्यविनाशेन रेणुका निधनं गता ।। इति ।

एवं श्रीमहाभारते द्रौपद्यपि श्रीकृष्णकृतप्रश्नस्योत्तरमाह—

सुन्दरं पुरुषं दृष्ट्वा भ्रातरं पितरं सुतम् ।
योनिर्द्रवति नारीणां तथ्यं मे ब्रूहि केशव ।। इति ।

तथा च दर्शनापेक्षया स्पर्शनस्य अतिक्रूरत्वात् परपुरुषकरस्पृष्टे पातिव्रत्यनिरासकत्वेन दुर्गतिसाधकत्वात् । नापितकरस्पृष्टिमन्तरेण केशखण्डनासंभवात् ।।

मृते भर्तरि या नार्यो नापितस्पर्शनेन च ।
स्वर्गे स्थितास्तु भर्तारो नरकेषु पतन्ति वै ।।

परेण पुरुषा संस्पृष्टा वनिता निरयं गता ।
पतिदुर्गतिदा, स्त्रीस्यादिति जाबालिरब्रवीत् ।।

इत्यादिवचनशतैः स्त्रीमात्रस्य, परपुरुषकरस्पृष्टेर्निषेधितत्वात् ।

तदाहुः स्मृतिकाराः आपस्तम्बः —

योनिः प्रजनने स्त्रीणां पुंसामार्द्रे बभूवतुः ।
अन्योन्यतरसंसर्गादिति प्रोवाच गोभिलः ।।

स्त्रीणां ब्राह्मणजातीनां न कुर्यात्केशखण्डनम् ।
अथवा यदि ताः कुर्युः त्यजेदारोप्य रासभम् ।।

आश्वलायनः —

योषिदग्निः पुमानाज्यं पुत्रानपि न संस्पृशेत् ।
तयोरन्योन्यसंसर्गात् योनिराद्रीभवेत् ।। इति ।

याज्ञवल्क्यः —

विद्वद्विप्र नृपस्त्रीणां नेष्यते केशखण्डनम् ।
ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः ॥ इति ।

मनुरपि — विधवानां वनस्थानां नृपाणां च तपस्विनाम् ।
नाचरेद्वपनं विप्राः ब्रह्महत्या समं मतम् ॥

स्त्रीजातेस्सर्ववर्णेषु न कुर्यात् केशशातनम् ।
कुलत्यागे तथा कार्यं खरारोपणपर्वतः ॥

नन्वेतासां ब्रह्महत्यादिदोषदुष्टत्वे तन्निरासाय प्रायश्चित्तान्तरङ्गत्वेन वपनं आवश्यकमिति चेन्न—

गङ्गास्नानं पुरा कृत्वा प्रायश्चित्तं समाचरेत् ।

इत्याद्युक्तरीत्या गङ्गादिपुण्यजलतीर्थावगाहनस्यैव प्रायश्चित्तान्तरङ्गत्वसंभवेन मुण्डनाचरणस्य अयुक्तत्वात् । तस्य पुरुषप्रायश्चित्तान्तरङ्गत्वनियमात् । तदाह पराशरः —

महापातकिनां पुंसां निष्कृतौ केशवापनम् ।
कृत्वादौ चाचरेत्कृच्छ्रतपश्चान्द्रायणादिकम् ।
योषितां निष्कृतिर्विप्रपुण्यतीर्थावगाहनम् ॥

एतेन विद्वद्विप्रनृपस्त्रीणां इत्यत्र महापातकिनः गोहन्तुः अवकीर्णिनः ऋते विद्वद्विप्रनृपस्त्रीणां केशखण्डनं नेष्यते । गोहन्तृत्वादिदोषदुष्टानां पुरुषाणां स्त्रीणामपि प्रायश्चित्तान्तरङ्गतया मुण्डनं युक्तमिति वदतां मतमपास्तम् ॥

ननु, स्त्रीणां परपुरुषकरस्पृष्टेः पातिव्रत्यनिरासकत्वेन, दुर्गतिप्रापकत्वनियमो न वक्तुं युक्तः । तथा सति, रावणकरस्पृष्टायाः

सीताया अपि दुर्गतिप्राप्तिप्रसङ्गात् । अतः परपुरुषकरस्पृष्टेः दोष-संपादकत्वाभावात् । नापितकरस्पृष्टिपूर्वकं रण्डामुण्डनं आवश्यक-मिति चेन्न ॥

सीतायाः रावणकरस्पृष्टेः बलात्कारायत्तत्वेन प्रामादिकत्वात्, स्मृतिषु प्रामादिकदोषस्य प्रायश्चित्तैकविनाश्यत्वश्रवणात् ॥

तदाह मुद्गलः —

बलात्काराद्यदि प्राप्तं मधुमांसनिषेवणम् ।
गङ्गास्नानं पुरा कृत्वा प्रायश्चित्तं समाचरेत् ॥ इति ।

तथा च रावणकरस्पृष्टदोषस्य अग्निप्रवेशरूपप्रायश्चित्तनिवर्त्य-त्वात् विधवानान्तु नापितकरस्पृष्टेः बुद्धिपूर्वकतया द्रव्यप्रदानद्वारा संपादितत्वेन, केनापि प्रायश्चित्तेन अनिवर्तितत्वात् ॥

अत्र केचिदाहुः जीवभर्तृकाणामेव पतिप्रेमास्पदत्वेन केश-धारणं युक्तम् । विधवानान्तु व्यभिचारदोषसंपादकत्वात् तदनुचित-मिति । तदाहुः स्मृतिकाराः —

'यानारूढं यतिं दृष्ट्वा खट्वारूढां रजस्वलाम् ।
सकेशीं विधवां चैव सचेलः स्नानमाचरेत् ॥

पतिहीनामाधुनिकां मृतपुत्रां मृतानुजाम् ।
सकेशां विधवां दृष्ट्वा सचेलः स्नानमाचरेत् ॥

पतिपुत्रानुजैर्हीनां पुंश्चलीं सशिरोरुहाम् ।
यः पश्येत्तन्मुखं दृष्ट्वा सूर्यः सूर्यान्तरे स्पृशेत् ।
शिरोजसहितां रण्डामुरोजसहितां स्त्रियम् ॥

सुवासिनीं विकेशां च दृष्ट्वा स्नानं समाचरेत् ।
रण्डामस्तकमालोक्य केशपाशसमन्वितम् ।
पतन्ति पितरस्तस्या नरकेक्षणमात्रतः ॥ इति ।

तदिदम् – त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय ॥ इति ।

भगवदाज्ञापितरुद्रपरिकल्पित तदधिष्ठितगौतमादिप्रणीतमोह-शास्त्रप्रवर्तककुमतिकल्पितत्वादनादरणीयमिति ॥

तत्रैव— एतेन स्त्रीणान्तु पूर्ववयसां नेष्यते केशखण्डनं 'पञ्चाशद्वायनादूर्ध्वं कामतो वपनं चरेत्' । इति । वदतां मत-मपास्तम् । नूनन्तासां केशधारणस्य आभिरूप्यप्रकाशकतया व्यभि-चारशङ्कास्पदत्वात् अनुचितमिति चेत् । सत्यमुक्तम् । शिरोजवत् कर्णनासिकादेः करचरणानामपि आभिरूप्याभिव्यञ्जकतया अनुचित-त्वेन खण्डनप्रसङ्गात् । तत्किं पाणिग्रहणपूर्वभाविनां खण्डनमुच्यते । पश्चाद्भाविनां वा नाद्यः । शिरोजवत् कर्णनासादेरपि तत्पूर्वभावितया खण्डनं स्यात् । किं च वस्त्रधारणमपि न स्यात् । तस्यापि पूर्वभावित्वाविशेषात् । न द्वितीयः स्तनयोरधः केशानामपि पाणि-ग्रहणपश्चाद्भावितया खण्डनापत्तेः इति । तत्रैव जाबालिः —

मौण्डी भवति या नारी सर्वकर्मबहिष्कृता ।
श्मशानकोष्ठवत्याज्या सूतकीति सदा भवेत् ॥ इति ।

ननु सकेशया विधवया कृतपाको पवित्रकः देवतातिथिनैवेद्य योग्यो नेत्याह गालवः —

सकञ्चुकयतिं दृष्ट्वा विकञ्चुकसुवासिनीम् ।
सकेशां विधवां दृष्ट्वा सचेलस्नानमाचरेत् ॥

इत्यादिवचनशतैः सकेशविधवा कर्तृकपाकस्य निषेधितत्वात् । तदन्नभोक्तृणां निरयप्राप्तिः अनायासात् संभवतीति चेत् । न वसिष्ठादिभिः गुरुभिस्सह रामलक्ष्मणादीनामपि निरयप्राप्तिप्रसङ्गात् । कौसल्यादिभिः पच्यमानान्नादेस्तैर्भक्षितत्वात् । न च तासां मुण्डितमस्तकत्वान्नदोषः इति वाच्यम् । पुत्रानुजादिदृष्टिस्पृष्टिविरहिणीनां क्षत्रियस्त्रीणां नापितकरस्पर्शपूर्वकक्षौरस्य अत्यन्तासंभवात् । विद्वद्विप्रनृपस्त्रीणामित्यादिवचनशतैः मन्वापस्तम्बादिभिः निषेधितत्वादिति ॥

उपवीतेन शिखया त्रिदण्डेन विना यतिम् ।
विकेशां विधवां दृष्ट्वा सचेलस्नानमाचरेत् ॥

विदुषां सर्वजातीनां विधवानां महीभुजाम् ।
प्राणैः कण्ठगते जीवे न कार्यं केशखण्डनम् ॥

सर्वदेवसमत्रिण्या वानप्रस्थाश्रमस्य च ।
न कार्यं केशवपनं न किञ्चिदपि संशयः ॥

अदृष्टपरपुंसां चाप्यबलानां हि सर्वदा ।
अभर्तृकाणां विद्वद्भिः नेष्यते केशखण्डनम् ॥

परस्पृष्टिविहीनानां मनोवाक्कायकर्मभिः ।
योषितां सर्वथा केशवपनं नेति गालवः ॥

इत्यादिवचनशतैः स्त्रीणां परकरस्पृष्टेः पातिव्रत्यनिरासकत्वेन निषेधितत्वादिति ॥

ननु, सकेशया विधवया कृतपाको पवित्रकः देवतातिथिनैवेद्ययोग्यो नेत्याह गालवः इति । वचनेन, परस्पृष्टिवचनानामित्येतद्वचनस्य विरोधात्कथं प्रामाण्यमिति चेत् । न उभयोः एककर्तृकत्वेन पूर्वपक्षसिद्धान्ताभिप्रायकत्वात् ।

'पूर्वपक्षमतिक्रम्य सिद्धान्तो न प्रवर्तते'। इति न्यायादिति ॥

तत्रैव श्रीपाञ्चरात्रे अनन्तसंहितायाम्—

प्रपन्ना भर्तृरहिता नारीदुरुपदेशतः।
न धारयति या केशान् यदि सा नरकं व्रजेत् ॥

मुमुक्ष्वी पतिहीनाया नारी वै केशधारिणी।
भवेद्यदि शृणु ब्रह्मन् दोषो नास्तीति मे मतम् ॥

विजयसंहितायाम् —

सकच्छं वर्णिनं भिक्षुं विकच्छं वर्णिनं तथा।
विकेशां विधवां दृष्ट्वा सचेलस्नानमाचरेत् ॥

तत्रैव—शरणागतिनिष्ठानां विधवानां मनीषिभिः।
निर्णीतं केशवपनं न कार्यं इति निर्णयः ॥

विधवायाः प्रपन्नायाः न कुर्यान्मूर्ध्नि मुण्डनम्।
तन्मुखं भगवद्भक्तो नेक्षेत प्रीतये हरेः ॥

स्त्रीणां तु भर्तृहीनानां वैष्णवीनां वसुन्धरे।
यावच्छरीरपातं वै प्रशस्तं केशधारणम् ॥ इति।

दिङ्मात्रमिह दर्शितम् – विस्तरस्तु पूर्वोदाहृतग्रन्थेषु कुन्नत्तूरैयन् इति द्राविडनामकवरदाचार्यविरचित दशनिर्णयदासकृतहरिदिनकृत्यविवेके च द्रष्टव्यः। अतः प्रपन्नविधवाभिः यावच्छरीरपातं केशधारणं कर्तव्यमेवेति सिद्धम्। इत्यलं प्रसक्तानुप्रसक्तचर्चया ॥

एषां गन्धभूषणतांबूलानि वर्जयेत्। उष्णोदकस्नान, पर्यंकशयन, रक्तवस्त्रधारण, तैलाभ्यङ्ग, आदर्शवेक्षण, शरीरोद्वर्तन,

बहुभाषण, परापवाद, पैशुन, निष्ठुरा, सत्यभाषणासतीसंग, क्रोध, पुत्रादिताडन, भर्तृत्वश्वश्रूश्वशुरनिन्दन, दिवास्वाप, मानसभोग, असद्वाक्यसल्लापाङ्गानाच्छादन, बहिस्सदनपर्यटनं, सदान्यगेहावस्थान, अस्नानभुक्ति, पूर्वाह्न, रात्रिभुक्त्यादीनि वर्जयेत् ॥

पितृपुत्रादिपराधीन, तीर्थयात्रा भगवदुत्सवार्थं भगवत्क्षेत्रगमनात्तत्र जनसंमर्दप्रवेशभयान्विता, पुरुषावयवसंस्पर्शत्रस्ता, युवसंभाषण, परिहासरहिता, रहस्य, दिव्यप्रबन्ध, भगवद्विषय, श्रीरामायणाद्यर्थश्रवणं कुर्वती सती वर्त्तेत । इत्थंभूता परार्थपरप्रपन्नविधवा, भगवद्भागवताचार्यकैङ्कर्यनिरता भगवन्निरतिशयकटाक्षविषयीभूता भवेत अन्यत्सर्वं आह्निकग्रन्थादौ द्रष्टव्यम् ॥

भगवच्छास्त्रादौ —

भगवानिति शब्दोऽयं तथा पुरुष इत्यपि ।
निरुपाधी च वर्त्तेत वासुदेवे सनातने ॥

स्वतस्सर्वस्य भरणात स्वातन्त्र्यादपि सर्वतः ।
पुरुषत्वं भगवतः स्त्रीत्वं जगत इत्यतः ॥

तत्त्वं व्यवस्थितं तस्मात्तयोः परिणयात्मकम् ।
चक्राङ्कनादिकल्याण कर्म स्यात्पञ्चधा स्थितम् ॥

चक्रादिधारणं पुंसां परसंबन्धवेदनम् ।
पतिव्रतानिमित्तं हि वलयादिविभूषणम् ॥

मन्त्रस्वीकरणं तत्र माङ्गल्यगुणधारणम् ।
पुंसां प्रदानं भगवत्पत्नीभावस्य लक्षणम् ॥

स्त्रीप्रायमितरत्सर्वं जगत्स्थावरजङ्गमम् ।
भगवान् पुरुषः प्रायः श्रीमान्नारायणः स्वयम् ॥

ततस्तयोर्भर्तृभार्या भावसंबन्धसूचकः ।
आत्मनि पञ्चसंस्कारः सम्भृध्यै सर्वसंपदाम् ॥

'अवश्यं भावतः कार्यः' इत्याद्युक्तरीत्या पञ्चसंस्कारयुक्तास्सर्वे परार्थपरप्रपन्नाः अर्थपञ्चकतत्त्वज्ञाः सर्वप्रकारेण, स्वार्थतागन्धरहिताः ॥

श्रीपाद्मपुराणे उत्तरखण्डे उमामहेश्वरसंवादे एकोनत्रिंशाऽध्याये —

मच्चक्राङ्कितदेहत्वं मदीयाराधनं तथा ।
मयि सन्न्यस्तकर्मत्वं मदनन्यशरण्यता ॥

मयि सर्वभरन्यासं महाविश्वासपूर्वकम् ।
अनन्यसाधनादित्वं आकिञ्चन्यत्वमात्मनः ॥

अवैष्णवानां सल्लापवन्दनानि विवर्जनम् ।
तथान्यदेवतानां च पूजावन्दनवर्जनम् ।
एवमाद्याश्च नियमाः प्रपन्नस्येह कीर्तिताः ॥

इत्याद्युक्तनियमसहिताः मनसापि पापस्मरणभीरवः ॥

श्रीवचनभूषणमीमांसायां भगवत्कैङ्कर्यप्रमाणादि प्रकरणनामक, त्रिंशप्रकरणस्थस्य इष्टानिष्टங்கள் वर्णाश्रमங்களையும் आत्मस्वरूपत्तैयुमवलम्बित्तिरुक्कुमिति सूत्रस्य वृत्तौ इष्टानिष्टங்கள் वर्णाश्रमங்களைப் பற்றியிருக்கையாவது स्ववर्णस्वाश्रमोचितमान धर्मங்களை परार्थबुध्या அநுஷ்டிக்கை इष्टमाय् स्वार्थबुध्या अनुष्टिक्के அநிஷ்டமாயிருக்கை परार्थबुध्या अनुष्टिक्कैயாவது लोकसंग्रहतया வாகவும் शिष्यपुत्रर्களுடைய உஜ்ஜீவநார்த்தமாகவும் आनृशंस्यத்தாலே யநுட்டிக்கை இவ்வர்த்தத்தை இனி இவற்றில், நம்மாசார்யர்கள், அநுஷ்டிக்கிறவை. சிஷ்யபுத்ராதிகளுடைய உஜ்ஜீவநார்த்தமாக आनृशंस्यத்தாலே அநுட்டிக்கிறார்களித்தனை.

இப்படி யநுஷ்டியாதபோது भगवद्विभूतिभूतரான சேதன
ருக்கு, நாசஹேதுவாகையாலே ईश्वரனுககு அநபிமத
பூதனுனவன். ஆகையாலே யாதோரளவாலே லோக
சங்கிரகம் பிறக்கும். யாதோரளவாலே சிஷ்யபுத்ரர்
களுக்கு உஜ்ஜீவனமுண்டாமவ்வளவுமநுஷ்டேயமென்ன
தாயிற்று. प्रवृत्तिधर्मन्दाநே अभिसन्धिभेदत्ताले निवृत्तिधर्ममान
வோபாதி இந்த நிவ்ருத்திதர்மமும் ப்ராப்யமாகக்கடவது.

இவ்விடத்தில் वर्णाश्रमधर्मं लोकसंग्रहதயா அநுஷ்டேய
மாயிருக்கும். वैष्णवधर्मம் प्राप्यतया அநுஷ்டேயமாயிருக்கும்.
இவ்விடத்தில் अकरणे प्रत्यवायं எம்பெருமானுடைய अनभिम-
தத்வமும் தன்னுடைய पुरुषार्थ ஹாநியுமாகக்கடவது.
ஆகையால் विहितत्वाच्चाश्रमकर्मापि सहकारित्वेन च என்கிற
उभयप्रकारத்தாலும் அநுஷ்டிக்கிருர்களல்லர். என்று தனி
ச்லோகத்திலே இவர் தாமே யருளிச்செய்தாரிறே.

இனி स्वार्थबुद्ध्या அநுஷ்டிக்கையாவது स्ववर्णाश्रमोचित-
माक विहितमाகையாலல நமக்கிவை யநுஷ்டியாதொழியில்
कृत्याकरण ரூபபாபம் வரும் என்று நினைத்தநுஷ்டிக்கை
इति परंदपडि नामकग्रन्थे — இருவர்பக்கலிலும் அநுஷ்டானம்
சமமாயிருக்கச் செய்தே ஹேதுவைஷம்யமுண்டாயிருக்
கும். साधनत्वबुद्धि அநுவர்த்திக்கும் உபாசகனுக்கு साध्यत्व
बुद्धि அநுவர்த்திக்கும் ப்ரபன்னனுக்கு विहितधर्मानुष्ठान-
त्तुक्कु मुख्याधिकारिसिद्धसाधननिष्ठन् साध्यान्तरनिष्ठन् स्वर्गादि-
साधनमाक நினைத்திருக்கும் साधनान्तरनिष्ठन् मोक्षसाधनமாக
நினைத்திருக்கும். सिद्धसाधननिष्ठन् स्वयंप्रयोजनमाक நினைத்
திருக்கும்.

इति प्रपन्नपारिजाते वर्जनीयपद्धतौ ।
वर्जनीयं प्रपन्नानां वर्ण्यते लोकवेदयोः ॥

स्वावस्थादेशकालानां विरुद्धं वर्जयेत्सदा ।
वर्णाश्रमविरुद्धं यन्मन्वाद्युक्तमशेषतः ॥

स्वाधिकारविरुद्धं च शास्त्रोक्तं न समाचरेत् ।
सामान्यशास्त्रानुज्ञातं विरुद्धं च विशेषतः ॥

प्रपत्तेः प्रतिबन्धस्तु जायते यैर्हि कर्मभिः ।
प्रपन्नो न निषेवेत तादृशानि कथञ्चन ॥ इति ।

तत्रैव विहितव्यवस्थापनपद्धतौ—

विहितेषु व्यवस्थानं प्रपन्नानां प्रपञ्च्यते ।
श्रुतिस्मृत्यादिविहितमनुष्ठेयं तु नैत्यकम् ॥

श्रुतिस्मृतिर्ममैवाज्ञेत्याह लक्ष्मं प्रतीयतः ।
प्रपन्नस्तु विशेषेण शास्त्रेण विहितान्यपि ।
कुर्यात्स्रग्बन्धनादीनि कर्माणि श्रीपतेः सदा ॥ इति ।

रामानुजार्यदिव्यचरिते - உடையவரும் அரங்கமாநகரமர்ந்து கோயிலிலே கண்வளர்ந்தருளுகிற பெரிய பெருமாளுக்குப் பிரீதியாகவே நித்யகர்மங்களை, நீங்களும் செய்துபோருங்கோளென்று சிஷ்யர்களை ஆசாஸிக்க அவர்களுமப்படியே க்ருதக்ருத்யர்களாய் வந்து திருவடிகளிலே ஸேவித்தவுடனே, திருவடிநிலைகளி சாத்தியருளி इति ॥

तत्त्वदीपे सर्वत्र सर्वधर्माधिकारिभेदव्यस्थिताः स च अधिकारिभेदः वर्णाश्रमगुणपाकरुच्यादिभेदप्रयुक्तः । अन्यथा सर्वश्रुतिस्मृतिव्याकोपःप्रसज्येतेति । तस्मात् शरणागतस्य स्वाधिकाररूपं वर्णाश्रमनियतं कर्म भगवत्प्रीत्येकप्रयोजनं कर्तव्यमिति सिद्धमिति च ॥

दीपसंग्रहकारिकायाम्—

योंऽशस्त्वकरणे स्वस्य प्रत्यवायावहो मतम् ।
आगाम्यनर्थरोधित्वात् सोऽनुष्ठेयो विधीयते ॥

इत्याद्यनुगृहीतरीत्या स्वयंप्रयोजनभगवन्मुखोल्लासार्थं नित्य-नैमित्तिककर्ममात्रं कैङ्कर्यबुध्या यथाधिकारं कुर्वाणाः भगवद्भागवता-चार्यकैङ्कर्यनिरताः रहस्यदिव्यप्रबन्धाद्यर्थनिष्णाताः निर्हेतुकपुरुषकार-भूतलक्ष्मीसमेतस्य सर्वकारणभूतस्य सकलकल्याणगुणाकरस्य सर्व-शेषिणः श्रियःपतेः निर्हेतुककृपापरिपूर्णकटाक्षविषयीभूताः, सन्तः परमानन्दं श्रियं लभन्ते इति सर्वं समञ्जसम् ॥

इति श्रीसदनुष्ठानदर्पणे प्रपन्नकर्तव्यतादि विषयो नाम

द्वात्रिंशत्प्रतिफलनम् ॥

न ख्यात्यै कृतिरेषा किन्तु स्वसूक्तेर्निजार्थमननाय ।
तद्दययाऽत्र भवन्तो विमृशन्त्वेतां विमत्सरास्सन्तः ॥

इति श्रीसदनुष्ठानदर्पणम् ॥

॥ श्रीरस्तु ॥

स्वस्ति श्रीस्तनकस्तूरीमकरीमुद्रितोरसः ।
श्रीरङ्गराजाच्छरदश्शतमाशास्महे तमाम् ॥

Copies can be had from:—

S. Kannammal,
48, North Chitra Street,
Srirangam,
Trichy-620 006.

&

Dr. T. V. S. Jagannathan,
1/30, Staff Quarters,
Palkalai Nagar,
Madurai-625 021.